M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 594

Title Sarvanukrama Deepika of Rg Veda

394

सर्वानुक्रम दीपिका
of ऋग्वेद

Title	Sarvānukrama Deepikā
Author	Ganesha Krishna ~~Dokhale~~
Editor	Dokhalé
Year, Vols.	Saka. 1723
Publisher	
Remarks	of Rgveda

394

394

सर्वानुक्रमदीपिका

आम्नाये: अथशब्द आनंतर्यमंगलाधिकारेषु इष्टो ऽर्थत्रयसंभवात् कथमिदं संप्रवेदिति तदुच्यते। अथ ऋग्वेदस्याधीतस्य हि सामर्थ्यफलसंपित्सायेनमारभ्यत इत्यानंतर्यार्थः। अपिच
स्वभावादेव ॐकार अधिकारः प्रस्तुतिर्नाम सूक्तप्रतीकादीनां पंचानामपि प्रतिसूक्तमाशास्त्रपरिसमाप्ते ईक्षया नन्वेतर्थाः कथमेकस्य शब्दस्य सकृत्प्रयुक्तस्य भवेयुः नैष
गोशब्दवत् वाग्दिग्भूरश्मिवज्रेषु पशुस्वर्गवारिषु इत्यस्यर्थेषु प्रभावी गोशब्दमुपलक्षयेदिति ऋचांसमूह ऋग्वेद वेदऋग्वेद ऋचां दश सप्ताम्नायान्वस्युतइति कृत्वाम्नाया
तोऽस्यर्थत्वात् आम्नायइत्यस्यहि पूर्वस्यकर्मणि प्रत्यत्वं नस्यैतद्रूपं अकलेऽचिकारकेसंज्ञायामित्यनेन शाकलत्वमुक्त्वात् शैशिरीयकमित्यध्याभिप्रायेण केचिदाहुः

सर्वानु० ६१ श्रीमहागणपतयेनमः। वक्रतुंडमहेशानं जगद्वंद्यां सरस्वतीं। वेदब्रह्मगुरूंश्चैव प्रणतोऽस्मि यथाक्रमं १ वेदादिराज ऋग्वेदो विख्यातः
पुरुषो महान्। सैवनारायणः प्रोक्तस्तस्मै वेदात्मनेनमः २ भट्टकृष्णः पिता यस्य जननी रुक्मिणी सती। यस्याग्रजोमहादेवो
१ खले त्युपनामकः ३ परिभाषां विभाव्याथ सर्वानुक्रममेवच। गणेशाख्यस्तनोतीमां सर्वानुक्रमदीपिकां ४ ॥ ॥अथऋ
ग्वेदाम्नाये शाकले ॥ अथशब्दो मंगले प्रस्तावे वा। अस्य द्वितीयार्थः। अथशब्दः पूर्वमेव मंगलार्थः स उच्यते। सब्रह्मपरमं
ह्येयंस्मरणात्सर्वतः शुभः। अपिच। ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कंठं भित्वा विनिर्यातौ तेन मांगलिकावुभा
विति। ऋग्वेदऋग्गणशब्दाऊल्यादित्यर्थः। मंत्रब्राह्मणयोर्वेद इति वचनात्। ऋचां दश सहस्राणि ऋचां पंचशतानि च। ऋचा
मशीतिः पादश्चैतत्पारायणमुच्यते इति ग्रंथांतरवचनात्। आम्नाये। सम्यगभ्यासयुक्ते खिलरहिते इति। तत्र वेदाभ्यासः
पंचधा विहितः। अध्ययनं विचारोऽभ्यसनं जपोऽध्यापनमिति। स्मर्यते। वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः। तद्दानं चैव १
देवेलिक व्याकृतर्थमिदं इष्वं खेलिकानामनादेशोऽस्मिन्ग्रंथे इति = ३ =

नोकुलोवत्स्य शिशिरि आश्वलायन मुद्गलौ = इतिपाठः = ७ = + ऋग्वेद शाखा शाकल्या शाखा कल्या रख्यातिरास्मृता। गोभिलाः शौनकाः सर्वे कल्पशाखाप्रचक्षते = ७ =

शिष्येभ्यो वेदाभ्यासो हि पंचधा इति। तदपि वक्ष्यति। एकः श्रोता दक्षिणतो निषीदेद्द्वौ वा भूयांसस्तु यथावकाशमित्यध्यापनं। अस्यार्थः। एकः श्रो
ता शिष्यः। सदक्षिणत उपविशेदित्यर्थः। अथवा द्वौ शिष्यौ। अथवा भूयांसः बहवः शिष्याः यथावकाशमित्यनियम इत्यर्थः। तथा। अभ्या
सार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमां। शिष्याणामुपदेशार्थं कुर्याद्वृत्तिं विलंबितामिति। अस्यार्थः। द्रुतशब्दात्त्वभावे त्वरितवृत्तिः
ततः प्रयोगार्थं याजने मध्यमवृत्तिः। नतु शिष्योपदेशात् अध्यापनं विलंबितवृत्तिरित्यभ्यासलक्षणमिति प्रातिशाख्ये। सचविचारो
द्विविधः। अर्थतो लक्षणश्चेति। शाकलके ॥ शाकलमहर्षि प्रवक्तृकइत्यर्थः। उक्तंच। ऋचां समूह ऋग्वेदस्तमभ्यस्य प्रयत्नतः। पठितः शा
कलेनादौ चतुर्भिस्तदनंतरं। उक्तंच। सांख्याश्वलायनौ चैव मांडूकौ बाष्कलस्तथा। बह्वृचा ऋषयः सर्वे पंचैते एकवेदिनः। अपिच। मुद्गलो
गोखलो वात्स्यः शशिरः शिशिरस्तथा। पंचैते शाकलाः शिष्याः शाखाभेदप्रवर्तकाः। इति पुराणे प्रातिशाख्ये वचनादिति।
सूक्तप्रतीकऋक्संख्यऋषिदेवतछंदांस्यनुक्रमिष्यामः ॥ ॥तत्र सूक्तप्रतीकमग्निमीळे इत्यादि। सूक्तं सहस्रं सप्तदशकं
सपादाधिकं च। तस्य सूक्तप्रतीकावयवः संसमित्यंततः। तत्र सूक्तं निराकांक्षमर्धर्चे वचः। तदुक्तं बृहद्देवतायां। संपूर्णमृषि
वाक्यं तु सूक्तमित्यभिधीयते। चित्रं तत्र दृश्यं तत्रास्मिन्नेकस्यावकाशत्वयोरिति। तद्यथा ऋषिसूक्तं देवतासूक्तं छंदः सूक्तमर्थसू

२ चातुर्विध्यमप्याकुः स्वल्पमीर्षा = २ =

सर्वा· टी·

ऋचेति। तत्रोच्यते। ऋषिसूक्तानि पारंतिसूक्तान्येकस्यैवेक्षुतिरिति। ऋषिसूक्तं। यथा मधुच्छंदाः ऋषिसूक्तं निदर्शनमिति। ततः स्तुयेते
२ कांतु यावत्क देवता यास्तद्युच्यते। यावत्स्तुतिं देवता च तत्तत्सूक्तं दैवतं मित्रः सूक्तमिति देवतासूक्तं। यथा मेंद्रलादि याग्नेयमिति। तथानव मंपि
डलं पावमानं सौम्यमित्यादि देवता सूक्तं निदर्शनं। ततः समानछंदसो यास्तुतछंदः सूक्तमुच्यत इति छंदः सूक्तं। यथाग्निमीळ इत्यादि गा
यत्रं छंदो गायंति त्वेत्यतः शाकतछंदः सूक्तं निदर्शनमिति। ततः यावत्स्वर्थं समाप्येतदर्थं सूक्तं वदंति। तदित्यर्थसूक्तं। तत्र सूक्तार्थमंत्र
व्याख्याश्चेति। तदर्थं सूक्तं बोद्धव्यं· इति वृद्धाचार्याः। तत्र ऋषि सूक्तं देवता सूक्तं छंदः सूक्तमर्थसूक्तं केचिन्मतं· प्रशंसामात्रमेव· एतान्यृ
षादीनि चत्वारि सूक्तानि याजनाध्यापने अनुष्ठानं नास्ति। अर्थवाद इति ज्ञेयं· यथा आग्नेया वै प्रयाजाः। अपि च। छंदांसि वै प्रयाजा
इत्यादिने रुक्ते व्याख्यातं। तत्राग्नेया इति तु स्तुति निर्भक्तिमात्र मितरदिति निदर्शनं। यथा गायत्रं प्रउगं कुर्यादित्यादि जागतं प्रउगमि
त्युत मारण्यके उक्तं। तत्र तद्गायत्रमेव कुर्यादिति द्वितीय निदर्शनं। तत्राग्निमीळ इत्यादि सूक्तानि सहस्र सप्तदशकानि याजनाध्या
पने अनुष्ठान सिद्धिरित्यर्थः सर्वत्र। ऋक्संख्या। ऋचामेकत्वात्। तत्र जातवेदस इत्येकर्चं सूक्तमित्यादि द्व्यृचं त्र्यृचं चतुष्कं पंचकं षट्कमि २
त्युत्तरोत्तर भूयान्परिगणयंत इत्यृक्संख्या सहस्र सप्तदशाधिकं सूक्तं वेदितव्यं· पादाधिकमित्यपवादः। ऋषयः। तेच मंत्रदृशः। तेचत्वारि

= ऋक्संख्येतीयत्योमिन्त्वइति = २ =

तत्पुत्रपौत्र नप्तार ऋषिपुत्रा इति स्मृताः। राजन्य वैश्य ऋषिका स्त्रियस्ता स्तिर्यग्योनयः। देवा देवस्मरो नद्यो गंधर्वास्ते स्वयंभुवा इति देवताया अपि त्रैविध्यमेव· वक्ष्ये शौनक मते· तास्त्रयस्त्रिंशद्व
सु इति विशयोध्य पर्यकृत इति· वक्ष्यति च त्रित्वेकत्व पक्षौ तत्रैव निदर्शयिष्यामीति = २ =

धाः। ऋषयः। ऋषिपुत्राः। ऋषिकाः। स्वयंभुवा इति। तदुक्तं। ऋषीणामृषि पुत्राणामृषिकाणां स्वयंभुवां· तथा नामाभिजानीयाद्यथैषां मंत्रदृ
ष्टयः। प्रवरे ये समाम्नाता ऋषयस्त इति श्रुतिः। तत्र यदु लांगिरसो रहूगणः। तत्पुत्रो गोतमः। तत्पौत्रो वामदेवः। तन्न बृहदुक्थ इत्युदाहरणं· अन्यच्च
मधुतगाथी ऋषिः। तत्पुत्रो विश्वामित्रः। तत्पौत्रो मधुच्छंदाः। तं नप्ता जेता इति द्वितीयोदाहरणं· तथा त्रिपुत्री विश्ववारा नाम्नी ऋषिका· अपि च। प्रजाप
तिपुत्री दक्षिणा ऋषिका। तथा गोधा घोषा इत्यादि। एता ब्रह्मवादिन्य इति स्युदाहरणानि। अपि च। सहस्रशीर्षा सूक्त दृष्टा नारायण ऋषिरिति
स्वयंभुव इति· तथा। आयं गौः सूक्त दृष्टा सार्पराज्ञीति स्वयंभुवा इति तस्या गोत्रोत्पत्तिर्नास्ति। दैवतं। अग्न्यादीन्द्रो विष्णुरित्यादि देवता· यल्लिंग मंसा
देवता मंत्र देवता इत्यर्थः। अग्निः सर्वा देवता विष्णुः सर्वा देवता इति श्रुतिः। यन्नानादेवत्यास्तेनान्या देवताः इति श्रुत्युदाहरणानि। छंदांसि प
छंदः पाप स्वच्छादनादित्यर्थः। छादयंति ह वा एनं छंदांसि पापात्कर्मण इति श्रुतिः। छंदांसि खल्वपि नाना विधान्येव गायत्र्यादीन्यति धृति
पर्यंतानि। चतुर्दश छंदांसि शाकल संहितायां पठ्यंते· आहृत्यादीनां वै खिलत्वात्· अपि च। ग्रंथांतर पठ्यंत इति· एतानि सूक्त प्रतीका
दीनि पंचानुक्रमिष्यामो व्याख्यास्याम इत्यर्थः। सूक्त प्रतीकादेश्च पंचकस्य प्रति सूक्तमुपस्थापनं वेदितव्यं· आशास्त्रपरिसमाप्तेस्तत्रो
दाहरणं बोद्धव्यं· यथा सहस्रशीर्षा पाद्भश्चैवं सूक्तं· नारायण ऋषिः। पुरुषो देवता। अनुष्टुप् छंदः। अंत्यं त्रिष्टुप्· इति सर्वत्र निदर्श

ऋ अनादेशो त्रिष्टुप् शइति = २

[illegible]

सार्वा॰ टी॰ नं॰ एते सर्वे बहुवचननिर्देशाः प्रतिपादिता इति ॥ यथोपदेशं॰ यथाविधः उपदेशः उपदेशशब्देन चात्र श्रुतिदर्शनान्येव विवक्षितानि॰ यथा
२ शौनकाचार्याश्वलायनाचार्याभ्यामनुक्रमणियुक्तप्रदेशानतिक्रमेण सर्वानुक्रमण्यनारंभसंबंधज्ञानकारणदोषसंकीर्तनतदारंभसमर्थयत
इति वेदितव्यं ॥ नहीत ज्ञानमंतेरेण श्रौतस्मार्तकर्मप्रसिद्धिः। ज्ञानं विना श्रौतकर्माण्यग्निहोत्राण्यग्निष्टोमादीनि विश्वसृजामयनांतं श्रुति
विहितं कल्पसूत्रैर्व्याख्यातं श्रौतं॰ यथा होता मैत्रावरुणः पुरोनुवाक्यायाज्याः शस्त्राणि॰ यद्वाजनिष्ठा उग्रः सस्सेतुरायत्येकादश रीस्त
कं गोरिवीत्यार्षमिंद्रदेवत्यं त्रैष्टुभं मरुत्वतीयं शस्त्रं॰ अपिच। इंद्रस्य नु वीर्याणि प्रवोचं पंचदशर्चं सूक्तं हिरण्यस्तूप आर्षमिंद्रदेवत्यं
त्रैष्टुभं निष्केवल्यं शस्त्रं अथवा इति श्रौतोपदेशं। तथा स्मार्तकर्माणि गृह्यसूत्रं तथा च स्मृतिविहितं गर्भाधानादिसंस्कारोपनयनो
पाकर्मवेदारंभोर्ध्वदेहिकांतं पंचमहायज्ञादि॰ कर्मशब्दः आह्निककर्माणि प्रसिद्धिः। फलप्रदानमंत्रज्ञानमंतरेण मंत्रार्षदैवतछंदः स्थितज्ञा
न व्यतिरिक्ते। एतद्ज्ञानात्मकश्रौतकर्मणां फलासंभव इति॰ तथा चोक्तं भाष्ये। याजनाध्यापनं चैवमविचार्य पठेद्द्विजः। अपिच्छं २
स्य विज्ञात्वा तमवीर्यकर्म निःफलं। इत्यृष्याद्यज्ञानेन मंत्रकं कृत्वा च सर्वत्र। तज्ज्ञानमवश्यकमित्यर्थः। तथाहि। स्मर्यते।
अविदित्वा ऋषिं छंदो दैवतं योगमेव च॰ योध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः। ऋषिछंदो दैवतानि ब्राह्मणार्थं स्वराद्यपि॰

नचोपनयनादिना एतत्समानम्॰ यद्वा॰ यथोपदेशमिति॰ यथैव भगवता शौनकेनोपदिशता सर्वेनोपदिष्टमिति तत्तद्दोषप्रसक्तिरित्युच्यते॰ नतु तल्लापि॰ अलिति विशेषोक्त
प्रतानाम॰ तत्र तत्र प्रकीर्णं॰ तदिह संक्षेपेणोपसंहृत्य कांडानुसमयेन च सुखबोधनार्थं कथ्यत इति विशेषः॥ आह॰ प्रयोजनाभावादस्यारंभानुपपत्तिः। नखल्वारंभमस्ति प्रयोजनं
इति शब्दो यस्मादर्थे॰ यस्मादिमं तरेणाशेषकर्मसाधनानां कर्मणा प्रसिद्धिः। तस्मादिदं प्रारब्धं॰ प्रसिद्धिश्चात्र फलसिद्धिर्विवक्षिता॰ तदेव मेतत्प्रभावप्रयोगात्॰ तथाहि
धात्वर्थमात्रसिद्धिः। केनबाध्यते॰ श्रौतस्मार्तानि च प्रसिद्धान्येव कृतएतत्सर्वमिति चेत् उच्यते॰ = ३ =

सर्वा॰ टी॰ अविदित्वा प्रयुंजानो मंत्रकंटक उच्यते॰ स्वरो वर्णोक्षरं मात्रा विनियोगोर्थ एव च॰ मंत्रं जिज्ञासमानेन वेदितव्यं पदे पदे इति॰ अस्यार्थः। स्वरादिवुक्तमंत्राणां दैवतं छंदो नि
रुक्तं ब्राह्मणमृषिणामज्ञानं सर्वकर्मणे कल्पये दोषयुक्तः। अथ विदुषः फलमाह। मंत्राणां ब्राह्मणार्षेय छंदो दैवतविद्याजनाध्यापनाभ्यां श्रेयोधिगच्छति ॥ मंत्राणामग्निमी
ळ इत्यादीनां विहितानां पदार्थानामनुष्ठानकाले स्मारकतयानुष्ठितानां विनियोज्यं वेदभागानां संबंधीनां॰ ब्राह्मणं विधायकमग्निर्वै देवानामित्यादि दृश्यापयित्वादि
परिज्ञानाद्विद्यो दृश्यत इति॰ आर्षेयं मधुच्छंदाद्यृषिदर्शनमित्येवमधुच्छंदसः प्रदत्तं यदुक्त्याहि॰ छंदो गायत्र्यादीनि छंदांसि सीतराणि॰ दैवतमग्न्यादीन् द्रादिमंत्रलिंगं च॰ यथा
र्थज्ञानं याजनाध्यापनाभ्यामिति प्रदर्शनार्थं॰ तत्र याजनं वैतानिकान्यग्निहोत्राणि प्रगृह्य परिचर्याणि॰ ततः अध्यापनं शिष्योपदेशः स्वाध्याय ब्रह्मयज्ञ सम्यक्
ज्ञानमधीतं पुण्यं श्रेयः प्रशस्य स्वर्गपुत्रादि मोक्षांतं फलमधिगच्छति विशिष्टं प्राप्नोति। केवलपाठात्तु दैवतछंदो ज्ञानं विना फलं न भवति॰ अथ ज्ञानं पर्यायं
स्तन्तराः मंत्रेन रुक्ते॰ यो र्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मेति ज्ञानप्रशंसेति॰ तथा चोक्तं॰ श्लोकः। मंत्राणां दैवतां विद्यः प्रयुंक्ते कर्मके हि
चित्। अनुषंते तस्य दैवासो हविर्नादैवताविदः। स्वाध्यायमेवयो धीते मंत्रदैवतवच्छुचिः। अस्यत्र सहा परिसर्गे सत्र सद्भिरपीज्यते॰ परिज्ञाने श्रेयोधिगमः॥
अपरिज्ञाने दोषाभावइति। तच्च। एनाध्यापिवानेर्वविदीयान् यथा मानिछंदांसि प्रवंतिस्थाणुं वर्छति ॥ एताभ्यां याजनाध्यापनाभ्यां। अनेवंविदुद्दुत्स्य। अज्ञानिन
इत्यर्थः। सर्वानुक्रमण्यज्ञानस्येवं यथोक्तज्ञानरहितस्य यात यामानि वीर्याणि छंदांसि भवंति। अथवा यातयामी जीर्णभुक्तोच्छिष्टे पिंडानांनेवते॰ तस्मा
दृश्यशब्दनिरस्तत्वात् छंदः सुवर्जितः इति॰ अनेवंविन्। अज्ञानेन कृतं कर्मतेन स्थाणुं वर्छति। स्थाणुं वृक्षजाति वाच्छति॰ स्थाणुवरं प्राप्नोति॰ ॥ गर्तं वा
पात्यते ॥ गर्तं नरकं कूपं पंकमध्ये मंडूकवत्पापादिगातिपातयते॰ असत्यात केदोषिश्च॰ तत्र नैरुक्ते पूर्वोक्तमंत्रे अज्ञानलक्षणनिंदा व्याख्याता॰ स्था
णुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योर्थं। इत्यज्ञानं निंद्यते। श्लोकः। गर्तं यः पतितस्तं भस्त्र सम सहशो नरः। भारवाही पशुरेवत

स्थावरत्वं प्राप्नोति गर्तेश्च केवाधात्यंतधर्माध्यक्षेण समित्यात। प्रमीयते॰ हिंस्यते॰ कुत एतत्सर्वमिति चेत्॰ यतः पापीयान्भवतीति विज्ञायते तस्मिन् एवमत्र बोध
यति॰ तच्चार्थावबोध क्रियाप्रसंगफलरतमेव दृश्यं॰ अर्थवादत्वात्॰ एवं प्रयोजनाद्यभिधायाह॥ ५ =

सर्वा. टी.
४

स्यजन्मनिरर्थकं। प्रमीयते वा पापीयान् भवति॥ प्रमीयते म्रियते हिंस्यते॰ कुतएतत्सर्वत्रमिति चेत्॰ यतः पापीयान् भवति॰ श्लोकः। अनभ्यासेन वेदानामा
चारस्य तु वर्जनात्॰ आलस्यादन्नदोषाच्च मृत्युर्विप्रान्जिघांसतीति मनुवचनात्॰ अपिच॰ अतो महर्षयः सर्वे वेदो वेदइति स्थिताः। अधीयंते कर्मशक्तिरिह
आदि भुंजते॰ ततः। अविचार्य पठेद्यः शिष्यैरध्यापनेन तु। म्रियते तु भवेत्पापीयम लोकं सगच्छतीति विज्ञायते। सामवेदार्षेय ब्राह्मणे विप्रो वेष्णवायन
इत्यर्थः॥१॥ प्रथमखंडः। अथ ऋषयः। अथेत्यनंतरं सामान्यविशेषनामानः ऋषयोऽभिधीयंते। शतर्चिन आद्ये मंडले। आद्यमंडलस्था ऋषयः
शतर्चिनसंज्ञिकाः। ऋचां शतं विंशत्यधिके द्वे शतं च शतं तद्योगेन सर्वे शतर्चिनः। अधिकं विशंतानि वा कल्प्यात्॰ शतर्चिसंज्ञा विज्ञेया प्राद्यमंडलदर्शिन
इति। मधुच्छंदः प्रभृतयो गस्त्यपर्यंताः सर्वे एते शतर्चिन इति। दशशाद्यो मधुच्छंदा ह्यधिकं यद्दृचां शतं। तस्मात्तद्वर्गा (?) पिविज्ञेया स्मृत शतर्चिनः। अथ
शाक्वरिणकेन यथा वैकत्रिणे भवन्निति॰॥ अंत्येक्षुद्रसूक्तामहासूक्ताः। अंत्ये दशमे मंडले। अग्ने कहनु त्रितः प्रभृतयः संसमित्संवननपर्यंताः स
र्वे क्षुद्रसूक्तमहासूक्तनामानः। तद्विहासीयात्पूर्वं महासूक्तं। परं क्षुद्रसूक्तं सूक्तदर्शित्वात्॰ तत्र क्षुद्रसूक्तं महासूक्तं निदर्शनं। यथा शतर्चिन आद्यमं
डलेस्थिताः संतोल्पर्चद्वयशारोयेऋषयः। तेसर्वेशतर्चिनसंज्ञिकाः। अपिच। बहूर्चद्वयशारोयेऋषयः तेपि शतर्चिनसंज्ञिकाः। तथा महासूक्तां
तपर्यंताः क्षुद्रसूक्ताश्चैते सर्वे महासूक्तसंज्ञका भवंति॰ तत्र क्षुद्रसूक्ता महासूक्तावसानं॰ एकर्चादारभ्य दशर्चपर्यंतं क्षुद्रसूक्तं। ततोधिकं महास
क्तं। ततः महासूक्तलक्षणं पूर्वाचार्यैरुक्तं। दशर्चं तथा अधिकं महासूक्तं विदुर्बुधा इति श्रूयते। तन्महासूक्तं स्यात्क्षुद्र... तत्सूक्तं (?) यंजमा ४
नं प्रतिष्ठापयति वरो रोहन्ति महासूक्तं चेति श्रुतिः। इति ब्राह्मणव्याख्यातेति ततः विद्यारण्यश्रीपादास्तत्र्यते सोऽब्रवीदहमिदं सर्वमसानि यक्षक्
दृंय च्च महादिति। आरण्यके श्रुतो जातवेदसे एकर्चत्वात् क्षुद्रसूक्तं। अस्यवामस्येति बहूर्चत्वात् महासूक्तं। तद्दर्शिनां तदृषयः क्षुद्रसूक्ताम

५ परिभाषेयं॰ आंगिरसामन्वयोच्चारणपरिजिहीर्षयाक्रियत इति॰ आंगिरस इति प्रोच्चावरमित्यनेनाभिप्रायेण क्वचिद्देशांतरेण क्वचित्तद्धितादिनाविशेषितं॰ ब्रह्मऋषि॰ स्वजिष्यादि॰ अत्रिवसिष्ठियादि वर्जयित्वातरनामांचन तवर्ग(?)॥
वय॰ देवतास्तावकः प्रथमोवर्गः। द्वितीयः संवादसूक्तेर्दर्शिभिः। तृतीयस्त्वात्मस्तावकइति॰ तदुक्तं॰ गोधा घोषा॰ इरितादुत्यांततः वर्जयित्वा॰ अन्योक्ते आंगिरसो विज्ञेयः॰ घषा॰ तमग्ने ऋतुना हिरण्यस्तूपइति॰ हि
ण्यस्तूपस्याविशेषितत्वात् आंगिरसत्वं॰ अविशेषितग्रहणात्॰ विशेषितस्य प्रदेशांतरे॰ पितेवमंतकं॰ यथासप्तममंडलवसिष्ठोपश्यदितीहा न मामिधानादपि प्रदेशांतरे विशेषितत्वात्॰ मित्रावरुणयोरसिवो

नतश्चापेर्वमंत्रदृशाधिकारवत्॰ परमात्मैवादित्यमंडले नीलपुंडरीकाक्षो नारायण इति सिद्धं ४ — — ३ इदमन्यदुच्यते॰ ये एते खल्वमी मंत्रदृशः सर्वे एते पुरस्यैव विभूतिः। कुतएतदिति चेत्॰ एतरेयके प्रमार्थप्रसिद्धत्वात्॰ २

हासूक्ताश्चेत्याह। तद्योगाभिप्रायं॰ तत्र क्षुद्रसूक्तमहासूक्तशब्दौ योगिकरूढौ वा यथा ज्ञानेन वेदितव्यौ॰ मध्यमेषु माध्यमाः। मध्यमेषु द्वितीयमंडलादि
षु नवममंडलावसानेषु॰ त्वमग्ने द्युभिर्गृत्समदप्रभृतयः। यन्नो राजन्कश्यपदृश्यंताः सर्वे माध्यमसंज्ञकाऋषय इति॰ तत्रारण्यके श्रूयते। एषइमंलोक
मितिखंडे। तस्माच्छतर्चिनस्तस्माच्छतर्चिन इत्याचक्षत एतमेव संतं। तस्मात्क्षुद्रसूक्तास्तस्मात्क्षुद्रसूक्ता इत्याचक्षत एतमेव संतं। तस्मान्माध्यमास्त
स्माध्यमा इत्याचक्षत इति तिस्रः संज्ञा वेदितव्याः। अथ मंडलस्था ऋषयः क्रमेणोच्यंते॰ प्रथममंडले शतर्चिनः। द्वितीयमंडले गृत्समदः। तृती
यमंडले विश्वामित्रः। चतुर्थमंडले वामदेवः। पंचममंडले अत्रिः। षष्ठमंडले भरद्वाजः। सप्तममंडले वसिष्ठः। अष्टममंडले प्रगाथाः। नवममंड
ले पावमान्यः। दशममंडले क्षुद्रसूक्ता महासूक्ता इति। तथा स्मर्यते॰ शतर्चिनो माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिर्भरद्वाजो वसिष्ठः
प्रगाथाः पावमान्यः क्षुद्रसूक्ता महासूक्ता इति द्वादशनामका गृह्यप्रसिद्धाः। क्वचित्कथंचिद्विशेषितं ब्रह्मर्षिमहिम्न यमनुक्तगोत्रमांगि
रसं विद्यात्॥ क्वचित्विशेषितं॰ अपिच। क्वचित् अविशेषितं॰ उभौ चेत्पूर्वोत्रापरत्र वा विशिष्टश्चेत्॰ यथा ऋषभस्तोवैश्वामित्राविः परत्र द
र्शनात्। त्रिरस्मैरेणु विश्वामित्रत्वं विशेषितमुदाहरणं॰ अन्यच्च॰ यथा सप्तमं वसिष्ठोपश्यत्॰ विशेषितं तस्य नामगोत्रादेशोनाक्विमंतइति॰ ब्रह्म
र्षिमक्षत्रियमित्यर्थः। तेच हिरण्यस्तूपः कुत्स इत्यादि ब्रह्मर्षिर्ज्ञेयं॰ कथंचित् राजर्षिः पुरुमीळ्हाजमीळ्हौ त्रसदस्यू राजानाविति माभूता
अक्षत्रियं स्त्रियो वर्जयित्वेति॰ गोधा घोषा विश्वावार्याद्याः स्त्रीनामकाः ताः सप्तविंशतिका ऋषिका ब्रह्मवादिन्यः सोमाप्रभृतयः॰ अपिच॰ अनुगोत्रं यथा
त्वमग्ने ऋतुना हिरण्यस्तूप आंगिरसत्वं॰ अपिच॰ इमं वो ब्रह्म कुत्स आंगिरसत्वमित्यादि॰ एवं कुत्सस्य त्रयगोत्रानुक्तेतमांगिरसत्वं॰ उभयोर्नि

हित्यादिना पारिभाषिकं न भवति॰ यस्त्रियमिति व पर्युदासवचनात्॰ पत्नी चास्यांगिरसी शश्वती निरस्य तिस्रादेनत्॰ ऋषिदेवतयोस्तुल्यस्तावकस्यैभावस्य निपतत्वात्॰ स्तुत्ये वै देवता॰ ऋषिः स्तावकः। स्तुतिः प्रयोक्ते
ति तथा चाहि॰ अर्थमिच्छन्नृषिर्देवं यंयमायामिह स्त्विति॰ प्राधान्येन स्तुवन्भक्त्यामनसा देवता... नैरुक्ताः एवपि॰ यत्काम ऋषिर्यस्यां॰ समन्वोपवनतिति॰ देवतासत्वमतिपादनपरकांडे श्राह। ... नास्ति। इने
आ यह्त्यादिषु संवादेषु ९

१२ एवकारकरणं ... (interlinear gloss, partly illegible) ...
= ...

...आत्मन्... ऋषिरित्युच्यमानो दैवतं भवति ... दैवतमित्युक्ते यथा ... ॥

सर्वा॰ टी॰ दर्शनं विद्यात् । ज्ञानीयादित्यर्थः ॥ हिरण्यरूपमाङ्गिरसइतिश्रुतिः । तत्राङ्गिरोगोत्रं सहस्रशीर्षस्य नारायणस्य गोत्रं नास्तिति द्विशेषितं । यथोपदेशमिति सं
५ बंधादित्यर्थः । यस्य वाक्यं स ऋषिः । वाक्यशब्दः सूक्तस्य विज्ञातव्यः । यथाग्निमीळेमधुच्छंदाः । तथा सयोरुपाद् ... भिरित्यादि वा मीगिरा पंचपुत्रा ।
एतत् तदिदं ... मित्यृगिति निदर्शनं । वाक्यशब्दस्य द्वितीयार्थः । कयाशुभासूक्तस्य तृतीयाद्युग्मो मरुतां वाक्यं । तथा ... तत्रा
प्रजो वाक्यमित्यृषेर्निदर्शनं ॥ या तेनोच्यते सा देवता ॥ सूक्तेनोच्यते सा देवतेत्यर्थः । यथाग्निमीळे सूक्तं । तथा त्वमग्ने प्रथमो अंगिरा इत्यु
१ इदं ... भयोर्निदर्शनं । यथा वायवायाहि दर्शतेति वायुर्दैवतं । तथा प्रवीरयाशुचयो वायुर्दैवतमिति निदर्शनं । चित्रं देवानां । सूर्यो नो दिवस्पातिति सूर्यः
... सूर्य दैवतं निदर्शनमितिसर्वत्र ज्ञेयं ॥ यदक्षरपरिमाणं तच्छंदः ॥ एकाक्षरा दैवीगायत्री प्रभृति चतुःशतमुक्तनिपर्यंतान्यक्षरसंख्याछंदो
वेदितव्यं । अथर्षिदैवतछंदसानां संबंधमाह । अर्थेप्सव ऋषयो देवताश्छंदोभिरभ्यधावन् ॥ अर्थयत इति फलं । अन्नधनपुत्रादिमो ... तथा
अर्थमात्माधीनं सत्कर्मकर्तुमिच्छंत इति । तथा चोक्तं । अग्निमीळ इत्यादि । मधुच्छंदः प्रभृतयो ऋषयः । तथा देवता अग्निर्वायुः सूर्य इत्यादि सूक्त
भागिनः । तथा छंदो गायत्र्यादि ... उपायभूतैस्तमुक्तमंत्रैः स्तुतिपूर्वकं प्रार्थनया अभ्यधावन् अरूया आगच्छन् । अहं देवता उपधावामीतिश्रुतिः ।
प्रयोगदर्शनात् । यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुंक्ते तद्दैवतः स मंत्रो भवतीति निरुक्तवचनात् । तथा यादृगिन्वै देवेभ्यः करोति
तादृगिवास्मै देवाः कुर्वंतीति श्रुतिः । इह निश्चयः प्राप्तं तदित्यर्थः । देवतास्वरूपमभ्यधावन्निति प्रसंगाद्देवता आह । तिस्र एव देवताः क्षित्यंतरिक्ष ५
द्युस्थाना अग्निर्वायुः सूर्य इति ॥ तिसृणां देवतानां त्रीणि स्थानानि विदितव्यानि । अग्निः पृथिवीस्थानः । वायुरंतरिक्षस्थानः । सूर्यो द्युस्था
नः । तथा च श्रुतिः । अग्निर्गृहपतिरिति हैक आहुः सोस्य लोकस्य । वायुर्गृहपतिरिति हैक आहुः सोंतरिक्षलोकस्य । असौ वै गृहपतिर्य एष तपतीति
१ प्रयोजनेप्सवश्छंदोभिरुपधावन् ... स्तुतिपूर्वकं प्रार्थितिं ... प्रचेतिदर्शनात् देवतास्वरूपनिर्धारविषयेइमाः ॥ १ =

१ अथैतासां पारमार्थिकमेकत्वमभिधित्सन्नाह । एव ... वा ... पृथक्त्वयात्वर्थे नानात्वपक्षमौपचारिकं यावद्वर्णयति । महानात्मेति सभार्यात्मनो वा वर्णयति । या ... चराचरं ... सर्वस्या ...
... स्थानमादित्यमंडले ... इत्यर्थः ...
तासां ... अग्न्यादीनां ... प्रथम ... इत्यर्थः । तासामेव विभूतत्वमस्तिस्य एवं योगैश्वर्यात् अनेकधामवंतीत्यर्थः । ... एकैकस्या ...
क्रमयोगात्व्याहृती प्रस्तौति । एवं व्याहृतयः प्रोक्ता व्यस्ताः ॥ एवं प्रकारेण व्याहृतयो भूरादयस्त्र्ययो मंत्रा व्यस्ताः पृथगुक्ताः । भूः । भुवः । स्वः । इति
मंत्रक्रमः । भूरग्निर्देवता । भुवो वायुर्देवता । स्वः सूर्यो देवता । इति देवताक्रमः । समस्तानां प्रजापतिः । भूर्भुवः स्वरिति समस्तानां प्रजापतिर्दे
वतेत्यर्थः । भूर्भुवः स्वस्त्रयो वेदा सीति । ततो भूर्भुवः स्वरित्येता वा व्याहृतय इमे त्रयो वेदा इत्याद्यारण्यकश्रुतिः । आर्षं तु प्रजापतिः ॥ तुशब्दा
त् व्याहृतिमंत्राणां प्रजापतिरृषिरित्येति ज्ञेयः ॥ ओंकारः सर्वदैवत्यः ॥ ओमितिशब्दः सर्वदेवताक इत्यर्थः । यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रति
ष्ठितः ... परमेष्ठ्यो वा ॥ ओंकारः परमेष्ठिनं वाभिधत्ते । परमोत्कृष्टस्थाने तिष्ठतीति परमेष्ठी । ब्राह्मो दैव आध्यात्मिकः ॥
ब्रह्मदैवत्यो वा ओंकारः । दैवदैवत्यो वा ओंकारः । अध्यात्मशब्दः शारीरवर्ती प्रत्यगात्माभिन्नो वा ओंकारः । तथा अकार उकारो मकार इति
त्रैकधा समभरत् तदेतदोमितिश्रुतिः । तत्तत्स्थाना अन्यास्तद्विभूतयः ॥ पृथिव्यादिस्थानभेदेन पठ्यमाना अन्या देवतास्तद्विभूतयः । अग्न्यादी
नां विभूतय इत्यर्थः । देवतादिकांडत्रयं वर्तते । आद्यं नैघंटुकं कांडं द्वितीयं नैगमं तथा । तृतीयं दैवतं चेति समाम्नायस्त्रिधा मतः । गौरादिपारपर्यं
तमाद्यं नैघंटुकं प्रमं । जहा ... नैगमं संप्रचक्षते । अग्न्यादिदेवपत्न्यंतं दैवतकांडमुच्यते । इति निरुक्तव्याख्या बोद्धव्या । ततः अ
ग्न्यादिक्षितिस्थानदेवता । वाय्वादयोंतरिक्षदेवता । सूर्यादिद्युस्थाना देवता इति । कर्मपृथक्त्वाद्धि पृथगभिधानस्तुतयो भवंति । कर्मभे
दात्तद्देवतानामत्वाद्धीति निश्चयेनानेकरूपाः संति । वज्रवधसमाश्रितरक्षणवर्षणदहनपवनद्योतनादि व्यापारभेदात् । तथाहकवय
ति ग्रहणाय कालानुजिघृक्षया संप्रदानत्वमनुभवति यद्वा कर्मपृथक्त्वात् जगच्छायारादित्यर्थः । पृथगभिधाननामगुणकीर्तनं चेति । स्तुति
स्तुत्यप्रभावो ... पृथक्स्तुतयो बहुरूपा श्रुतिस्तोत्रे देवता भवंति । एवं तावदौपाधिकं नानात्वमुक्तं । एकैव वा महानात्मा
देवता ॥

२ रूपादिदेवतांतं पतिविभक्तावस्थापनाच. तत्रपराशेषविशेषातीतांशुद्धानभिलप्याविभवावस्थानेकाधिकारसूपानंतादेवेतभेदनाशक्तिताच. यागंतत्रविशेषावस्थापसंसारपात्रा
संपादयतीत्यतइदमुक्तंसूर्यइत्याचक्षतइति ~२~

सर्वा० टी०
६

एकादेवतानातिस्वः तस्यनाममहानात्मेतिश्रूयते. तस्यनाममहद्यशइतिश्रुतिः। आत्मावाइदमेकएवाग्रआसीदिति. सएकः। सयएवंविदित्युपनि
षत्कः सइत्याह. योसौचराचरबीजकंभभूतः सर्वात्माखिललोकनाथस्तस्यच विशेषावस्थानमादित्यमंडलमित्यर्थः। सूर्यइत्याचक्षते।।
सएकइतिवेदविदोवदंति एतंह्येवबह्वृचामहत्युक्थेमीमांसंत इत्यारण्यकश्रुतिः। अथोक्तमर्थमुपपादयति. सहिसर्वभूतानां. सर्वभूतानामे
तदुक्तं. श्रूयते. यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिवा. अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्थितइतितैत्तिरीयोपनिषत्. श्लोकः। आह च. भवद्भूत
भविष्यस्यजंगमस्थावरस्यच. अस्येकेसूर्यमेवैकंप्रभवंप्रलयंविदुः। असतश्चसतश्चैवयोनिरेषाप्रजापतिः। यदक्षरंचाव्ययंचयच्चैतद्ब्रह्म
शाश्वतमिति. इत्याचार्याः। तदुक्तमृषिणासूर्यआत्माजगतस्तस्थुषश्चेति. ऋषिणाकुत्सेनमंत्रेणवानदर्थमुक्तं. चित्रंदेवानामुदगादनीकमि हप
तिमंत्रारण्यके. तद्योहंसोसौयोसौसोहंतदुक्तमृषिणासूर्यआत्मेति. तदुक्तंपुराणे. दिव्यंज्योतिः सलिलपवने. पूरयित्वात्रिलोकीमेकीभूतं
पुनरपिचतत्सारमादायगोभिः। अंतर्लीनोवसतिवसुधोनसूतंसूर्यमित्थंतत्त्वप्राणेत्वमितिजगतोप्राणएवसूर्यआत्मा. जगतोजंगमस्य
तस्थुषस्थावरस्यचेति. नाद्वितीयोन्यादेवताः। देवताकांडतत्रमंत्रवर्तिन्यः सूर्यव्यतिरिक्ताः. अग्निर्वायव्वाद्यास्तास्तस्य। तस्यसूर्यस्यवि
भूतयइत्यर्थः। तदप्येतदृचोक्तं। तदितिवाक्योपसन्यासएतदर्थमन्त्रैवस्पष्टमुक्तं. कथमित्याह. इंद्रंमित्रंवरुणमग्निमाहुरिति. यथा
भिधानंत्वनुक्रमिष्यामः। सर्वैरेवमंत्रगतदेवताभिधानैःसएवाभिध्यायितइत्यर्थः। उपसंहारमाह. दित्याह. रित्युक्तं. इहच. रससिद्धयथानाम्ना ६
भातिहिसुवर्णतः. एवमर्थोप्यत्रचास्पष्टइतिवेदेचबुध्यते. सत्यवेवागन्वाः स्पष्टोः त्वयत्तानंमहर्षिभिर्ऋगुदाहरणं. तैर्देवतैकत्वंप्रतिपादनेनोक्तं।
यद्यस्याभिधानमिंद्रादिप्रभवंतेनैवसूक्तभाजवाक्भाजहविर्भाजनिपातभाजोवा. ययश्चोपलभ्यतइति. यद्वायथाभिधानंतेकेनसर्वशब्दे

८ चित्रंआमकप्रकारं. लोलितादित्यरत्नमवायबोधनीयं. उदगात्. उद्गच्छति. अनीकंसमूहोदेवतानांरूपोदेवानामितिसंबंधः। रश्मिसमूहरूपमित्यर्थः। एवंवेदश्माकेविश्वेदेवादितिश्रुतेः।
चक्षुर्मित्रस्य [illegible]। मित्रादिप्रपंचप्रदर्शनार्थं. अप्रा। आपूरयति. द्यावापृथिव्यावंतरिक्षंचसर्वगतत्वात्. सूर्यआत्मेत्युक्तार्थः. ८ ॥४ सर्वैरेवमंत्रगतदेवताभिधानैः सएवाभिधीयतइत्यर्थः
एवंपश्यतःसम्यग्दर्शनवतोवेदार्थविवस्वाध्यायाद्देवपरमदेवताप्राप्तिर्भवतीति. तदुक्तं. स्वाध्यायमेवाधिकृत्य. सब्रह्मामतमलंनमोतिः मरसतोधूकं [illegible] निरुक्तमपिवक्ष्यामहे इ
विकप्रतिपादनेनैवोक्तंदेवैकं।४~ ~~

८ गायत्र्यादीन्येकविंशतेरपिचतुरुत्तराण्येवेदचतुर्दशाववक्ष्यंते. तत्राद्यंसप्तवर्गंसविकारंवक्ष्यत्युत्तरस्तूच्यते. तत्रचपादविशेषाभावाद्विशेषसंज्ञाभावोसरसंख्यावैशाच्याश्च[illegible]
~यत्नः कर्त्तव्यः। तत्रातिजगतीद्विपंचाशदक्षराणीत्यादि ८~
~२ इयमपिपरिभाषैवराज्ञांदानस्तुतेरनुच्चारणार्थेइत्युक्तेः।२~

नत्रिभिरग्निर्वायुःसूर्यैरूपदेशमंत्रैः क्रमेणप्रतिसूक्तमनुक्रमिष्यामः। प्रायेणेंद्रमरुतः। प्रायेणबाहुल्येननिपातभाजोभवंति. इंद्रशब्देनोच्यतेतद्धिम
रुद्देवतास्तुसंतइत्यर्थः। तथाचश्रुतिः। अपिहयद्येंद्रमेवातर्दुध्र्यछंदः शस्यतेतद्धिसर्वंमरुत्वतीयंभवतीषतिब्राह्मणं. मरुद्वितीयत्राणार्थमंतरेणापि
वचनं।। राज्ञांचदानस्तुतयः। प्रायेणेंद्रइत्यनुवर्त्तते. व्रतसंबंधिनोराजानः चक्रवर्तिइद्धमरुद्धवधारणे. ततः विभिंदोर्दानंतुद्रावेत्यादौविभिं
दादीनांराज्ञत्वंविधीयते. अनुच्चारणार्थएंद्रमरुत्सूक्तइत्यर्थः।२।। द्वितीयःखंडः।। अथछंदांसि। अथेत्यधिकारार्थः। छंदांस्यधिकृतानिवेदितं
व्यानिक्रियंतीतिवा। गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तिस्त्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतयश्चेतुइत्येतानिचतुर्दशछं
दांसिगायत्र्याद्यतिधृतिपर्यंतानिशाकलसंहितायांपठ्यंते. एषएवक्रमः। कृत्यादीनांयथोक्तकारणमुपदिशति. कृतिः प्रकृतिराकृतिर्वि
कृतिः संस्कृतिरभिकृतिरुत्कृतिरितिसप्तछंदांसिउच्यते. कृतिः प्रकृतिराकृतिर्विकृतिः संस्कृतिस्तथा. षष्ठीचाभिकृतिर्नामसप्तम्युत्कृति
रुच्यतेइतिप्रातिशाख्ये. तथापरिभाषायां। कृत्यादीनांसप्तछंदसांनिगदसूत्रमंत्राणामनुष्ठानमुपदिशति. चतुर्विंशत्यक्षरादीनिचतुरुत्त
राणि. गायत्रीचतुर्विंशत्यक्षरातदादीनिक्रमेणोत्तरोत्तरश्चत्वारिचतुरक्षराण्युच्यंते. उक्तंच. चतुर्विंशत्यक्षरागायत्री. २४ अष्टाविंशत्यक्षरा
उष्णिक् २८ द्वात्रिंशदक्षराअनुष्टुप् ३२ षट्त्रिंशदक्षराबृहती ३६ चत्वारिंशदक्षरापंक्तिः। ४० चतुश्चत्वारिंशदक्षरात्रिष्टुप् ४४ अष्टाच
त्वारिंशदक्षराजगती ४८ एतानिसप्तछंदांसिगायत्र्यादिजगत्यंतान्यार्षसंज्ञकानि. अथातिजगत्यादिक्रमोच्यते. द्विपंचाशदक्षरात्रति
जगती ५२ षट्पंचाशदक्षराशक्वरी ५६ षष्ट्यक्षराअतिशक्वरी ६० चतुःषष्ट्यक्षराअष्टी ६४ अष्टषष्ट्यक्षराअत्यष्टी ६८ द्विसप्तत्यक्षर
धृतिः ७२ षट्सप्तत्यक्षराअतिधृतिः ७६ तत्रातिजगत्याद्यतिधृत्यंतान्यार्षसंज्ञकानि. एतानिसप्तछंदांस्यतिशब्दएकांतरंछंदः पिंगलोपि
पठ्यंते. पिंगलसूत्राण्युच्यंते. धृत्याद्याअष्टिशक्वरीजगत्यः। पृथक्पृथक्पूर्वतएतान्येवेषां. द्वितीयंद्वितीयमतितः। इतिसूत्राण्युदाहरणानि.

स॰वॉदी॰
१

अथकृत्यादीनां सप्तछंदसामक्षरसंख्यामाह॰ अशीत्यक्षराकृतिः ८० चतुरशीत्यक्षराप्रकृतिः ८४ अष्टाशीत्यक्षराआकृतिः ८८ द्विनवत्यक्षरावि
कृतिः ९२ षण्णवत्यक्षरासंकृतिः ९६ शताक्षराअभिकृतिः १०० चतुःशताक्षराउत्कृतिः १०४ तत्रप्रातिशाख्योक्तं॰ अशीतिश्चतुरक्षरादीति
रक्षाशीतिर्द्विनवतिः। षण्णवतिः शतं पूर्णमुत्तमा तु चतुःशतं॰ एतानि सप्तछंदांस्यार्षसंज्ञकानि भवंति॰ कृत्यादीनामुपसर्गयोगेन द्वैधं॰ श्रूयते॰ चतुः
शतमुत्कृतिः। चतुरश्चतुरस्त्वजेद्युत्कृतेः। तान्यभिसंख्याप्रेक्ष्य॰ कृतिः। प्रकृत्याचोपसर्गवर्जितकृतिश्चत्वारिंशत्त्रैपिंगलेन व्याख्याते॰ एतानि गाय
त्र्यादीन्येकविंशतिछंदांस्युत्कृत्यंतानि यथाक्रमेण यथासंख्येन वेदितव्यानि॰ अथ छंदः प्रशंसा। छंदो नारायणश्छंदः पुरुष इति श्रुतिः। मा
यत्रं छंदस्य आत्मस्वरूपमिति तैत्तिरीयोपनिषत्॰ बृहतीसहस्रसंपन्नस्य षट्त्रिंशतमक्षराणां सहस्राणि भवंति तावंति पुरुषायुषेति प्रशंसा। अ
पि च॰ तस्यौष्णिग्लोमानि त्वग्गायत्री त्रिष्टुप्मांसमनुष्टुप्स्नावान्यस्थि जगती पंक्तिर्मज्जा प्राणो बृहतीति छंदोपासनारण्यकश्रुतिः। तथा गायत्री
त्रिष्टुप्जगत्यः संबाध्ये कुर्वतेति सप्तछंदांसि जगत्यंतानि त्रिष्टुप्संबाध्या प्रत्येकं छंदसां फलप्रशंसा॰ ब्राह्मणश्रुतिः। छंदांसि छादनादिति निरुक्ते।
छंदः। गायत्री दैव्येकं॰ आसुरी पंचदश॰ प्राजापत्याष्टेत्यादिपिंगलव्याख्या॰ इत्यादिनानाभेदनानारूपनानाभिधानसप्तछंदांस्येवमेव॰ अ
थ गायत्र्यादिसप्तछंदसां देवताभिधीयते॰ तथा च श्रुतिः। अग्नेर्गायत्र्यभवत्सयुग्वेत्यादिसप्तछंदसां देवतानिदर्शनानि॰ तथा स्वरवर्णगोत्राश्च सप्त
छंदसां पिंगलेनोक्तं॰ अथ छंदोविशेषमाह॰ ऊनाधिकेनैकेनानिचृद्भुरिजौ ॥ गायत्र्याद्युत्कृत्यंतान्येकेनाक्षरेणोनानि॰ तथा चैकेनाक्षरेणाधिकं॰ निचृद्भवति॰
भुरिग्भवति॰ यथाक्रमेण निचृद्भुरिक्च वेदितव्ये॰ ततः निचृदुदाहरणं॰ वरिवोधातमो भवेति त्रयोविंशत्यक्षरा निचृद्गायत्री भवति॰ अपि च॰ भुरिक्उदाहरणं॰ वि
द्मा सा विदुरः॰ एवं इति पंचविंशत्यक्षरा भुरिग्गायत्री भवति॰ द्वाभ्यां विराट्स्वराजौ॰ गायत्र्याद्युत्कृत्यंतानि द्वाभ्यामक्षराभ्यामूनानि विराड्गायत्री भवति॰
अपि च॰ द्वाभ्यामक्षरेणाधिकं स्वराड्गायत्री भवति॰ अथ विराड्गायत्र्युदाहरणं॰ जो षास्तवितयस्यतेहर इत्येकषड्विंशत्यक्षरा स्वराड्गाय १
त्रीज्ञेया॰ एवमेवोष्णिगाद्युत्कृत्यंतानि निचृद्भुरिक्तथा विराट्स्वराट्सर्वत्र छंदसां निदर्शनं॰ तदभियुक्तं॰ श्लोकः। यास्त्वक्षरैश्चिन्नबन्ध्याः पगायत्र्यो
हीनतां गताः। अक्षरैर्बहुभिस्ताश्च गायत्र्य इति धारयेदिति॰ ॥ पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभावान्व्यूहेत॰ क्षैप्रसंयोगा यकारवकारसं

—स्वराड्वत्स्यपितर्तनपूतमित्यादि—
३ ए॰ भुक्त्वद्द्वसस्येइत्यक द्वाविंशत्यक्षराविराड्गायत्रीज्ञेया॰
तथा॰ स्वराड्गायत्र्युदाहरणं—
युवाकु हीति च द्वयं हि त्रिभिरष्टूनाविराजेव शौनकाचार्यवचनात्॰ चतुर्भिरपि मदिस्यात्॰
यथानंतरम्पूर्णाभावात्॰ तथा च॰

५ एवंतावद्द्वितीयोवर्गः सोत्र सकलो वा व्याप्तः —एकाक्षरीभावाः खल्वपि—

योगः। पादपूरणार्थं व्यूहेत॰ क्षैप्रं विभजेदित्यर्थः। पादः। इत्यादिपूरण इति ह सूत्रे पिंगलनिदर्शनं॰ तत्र क्षैप्राक्षरसंयोगः प्रश्लिष्टाभिनिहितादिसंधयः। प्रा
तिशाख्योपदिष्टाः। समाक्षरे संस्थान इत्येवमादिना॰ अथाभिनिहितः संधिरिति च॰ एष्वेतं व्यूहः कर्तव्यः। यथा तत्सवितुर्वरेण्यमिति यकारं व्यूहेत॰ इ॥
न्नः सर्पिरासुतिरित्यादौ वकारं व्यूहेत्॰ एतायामोपगव्यंत इंद्रमित्यैकारं व्यूहेत्॰ उत्तरयोर्व्यूहो न कर्तव्यः। अग्नेस्वयद्यस्तनाग हृदयं च द्वयोरक्
स्यैवं व्यूहेत॰ पादपूरणसिद्धेर्द्वितीयस्योहो न कर्तव्यः। इत्येकाक्षरीभावस्योदाहरणं॰ न वा एकेनाक्षरेण छंदांसि वियंति न द्वाभ्यामिति॰ आद्या
तु सप्तवर्गपादविशेषास्तज्ज्ञा विशेषास्ताननुक्रमं तएवोदाहरिष्यामः॥ गायत्र्यादिजगत्यंते पादविशेषात् तथा पादा अक्षरादिसंज्ञा भेदाविशे
षाश्च भवंति॰ यथा पदपंक्त्यादयो ग्नेतमद्येति पादसंज्ञाश्च भवंति॰ यथा पंचपदा पंक्तिः प्रसिद्धिः तत्र मन्येत्वा यज्ञियमिति चतुष्पादा विराट्पंक्तिभेदः सं
ज्ञा भवंति॰ एतानि सप्तछंदांसि॰ अनुक्रमं तएवोदाहरिष्यामो दर्शयिष्याम इत्यर्थः। समुद्रमार्थः॰ विराड्रूपा विराट्स्थानाश्च बहूना अपि त्रिष्टुभ
एवेत्युद्दिष्टः त्रिष्टुप्चतुश्चत्वारिंशदक्षराप्येवमाप्तबहुभिरक्षरैरूनाहीनाविराड्रूपा विराट्स्थानाश्चेति त्रिष्टुब्विधिकारोक्तास्त्रिष्टुभ एवं स्युः।
तत्र विराड्रूपा विराट्स्थानाश्च पादसंज्ञा विशेषमाह॰ उक्तं परिभाषोदाहरणं॰ नवकौ वैराजत्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्
स्थानेकादशिनस्त्रयो दशकश्च विराड्रूपेति॰ उभयोः संतत्यमुदाहरणं तंत्रेण॰ ततः विराट्स्थाना नवकौ वैराजस्त्रैष्टुभश्चेत्युदाहरणं॰ स्वस्तिन इं
द्रो वृद्धश्रवा इति प्रथमः पक्षः। अपि च॰ द्वौ वा विकल्पेन द्वितीयोदाहरणं॰ वैराजौ नवकस्त्रैष्टुभश्चेति श्रुधी हव मिंद्र मा रिषण्य इति विराट्स्था
ना द्वितीयः पक्षः। तथा विराड्रूपैकादशिनस्त्रयो दशकश्चेत्या नो रु वण्यु भो शि जोकु वध्या इत्युदाहरणं॰ तत्रैकादशत्वारिंशतः॰ चत्वारिंशत॰ ए
कचत्वारिंशत॰ इति पंचभिश्चतुर्भिस्त्रिभिरक्षरैरूना॰ अथ चत्रिष्टुप्त्वे एवत्वर्थः। किमर्थमिदमुच्यते॰ असत्यस्मिन्यो मे प्रेकोन चत्वारिंश
तोनिचृत्पंक्तित्वं॰ चत्वारिंशतोक्तित्वं॰ एकचत्वारिंशतो भुरिक्पंक्तित्वं च स्यादित्यदोषः। उक्तं च॰ अक्षराण्येव सर्वत्र निमित्तं बलवत्तरं॰ विधाद्दि
प्रतिपन्नानां पादव्याक्षरैर्वचामिति शौनकवचनात्॰ अनयो विराड्रूपा विराट्स्थानयोर्विप्रतिपन्नानां पादत्वात्॰ शुष्मिंतुतइत्यादिषु पंक्तित

६ समर्पणेहितइच्छमाणस्येवसुरवावबोधनार्थंक्रियते ८

१ परिभाषा लिख्यते विधिवाक्येतर परिभाषा कथं अतरत्वहत्वसद परिभाषया संव्यवहार दर्शनात् तत्त्व तेषु पादविशेषेषु द्वाराद्विष्टया संख्येन वेदादय संज्ञा भेदः यः। १ इत्यादि वेदाशेषात्मतेऽयम् २
७ तत्रपादत्वेऽपि संख्यानादि अधुना वृत्तस्य तदेदवृद्धि विदुः ७

सर्वा० ६१० निरत्यर्थमिदं वचनं तत्राद्यसप्तके गायत्र्यादि जगत्यंतेव क्ष्यमाणं वेदितव्यं नोत्तरसप्तके वक्तुं शक्यते तत्रोपयोगो नास्ति तत्रातिजगत्यादि तिष्ठतिरि
८ त्तं तेषु यथाध्ययनपारं पर्येणाक्षरैः परिद्व्यवस्थेति सिद्धं वेदितव्यं अनादेशे अष्टाक्षराः पादाः इति रकाचार्यपारं पर्यपरे शाध्यापनं कर्तव्यमित्यर्थः ५ नं
तं दशैकादशद्वादशपदक्षराणां विराट्त्रिष्टुप्जगतादि संज्ञाः ४ परिभाषा पर्याय पाद संज्ञा क्रमेणोक्ताः। दशाक्षरस्य विराट् संज्ञाः एकादशा
क्षरस्य त्रिष्टुप् संज्ञाः द्वादशाक्षरस्य जगती संज्ञा इति अत्र पिंगले वोक्तं विराजो दिशः त्रिष्टुभो रुद्राः जगत्या आदित्या इति निदर्शनं तथा च श्रु
तिः दशाक्षरा विराट् एकादशाक्षरा त्रिष्टुप् द्वादशाक्षरा जगतीति यथोपदेशेन पादाभिप्रायेन वेदितव्यं अनादेशे अष्टाक्षराः पादाः ॥ अक्षर प्रवेतन्यानि
संख्यया वृक्तोपदा अष्टाक्षरा भवंति तत्रैव दृष्टं सुपस्थितं बोद्धव्यं यत्र पादाक्षर संख्या नोच्यते तत्र सर्वत्रानादेशे अष्टाक्षराः पादाः इत्यर्थः अष्टाक्षरा
गायत्री इति श्रुतिः गायत्र्याश्च सप्त इति पिंगलनिदर्शनं चतुष्पदाश्चर्चः ॥ अनादेश इत्येव ऋचः चतुर्भिः पादैर्युक्ता भवंति तत्र तृतीयमनुष्टुप् च
तुष्पदाश्चर्च इत्यनादेशादित्यर्थः ७ तृतीयः खंडः १ प्रथमं छंदस्त्रिपदा गायत्री एकविंशति छंदसामाद्यत्वं गायत्री छंदो विहितं तत्रस
गर्वद्गीतावाक्यं गायत्री छंदसामहमित्युक्तं प्रधानभूतं गायत्रीगायते स्तुतिकर्मणः इति निरुक्ते त्रिपदा पादत्रययुक्ता गायत्री साष्टाक्षरैरनादेशात्त्रिभिः पा
दैर्वर्तते प्रायुष्णिहो गायत्री प्रथमभेदः तस्योदाहरणं तत्सवितुर्वरेण्यं ८ स्मूहः भर्गो देवस्य धीमहि ८ धियो यो नः प्रचोदयात् ८ इत्यादि चतुर्विंशत्य
क्षरा गायत्रीसंज्ञा ज्ञेया सा चतुर्विंशत्यक्षरा तिस्रो गायत्री मिलितत्वात् आर्षगायत्री संज्ञा ज्ञातव्या तिस्रो गायत्री रूपमाह दैवीगायत्री आसुरीगा
यत्री प्राजापत्या गायत्रीति तिस्रो गायत्री वेदितव्या एवं प्रकारेणोष्णिहाद्युत्कृतान्येकविंशति छंदसामार्षसंज्ञानीत्यर्थः अथ तिस्रो गायत्र्युदा
हरणं तत्र दैवी गायत्र्येकाक्षरा सवितुर्वरेण्यं भर्गो देवस्य धीमही त्यासुरी गायत्री पंचदशाक्षरा धियो यो नः प्रचोदयादिति प्राजापत्या गायत्र्य

प्रथमाद्य प्रधानं वा छंदस्त्रिपदा गायत्री त्रिभिरष्टाक्षरैः पादैर्वर्तते इत्यधिकाराश्चाय मग्निमीळे इत्यादिषु ६

ष्टाक्षराश्चेतिति तिस्रो गायत्र्युदाहरणानि एवमेवोष्णिहाद्युत्कृत्यंतान्यार्षसंज्ञा सर्वत्र प्राक् यजुषामार्षं इति पिंगलः अथ गायत्री द्वितीयोदाहरणं अग्निमीळे पुरो
हितं ८ यज्ञ० जं० ८ होता० मं० ८ अथ गायत्री द्वितीयभेदः पंचकाश्चत्वारः षट्कश्चैकश्चतुर्थश्च तुष्कोवा पदपंक्तिः पंचाक्षराश्चत्वारः पादाः षडक्षरश्चैकः श्चतुर्थश्च गुरु
क्षरो विकल्पेन सा भुरिक् पदपंक्तिर्गायत्री नाम तस्योदाहरणं अग्ने तमद्य ८ अश्वं मै ५ क्रतुं न भद्रं ५ हृदिस्पृशं ४ ऋ० हैः ६ इति शौनकमते अग्ने तमद्येति पदपंक्ति
गायत्री नाम आर्च्व पिंगलमते अग्ने तमद्येति नागी गायत्री नाम भेदः ॥ हीनवकौ षट्कश्च नागीति सूत्रं तस्य द्वितीयोदाहरणं अग्ने मैः ९ क्रतुं न भद्रं ९ ऋ० हैः ६
आद्यौ द्वौ पादौ नवाक्षरौ तृतीयः पादः षडक्षरश्च नागी गायत्री पिंगलमतेनासिद्धं पुनः पदपंक्तिरुदाहरणानि अधा ह्यग्ने स्मूहः ५ क्रतोर्भद्रस्य ५ दक्षस्य साधोः ५
रथीर्ऋतस्य ५ बृहतो बभूथ ५ पुनः एभिर्नो अर्कैः ५ भवा नो अर्वाङ् ५ स्वार्ण ज्योतिः ५ स्मूहः अग्ने विश्वेभिः ५ सुमना अनीकैः ५ पुनः आभिष्टे अद्य ५ गीर्भिर्गृणंतः ५
अग्ने दाशेम ५ प्र ते दिवो न ५ स्तनयंति शुष्माः ६ पुनः घृतं न पूतं ५ तनूररेपाः ५ शुचि हिरण्यं ५ तत्ते रुक्मो न ५ रोचत स्वधावः ६ तव स्वादिष्ठेयं विनाग्ने तमद्ये
त्यादेताः संचर्चाः पदपंक्ति भुरिक् गायत्री तथा पदपंक्तिः स्वराट् गायत्री यथाक्रमेण ज्ञेया पदपंक्तिः पंचेति पिंगलः अथ गायत्री तृतीयभेदः षट्सप्तैका
दशा उष्णिग्गर्भा प्रथमपादः षडक्षरः द्वितीयपादः सप्ताक्षरः तृतीयपाद एकादशाक्षरश्च सोष्णिग्गर्भा गायत्री नाम तस्योदाहरणं तामे अश्व्यानां
स्मूहः ६ हरीणां नितोशना ७ उतो नु स्मू० सा ११ स्मूहः अथ गायत्री चतुर्थभेदः त्रयः सप्तकाः पादनिचृत् क्रमेण द्वितीयः पादाः सप्ताक्षराः सा पादनि
चृत् गायत्री नाम तस्योदाहरणं युवाकु हि शचीनां ७ युवा० नां ७ भूयाम् आं ७ पुनः अभीषुणः सखीनां ७ अविता ज० णो ७ शतं भ० भिः ७ कस्ति त्रिपा
दपिभिः सा पादनिचृदिति द्वे सूत्रे पिंगलः अथ गायत्री पंचम भेदः मध्यमः षट्कश्चेदतिनिचृत् आद्यौ तौ पादौ सप्ताक्षरौ मध्यमः पादः षडक्षरश्च

शौनकानार्षेवचनात् २

सर्वा॰ प॰ टी॰ सा॰तिनिचृद्गायत्रीनाम॰ तस्योदाहरणं॰ युवं तमंपुरूणां ७ स्तो॰ विः६ राजे॰ तो ७। तत्र कारिका॰ आद्यपादास्तृतीयश्च सप्तकौ मध्यमो यदि॰ षळक्षरः सापि
ज्ञेया गायत्र्यपि निचृदिति॰ अथ गायत्र्याः षष्ठभेदः। ६ अकश्चेद्यवमध्या॥ आद्यंतौ पादौ सप्ताक्षरौ॰ मध्यमपादो दशाक्षरश्च॰ सा यवमध्या गायत्री नाम॰ तस्यो
८ दाहरणं॰ ससुन्वे यो वसूनां ७ यो रायामानेता य इळानां १० सोमो॰ तीनां ७ कारिका। आद्यौ पादौ तृतीयश्च सप्तकौ मध्यमो यदि॰ दशाक्षरः सा गायत्री यवमध्या
प्रकीर्तिता। विपरीता यवमध्येति पिंगलः। अथ गायत्र्याः सप्तमभेदः॥ यस्यास्तु षट् सप्तकाः स्युः काः सा वर्धमाना॥ प्रथमः पादः षळक्षरः। द्वितीयः
पादः सप्ताक्षरः। तृतीयपादोऽष्टाक्षरश्च॰ सा वर्धमाना गायत्री नाम॰ तस्योदाहरणं॰ ईशाना वार्याणां ६ क्षयंतीश्चर्षणीनां ७ अपो॰ जं ८ पुनः त्वमग्ने
यज्ञानां ६ होता वि॰ हितः ७ देवेभि॰ ने ८ षट्सप्तकाष्टकैर्वर्धमानेति पिंगलः। एकाक्षरवृध्याऽत्यर्थः। अथ गायत्र्या अष्टमभेदः। विपरीता प्रतिष्ठा॥
प्रथमपादोऽष्टाक्षरः। द्वितीय॰ सप्ताक्ष॰ तृती॰ षळक्ष॰ सा प्रतिष्ठा गायत्री नाम॰ तस्योदाहरणं॰ आपः पृणीत भेषजं ८ वरू॰ कम ७ ज्योक्च॰ शे ६
पुनः त्वमग्ने व्रतपा असि ८ देव॰ र्त्येष्वा ७ त्वं य॰ ज्ञेष्वीड्यः। यूहः ६ विपरीता प्रतिष्ठेति पिंगलः। अथ गायत्र्या नवमभेदः। द्वौ षट्कौ सप्तकश्च
ऋसीयसी॥ आद्यौ पादौ षळक्षरौ। तृतीयपादः सप्ताक्षरश्च। सा ऋसीयसी गायत्री नाम॰ तस्योदाहरणं॰ प्रेष्ठमु प्रियाणां ६ स्तुह्या सा वातिथिं ६
अग्निं रथानां यमं ७ पुनः इंद्रः सहस्रदाव्नां ७ वरु॰ नाः ६ ऋतुर्भव॰ क्थ्यः ६ विकल्पेन पादव्यत्यासेन ऋसीयसी गायत्री ज्ञेया॰ अथ पिंगलानुसारेण
गायत्री दशभेदा उच्यते॰ षट्कसप्तकयोर्मध्ये ह्यष्टावति पादा निचृत्॰ प्रथमः पादः षळक्षरः। द्वितीयपादोऽष्टाक्षरः। तृतीयपादः सप्ताक्षरश्च॰ सा नि
पादनिचृद्गायत्री नाम॰ २ तस्योदाहरणं। प्रेष्ठं वो अतिथिं। ६ स्तुषे॰ प्रियं ८ अग्निं॰ थं ७ इदमुदाहरणं परिभाषानुक्रमणं नास्ति। पिंगलदर्श
नमित्यर्थः। इति पादविभागेन दशगायत्र्य ईरिताः इति ४ चतुर्थः खंडः॥ द्वितीयमुष्णिक्त्रिपदा त्वोष्ट्र श्। द्वितीयं भेदं आर्षी उष्णिक नाम
धिकृतं प्रागनुष्टुप्शोधिकारात्॰ सा त्रिपदा वर्तते॰ इति उष्णिक त्रिप्रथमभेदः। आद्यौ पादावष्टाक्षरौ॰ तृतीयपादो द्वादशाक्षरश्च॥

सोष्णिकनाम॰ तस्योदाहरणं॰ पदं इं सोमपा तमः ८ मदः॰ ऽति ८ येनाहं॰ महेव्यूहः १२ पुनः यस्यत्यच्छंबरं मदे ८ दिवोदासाय रंधयः ८ अयं स सो॰ पिब १२ कारिका
आद्यावष्टाक्षरौ पादौ तृतीयो द्वादशाक्षर इति। उष्णिग्गायत्रौ जागतश्चेति पिंगलः। अथोष्णिक् द्वितीयभेदः। आद्यश्चेत्पुर उष्णिक्। आद्यपादो द्वाद
शाक्षरः। द्वितीयतृतीयावनादेशावष्टाक्षरौ सा पुरउष्णिक् नाम। तस्योदाहरणं। तच्चक्षुर्दे॰ त १२ पश्येम॰ ८ जीवेम॰ ८ पुनः ये अंजिषु॰ नवः १२
स्त्रक्ष॰ यु ८ श्रायाः॰ ८ कारिका। आद्यो द्वादशकः पादः अन्यावष्टाक्षरौ यदि। पुर उष्णिगिति प्रोक्ता तच्चक्षुरित्युदाहृतिः। पुर उष्णिक् पुर इति
पिंगलः। अथोष्णिक् तृतीयभेदः। मध्यमश्चेत्ककुप्। प्रथमतृतीयपादावनादेशावष्टाक्षरौ। द्वितीयपादो द्वादशाक्षरश्च। सा ककुबुष्णि
क् नाम। तस्योदाहरणं। सुदेवः समहासति ८ सुवीरो॰ र्त्यः॰ यूहः १२ यंत्रायं॰ ते ८ पुनः युष्माकं स्मा रथाँ अनु ८ मुदे॰ नवः १२ वृष्णी॰ वं ८
कारिका। द्वादशाक्षरको मध्ये त्वष्टकावभितो यदि। सोष्णिक् ककुबिति प्रोक्ता सुदेवः समहासति। ककुम्मध्ये चेदंत इति पिंगलः। अथोष्णिक्
चतुर्थभेदः॥ त्रयोऽष्टजागतचतुष्काः ककुम्न्यंकुशिरा॥ प्रथमपाद एकादशाक्षरः। द्वितीयपादो द्वादशाक्षरः। तृतीयपादश्चतुरक्षरश्च।
सा ककुम्न्यंकुशिरोष्णिक् नाम॰ तस्योदाहरणं। दधिरेक्णस्तन्वे दधिर्वसु ११ दधिर्वा॰ नं १२ नूनमथ ४ कारिका॰ एकादशाक्षरस्त्वाद्यो
द्वितीयो द्वादशाक्षरः। चतुष्कोऽप्यंति यस्याः सा ककुम्न्यंकुशिरा मता॥ अथोष्णिक् पंचमभेदः। एकादशिनौ परः षट्कस्तनुशिरा॰॥
आद्यौ द्वौ पादावेकादशाक्षरौ। तृतीयपादः षडक्षरश्च॰ सा तनुशिरोष्णिक् नाम॰ तस्योदाहरणं। प्रयाधो षेण्म नाणे॰ ११ यथा वा॰
११ प्रेषयुर्न विद्वान् ६ कारिका। एकादशाक्षरावाद्यौ तृतीयश्च षळक्षरः। यस्याः सैषा तनुशिरा प्रयाधोषेत्युदाहृतिः। प्रयात
ऽशिरनामेति प्रातिशाख्ये॥ अथोष्णिक् षष्ठभेदः॥ मध्ये चेत्पिपीलिकमध्या॥ मध्यमतृतीयपादावेकादशाक्षरौ। मध्यमपा
दः षळक्षरः। सा पिपीलिकमध्योष्णिक् नाम। तस्योदाहरणं। हरीयस्य सुयुजा विव्रता वेः ११ अर्वंतानु शेपा ६ उभा र॰ दंत ११ पुनः रज्ञे
यश्चके सुहना यरस्मै ११ हिरीमशो॰ मन्द ६ अरुत॰ अः ११ कारिका। एकादशाक्षरः षट्कः पुनरेकादशाक्षरः। सा पिपीलिकमध्या

श्चाहरीयसेत्युदाहृतिः। त्रिपाद्णिष्टमध्या पिपीलिकमध्येति पिंगलः। वृज्रंयश्चैकस्त्रराबुष्णिक् ज्ञेया॥ अथोष्णिक्सप्तभेदः॥ आद्यः पंचकस्त्रयोष्टकाः अ
नुष्टुब्गर्भा॥ प्रथमपादः पंचाक्षरः। शेषास्त्रयः पादा अष्टाक्षराः। सानुष्टुब्गर्भोष्णिक्नाम। तस्योदाहरणं। पितुं नु स्तोषं ५ महो धर्मा॰ टी॰ ८ यस्यात्रि
तो व्योजसा ८ वृहः। वृत्रं विपर्वमर्दयत् ८ कारिका। आद्यः पंचाक्षरः पादस्त्रयस्त्वष्टाक्षराः परे। अनुष्टुब्गर्भेति सा प्रोक्ता पितुं नु स्तोषमित्यृचा।
अनुष्टुब्गर्भा गेनाभेषा सागस्त्येस्मि पितुन्विति प्रातिशाख्ये। अथोष्णिगष्टमभेदः॥ चतुःसप्तकोष्णिगेव॥ चत्वारः पादाः क्रमेण सप्ताक्षराः सोष्णि
क्भेदाख्या तस्योदाहरणं॥ नदं व ओदतीनां ७ नदं योयुव॰ ७ पतिं वो अ॰ ७ वृहः। धेनूनामि॰ ७ पुनः। मंसीमहि त्वा वयं ७ अस्माकं॰ घन ७ मतीनां॰
नं ७ विप्राणां चाधवं ७ मंसीमहीति निचृदुष्णिक् ज्ञेया। नदं मंसीमहीति निचृदिति प्रातिशाख्ये। कारिका। अनुष्टुप्पादसाम्येन गुरुवादाद्यमुष्णिहः।
रहस्यब्राह्मणेप्येवं सम्यगाम्नायते खलु। तत्र चोष्णिहरुद्दिष्टाः सम्यक्पादाति भागतः। पादैश्चतुर्भिः सैवोक्तानुष्टुब्गुणसंभृता। नदं व ओदती
नामित्युष्णिगक्षरैर्भवत्यनुष्टुप्पादैरमुष्टुबुष्णिगिति श्रुतिः। चतुष्पाद्विभिरिति पिंगलः। कारिका। चतुर्भिः सप्तकैः पादैर्युक्ताप्युष्णिगिहो
च्यते। नदं व ओदतीनां तु मंसीमहीत्युदाहृतिः॥ ५॥ पंचमः खंडः। तृतीयमनुष्टुप्। आदह स्वधामित्यादावनुष्टुबधिकारः। चतुर्भिः पादैर्युक्ता अनादेशेऽष्टा
क्षराश्चतुष्पादाश्च ऋचेत्यनुवर्ततइति॥ अथानुष्टुभ्प्रथमभेदः। तस्योदाहरणं। गायंति त्वा गायत्रिणः ८ अर्चं॰ णः ८ ब्र॰ तो ८ उद्वं॰ मिरे ८ पुनः
उरो ष्टद्रराधसः ८ विश्वी॰ कृतो ८ अथा॰ णे ८ द्युम्नासु॰ ८ कारिका। चतुर्भिरष्टकैः पादैर्युक्ताऽनुष्टुबिहोच्यते। गायंति त्वा गायत्रिण उरो ष्टइत्यु
दाहृतिः। अनुष्टुब्गायत्रैरिति पिंगलः॥ अथानुष्टुब्द्वितीयभेदः॥ पंचपंचकाः षट्कश्चैको महापदपंक्तिः॥ क्रमेण पंच पादाः पंचाक्षराः। अंत्याक्ष
पादः षडक्षरश्च। सा महापदपंक्तिरनुष्टुब्नाम। तस्योदाहरणं। तव त्यादिष्टा ५ अग्ने संदृष्टिः ५ इदा चिदह्नः ५ इदा चिदक्तोः ५ श्रिये रुक्मो न ५ १०
रोचत उपाके ६ कारिका। पंच पंचाक्षरा यस्याः षट्कश्चैकः षडक्षरः। सोक्ता महापदपंक्तिस्तव त्यादिष्टेत्युदाहृतिः॥ अथानुष्टुप्तृतीयभेदः।
आगता वष्टकश्च कृतिः॥ आद्यौ द्वौ पादौ द्वादशाक्षरौ। तृतीयपादोऽष्टाक्षरश्च। सा कृतिरनुष्टुब्नाम। तस्योदाहरणं। मा कस्मै धातमभ्यमित्रि
णे नः १२ मा कुत्रा गु॰ वृहः॰ १२ स्तना॰ श्वी॰ ८ वृहः। कारिका। द्वादशाक्षरकावाद्यौ तृतीयोऽष्टाक्षरः कृतः। मा कस्मै धातमित्येषा कृत्यनुष्टुबुदाहृतिः।

त्रिपात्कु विज्ञा गताभ्यां गायत्रेणत्वेति पिंगलः। अथानुष्टुप्चतुर्थभेदः। मध्येऽष्टकः पिपीलिकमध्या। आद्यंत्यौ पादौ द्वादशाक्षरौ मध्यमपादोऽष्टाक्षरश्च। सा
पिपीलिकमध्या। तस्योदाहरणं। पर्यूषु प्रधन्व वाजसातये। वृहः १२ परि वृत्राणि सक्षणिः ८ द्विषस्तरध्या ऋणया न ईयसे १२ कारिका। यस्या द्वादशक
स्त्वाद्यौ मध्येऽष्टौ द्वादशाक्षरौ। सा पिपीलिकमध्योक्ता पर्यूषु प्रेत्युदाहृतिः। मध्येऽल्पे च। त्रिपाद्णिष्टमध्या पिपीलिकमध्येति द्विसूत्रे पिंगले॥ अथानुष्टु
प्पंचमभेदः॥ नवकयोर्मध्ये जागतः काविराट्। आद्यंतौ पादौ नवाक्षरौ। मध्यमपादो द्वादशाक्षरश्च। सा काविराडनुष्टुब्नाम। तस्योदाहरणम्।
आ विद्वांसा हवामहे वां ९ ता नो विद्वांसा मन्म वोचेतमद्य १२ प्रार्चद्दय॰ कुः ९ कारिका। नवाक्षरौ द्वादशको पूर्ववत्सुबरे नवेत्। इति पादास्त्रयो यस्यां
सा विद्वांसेति काविराट्। ता विद्वांसेति काविराडिति प्रातिशाख्ये॥ अथानुष्टुप्षष्ठभेदः॥ नववैराजत्रयोदशैर्नष्टरूपी॥ आद्यपादो नवाक्षरः। द्वितीयपा
दो दशाक्षरः। तृतीयपादस्त्रयोदशाक्षरश्च। सा नष्टरूपानुष्टुब्नाम। तस्योदाहरणं। विश्वेभि पाक्यान्न रदेवान ९ वषट् दस्मा १० पानं सोनः
१३ कारिका। नवाक्षरो दशार्णस्त्रयोदशाक्षरस्तथा। इति त्रयो हि यत्रैव नष्टरूपा हि सा स्मृता। नष्टरूपा विश्वेभिरिति प्रातिशाख्ये॥ अथानुष्टु
प्सप्तमभेदः। दशकास्त्रयो विराट्॥ क्रमेण त्रयः पादा दशाक्षराः। सा विराडनुष्टुब्नाम। तस्योदाहरणं। पिबा सोममभिं द्रमदं तु त्वा १० यं ते सुषाव हर्य
श्वाद्रिः। वृहः १० सोतुः॰ नार्वा १० दशाक्षरा विराडिति श्रुतिः॥ अथानुष्टुब्अष्टमभेदः। एकादशिन्यो वा॥ क्रमेण त्रयः पादा एकादशाक्षराः। सा विर
ट्स्थानविराडनुष्टुब्नाम। तस्योदाहरणं। अग्निं वरो दी॰ ण्वाः ११ हस्ते च्युती जनयंत॰ ११ दूरे॰ दृ॰ यो ११ कारिका। दशाक्षरास्त्रयः पादा यस्याः सा
हि विराड्भवेत्। एकादशाक्षरा यस्यास्त्रयः सापि विराड्भवेत्। त्रिपान्त्रिष्टुप्भेरिति पिंगलः। विराड् नाम स्थानस्वर्गे लोके जयति तेन त्रयस्त्रिंश
दक्षरे भवत इति ब्राह्मणश्रुतिः। ६॥ षष्ठः खंडः॥ चतुर्थं बृहतीत्वित्यादौ द्वादश॥ चतुर्थं छंदो बृहतीनाम। आ पंक्तेः सर्वत्र बृहत्यधिकारः। अथ बृह
ती प्रथमभेदः। प्रथमद्वितीयचतुर्थपादा अनादेशादष्टाक्षराः। तृतीयपादो द्वादशाक्षरश्च। सार्षबृहतीनाम। तस्योदाहरणं। अपनेज्जसुहर्यतं ८
सोम आहरिभिः सुतः ८ अपाणोः १२ अथानि छ॰ रथं ८ कारिका। आद्यास्त्वष्टाक्षरोपादस्तृतीयो द्वादशाक्षरः। चतुर्थोष्टाक्षरश्चांते बृहती

सर्वा॰ टी॰ स्तुबेभेवेद॰ बृहतीजागतस्त्रयश्च गायत्राइति पिंगलः ॥ अथ बृहती द्वितीयभेदः ॥ आद्यश्चेत्पुरस्ताद्बृहती ॥ आद्यपादो द्वादशाक्षरः ॥ शेषास्त्रयः पादा अनादेशाद
ष्टाक्षराः ॥ सा पुरस्ताद्बृहती नाम ॥ तस्योदाहरणं ॥ महोयस्पतिः शवसो असाम्या ॥ बृह॰ ॥ महान्॰ त॰ तुविः ॥ ८ भर्त्रा वज्रस्य धृष्णोः ॥ पिता पुत्रमिव प्रियं॰
११ पुनः ॥ अधीन्नवः॰ र बृहः १२ सद्योवृद्धि॰ नः बृहः ८ सद्यो॰ धर्षः ॥ बृहः ॥ सद्योदि॰ नवः ८ कारिका ॥ द्वादशाक्षरपादोचेदष्टकाश्चापरे त्रयः ॥ पा
साव्यस्याह्निसा प्रोक्ता पुरस्ताद्बृहती तिरे ॥ पुरस्ताद्बृहती पुर इति पिंगलः ॥ अथ बृहती तृतीयभेदः ॥ द्वितीयश्चेन्न्यंकुसारिणी ॥ प्रथमतृतीयचतुर्थ
पादा अनादेशाष्टाक्षराः ॥ द्वितीयपादो द्वादशाक्षरश्च ॥ सा न्यंकुसारिणी बृहती नाम ॥ तस्योदाहरणं ॥ एतं शंसमिंद्रास्मयुष्ट्वं ॥ कूचित्सं॰ ८ कु
विन्नं तं सह॰ ष्वे १२ सदापास्य॰ ये ८ बृहः ॥ मेदतां॰ सो ८ न्यंकुसारिणी द्वितीयाइति पिंगलः ॥ उरोबृहती वा ॥ विकल्पेन उरोबृहती नाम ॥
तस्योदाहरणं ॥ त्वष्टमं तक्रदुकमंतरं ॥ भुरिकू॰ ८ अपाछ॰ न्नवे १२ सर्यायो॰ त॰ बृहः ८ सद्व्याधर्षमर्हति ८ उरोबृहती यास्कस्येति पिंगलः ॥
स्कंधोग्रीवी वा ॥ विकल्पेन स्कंधोग्रीवी बृहती नाम ॥ तस्योदाहरणं ॥ मूत्स्य पायितमह॰ ॥ बृह॰ ॥ पात्रस्य॰ द॰ १२ रुपा॰ दुः ॥ निचृद्व॰ ८ वाजीस॰ मः ८
स्कंधोग्रीवी क्रोष्टुकेरिति पिंगलः ॥ कारिका ॥ आद्यंतावष्टाक्षरौ पादौ द्वितीयो द्वादशाक्षरः ॥ पादावद्याष्टको सा कीर्त्यते त्रिभिर्वेत्तनामभिः ॥
ऋषीणां मतभेदेनाहि नामभेदे तु कारणं ॥ पिंगलमतेन्नेमं महर्षेर्न्यंकुसारिणी ॥ स्कंधोग्रीवी क्रोष्टुकेश्च यास्कस्योरोबृहत्यपि ॥ एकस्यैवाभिनाम भ
नि प्रत्येकमुदाहरणं ॥ तन्मतमाचार्यैरिति वेदितव्यं ॥ अथ बृहती चतुर्थभेदः ॥ अंत्यश्चेदुपरिष्टाद्बृहती ॥ प्रथमद्वितीयतृतीयपादा अना
देशादष्टाक्षराः ॥ चतुर्थपादो द्वादशाक्षरश्च ॥ सोपरिष्टाद्बृहती नाम ॥ तस्योदाहरणं ॥ नतमंहो न दुरितं ८ देवासो॰ ष्टमं ८ सजो॰ मा॰ ८ मित्रो॰ द्विषः १२ ११
कारिका ॥ आदितस्त्वष्टका यस्यास्त्रयोंत्या द्वादशाक्षरः ॥ उपरिष्टाद्बृहत्येषा नतमंह उदाहृतिः ॥ उपरिष्टाद्बृहत्यंत इति पिंगलः ॥ ४

अथ बृहती पंचमभेदः ॥ अष्टिनोर्मध्ये दशकौ विष्टारबृहती ॥ प्रथमचतुर्थपादावनादेशादष्टाक्षरौ ॥ द्वितीयतृतीयपादौ दशाक्षरौ ॥ सा विष्टारबृ
हती नाम॰ तस्योदाहरणं॰ पुवं ह्यास्तेमहोरन् ८ बृहः ॥ पुवं वायं निरततं सत १० तानोवस्सकूगोपास्यातं १० पातनो॰ यो॰ ८ कारिका ॥ यद्यष्टा
क्षरयोर्मध्ये पादौ स्यातां दशाक्षरौ ॥ विष्टारबृहती सोक्ता पुवं ह्यास्मुदाहृतिः ॥ वैराजौ गायत्रौ चेति पिंगलः ॥ अथ बृहती षष्ठभेदः ॥
त्रिजागतोर्ध्वबृहती ॥ क्रमेण द्वादशाक्षरास्त्रयः पादाः सोर्ध्वबृहती नाम ॥ तस्योदाहरणं ॥ अजीजनो अमृत मर्त्येष्वा ॥ बृहः १२ ऋतस्य॰
णः १२ सदास॰ त १२ कारिका ॥ त्रयो द्वादशका यस्याः साहोर्ध्वबृहती विराट् ॥ त्रिभिर्जागतैर्महाबृहतीति पिंगलः ॥ अथ बृहती सप्तम
भेदः ॥ त्रयोदशिनोर्मध्येष्टकः पिपीलिकमध्या ॥ आद्यंतौ पादौ त्रयोदशाक्षरौ ॥ मध्यमपादोष्टाक्षरश्च ॥ सा पिपीलिकमध्या विराट्
बृहती नाम ॥ तस्योदाहरणं ॥ अभि वो वीरमंधसो मदेषु गाय १३ गिरा महाविचेतसं ८ इंद्रं ना॰ था १३ कारिका ॥ यदि ह्यष्टाक्षरो म
ध्ये त्रयोदशकयोर्द्वयोः ॥ सा पिपीलिकमध्योक्ता बृहती हि स्त्रयोदश ॥ त्रिपाद्णिच्छमध्या पिपीलिकमध्येति पिंगलः ॥ अथ बृह
त्यष्टमभेदः ॥ नवकाष्टकद्वादशपदानां विषमपदा ॥ प्रथमपादो नवाक्षरः ॥ तृतीयपाद एकादशाक्षरः ॥ द्वितीयचतुर्थपादावष्टाक्ष
रौ ॥ सा विषमपदा बृहती नाम ॥ तस्योदाहरणं ॥ सनितः सुसनितरुग्र ९ चित्र॰ त ८ प्रास हा सम्रा॰ नं ११ भुज्युं वा॰ यं बृह ॥ ८
कारिका ॥ नवाक्षरोष्टाक्षरश्च तथैवैकादशाक्षरः ॥ चतुर्थोष्टाक्षरश्चेति पादा यस्यास्तु सोच्यते ॥ अथ बृहती नवमभेदः ॥ चतुर्नव
का बृहत्येव ॥ क्रमेण चत्वारः पादा नवाक्षराः ॥ तस्योदाहरणं॰ तंत्वा वयं पितो वचोभिः ९ गावो न॰ भ ९ देवेभ्य॰ द ९ अ
स्मभ्यं त्वा॰ द ९ ॥ बृहः ॥ कारिका ॥ चतुर्भिर्नवकैः पादैर्युक्ता पि बृहती मता ॥ क्वचित्नवकाश्चत्वार इति पिंगलः ॥ ७ ॥ सप्तमः खं
डः समाप्तः ॥ ॥

पंचमेपंक्तिः पंचपदा। आत्रेइत्यतः पंक्त्यधिकारः। पंचमं छंदः पंक्तिर्नाम· क्रमेणपंचपदाअनादेशाद्दशाक्षराः। सार्षपंक्तिर्नाम· तस्योदाहरणं· इंद्रो
मदायवावृधे ८ शवसे· भिः ९। तमिः भु। व्यूहः ८ उते· हे ८ सवाजे· ह ८ पथ्यापंचभिर्गायत्र्यैरितिपिंगलः। पंचपदापंक्तिरितिश्रुतिः। अथपं
क्तेर्द्वितीयभेदः। अथचतुष्पदाविराड्दशकैः। अथेत्यधिकारेतेनविराड्दशकैरित्यादौचतुर्भिः पादैरित्यादिसिद्धंभवति· क्रमेणचत्वारः
पादाद्दशाक्षराः। साचतुष्पदाविराट्पंक्तिर्नाम। तस्योदाहरणं। मन्येत्वायज्ञियंयज्ञियानां१० मन्ये·नां१० मन्ये·तुं१० मन्ये·णनां१०
कुनः शिपिप्रोरहिमायस्यद्यौः१० पुरो·ई:१० सुदामं· ष्व१० ऋजि·मू१० कारिका। चतुर्भिर्दशकैः पादैः क्रमेणैवतदुच्यते· विराट्
पंक्तिसाप्रोक्ता मन्येत्वात्युदाहृतिः। अथपंक्तेस्तृतीयभेदः। अयुजौजागतौसतोबृहती। प्रथमतृतीयपादौद्वादशाक्षरौ· द्वितीय
चतुर्थपादावनादेशादष्टाक्षरौ· सतोबृहतीपंक्तिर्नाम। तस्योदाहरणं। मातेराधांसिमातउतमोतवसो१२ अस्मा·भन ८ विश्वा·षष१२
वसू·आ ८ कारिका· तृतीयाद्यौद्वादशकौद्वितीयांत्यौतथाष्टकौ· यस्याः सतोबृहत्येवमातेराधांस्युदाहृतिः। पूर्वौचेद्युजौसतः
पंक्तिरितिपिंगलः। तथासतोबृहतीतांडिनइति। अथपंक्तेश्चतुर्थभेदः। युजौचेद्विपरीता। द्वितीयचतुर्थपादौद्वादशाक्षरौ· प्र
थमतृतीयपादावनादेशादष्टाक्षरौ· साविपरीतापंक्तिर्नाम। तस्योदाहरणं। यत्रग्रावाःश्रावयत्सखा ८ विश्व·श्रुतः१२ तंविमा ८ इं
द्रं·चः१२ कारिका। द्वितीयांत्यौद्वादशकौतृतीयाद्यौतथाष्टकौ· यस्याः साविपरीतेतिनाम्नोक्ताबद्धचोतेंमेः। विपरीतौचेति
पिंगलः। अथपंक्तेः पंचमभेदः। आद्यौचेत्प्रस्तारपंक्तिः। आद्यौद्वौपादौद्वादशाक्षरौ। तृतीयचतुर्थपादावनादेशादष्टाक्षरौ। साप्र
स्तारपंक्तिर्नाम। तस्योदाहरणं। भद्रमिद्रुशाकृणवत्सरस्वती१२ अकवा·ती१२ गृणाना·ह ८ स्तुवाना·ह ८ कारिका। पादौद्वाद
शकावाद्यावंत्यावष्टाक्षरौपरौ। यस्याः साप्रस्तारपंक्तिर्भद्रमिदित्युदाहृतिः। प्रस्तारपंक्तिः पुरतइतिपिंगलः। पंक्तेः षष्ठभेदः।

अंत्यौचेदास्तारपंक्तिः। तृतीयचतुर्थपादौद्वादशाक्षरौ। प्रथमद्वितीयपादावनादेशादष्टाक्षरौ। साऽऽस्तारपंक्तिर्नाम· तस्योदाहरणं। आग्निंनस्ववृक्ति
भिः· व्यूहः ८ होतारं· हे ८ यज्ञाय· मह१२ शिरंपावक· सं१२ कारिका। आद्यावष्टाक्षरौपादौततोद्वादशकौपरौ। यस्याआस्तारपंक्तिः
स्यात्अग्निंनस्वेत्युदाहृतिः। आस्तारपंक्तिः पुरतइतिपिंगलः। अथपंक्तेः सप्तमभेदः। आद्यांत्यौचेत्संस्तारपंक्तिः। प्रथमचतुर्थपादौद्वादशा
क्षरौ। द्वितीयतृतीयपादावनादेशादष्टाक्षरौ। सासंस्तारपंक्तिर्नाम। तस्योदाहरणं। पितुभृतोनतंतुमित्सुदानवः१२ प्रतिद्ध्मो·सि ८ उषा·मः ८
संवर्तय·तना१२ कारिका। द्वादशाक्षरयोर्मध्येपादावष्टाक्षरौयदि· यस्याः संस्तारपंक्तिः स्यात्पितुभृतोनतंतुमित्· संस्तारपंक्तिर्बहिरितिपिं०
तत्रसंस्तारपंक्तिरुदाहरणमित्यस्यार्थः। आयाहिवनसासहेतिद्विपदाः शंसतीतिब्राह्मणे· तथायाहिसंवत्सउपस्यंहेपदमितिद्विपदास
क्ते, पितुभृतइत्येषासंस्तारपंक्तिः छंदः पठ्यते· कथमिदंचतुष्पाउदाहृियते· उच्यते· द्वौद्विपदास्तृचः समाम्नंतीति· द्वौद्विपदयोरध्याप
नेएकर्चत्वमत्रैवंवक्ष्यते· तेनचतुष्पात्वमित्यदोषइति। अथपंक्तेरष्टमभेदः। मध्यमौचेद्विष्टारपंक्तिः। द्वितीयतृतीयपादौद्वादशाक्षरौ।
प्रथमचतुर्थपादावनादेशादष्टाक्षरौ। साविष्टारपंक्तिर्नाम। तस्योदाहरणं। अग्नेतवश्रवोवयः ८ महिभ्राज·वसो१२ बृहद्भा·क्रतुं· व्यूहः
ऋदधासिदा·कवे ८ कारिका। यस्यास्त्वष्टकयोर्मध्येभवेतांद्वादशाक्षरौ· विष्टारपंक्तिः साप्रोक्ताअग्नेतवेत्युदाहृतिः। विष्टारपंक्तिरं
तइतिपिंगलः। ८ अष्टमः खंडः। षष्ठं त्रिष्टुप्त्रैष्टुभपदा। आजगत्यादार्षत्रिष्टुबधिकारः। त्रैष्टुभमित्यनादेशादृष्टाक्षरनिचत्व
र्थं। पादाश्चत्वारएव· अनादेशाश्चतुष्पादाश्चैवइति· चत्वारएकादशकास्तुपादायस्याः सोक्तात्रिष्टुबाचार्यैर्विशेषेः। अथार्ष
त्रिष्टुप्प्रथमभेदः। तस्योदाहरणं। प्रवासाममभियमुग्रतद्:११ उर्वंग्यं· ई११ वियो·रु११ विश्वा·भिः११ एकादशाक्षरात्रिष्टु

सर्वा. टी. विविक्षुरिति। अथ त्रिष्टुभो द्वितीयभेदः। द्वौ तु जागतौ यस्याः सा जागते जगती त्रैष्टुभे त्रिष्टुप्॥ यस्या छंदसो द्वौ पादौ द्वादशाक्षरौ। तथा द्वौ पादावेकाद
शाक्षरौ। तावुभौ सति जागते जगती त्रिष्टुभे त्रिष्टुबिति निर्णयः। अथ जागते जगत्युदाहरणं। सनेमि चक्रमजरं विवावृते १२ उत्ता· दि ११ सूर्य·
वृतं ११ तस्मिन्ना· शा १२ बृहः। एते द्वे वृत्ते उदाहरणे बोद्धव्यं। तत्र जागते जगती त्रैष्टुभे त्रिष्टुबिति निर्विशेषसंज्ञोदाहरणानि· इमं स्तोमम
१३ र्हते यं सूक्तं। तथा मानो मित्रो वरुण इति सूक्तमिति द्वे सूक्ते जागतत्रैष्टुभे संदेहनिमिश्रितं बोद्धव्यं। एवं सर्वत्र। कारिका। यस्या द्वादशाक्षरौ
पादावन्यावेकादशाक्षरौ। त्रिष्टुब्जागतस्थः सोच्यते जगती तिवै। अथ त्रिष्टुभः तृतीयभेदः। वैराजौ जागतौ चाभिसारिणी। आद्यौ द्वौ पादौ
दशाक्षरौ। तृतीयचतुर्थपादौ द्वादशाक्षरौ। साभिसारिणी त्रिष्टुब्नाम। तस्योदाहरणं। यो वाचा विवाचो मृध्रवाचः १० पुरू सह· न।
तत्र द्विर्हस्य पौंस्यं गृणीमसि १२ पितेव य· वृः १२ कारिका। यस्या दशाक्षरौ पादौ ततो द्वौ द्वादशाक्षरौ। सोक्ताभिसारिणी त्रिष्टुप् यो वाचा
वेत्युदाहृतिः। अथ त्रिष्टुभश्चतुर्थभेदः। नवकौ वैराजस्त्रैष्टुभश्च। आद्यौ पादौ नवाक्षरौ। तृतीयपादो दशाक्षरः। चतुर्थपादस्त्वेकादशाक्ष
रश्च। सैका विराट्स्थाना त्रिष्टुप्नाम। तस्योदाहरणं। स्वस्ति न इंद्रो वृद्धश्रवाः ९ स्वस्ति नः· ९ स्वस्ति नस्ता· १० स्वस्ति नो बृ· ११
बृहः। अथ द्वितीया॥ द्वितीया शब्दात् विकल्पेन द्वितीयभेदो विराट्स्थाना भवति। वैराजौ नवकस्त्रैष्टुभश्च॥ आद्यौ द्वौ पादौ दशाक्षरौ· १३
एकोनवाक्षरः। एक एकादशाक्षरश्च· तस्योदाहरणं। श्रुधी हवमिंद्र मा रिषण्यः १० स्याम ते· ना १० इमा· यंति· ९ वस· रं· तः ११ भुरिक्
सा विराट्स्थाना यथा ज्ञानेन बोद्धव्या। अस्य सूक्तस्य परिभाषा क्रमो नास्ति। इति विराट्स्थाना द्विप्रकारा ज्ञेया। कारिका

यस्य नवाक्षरौ पादौ तृतीयो दशकस्तथा॥ एकादशाक्षरोऽन्यश्च विराट्स्थाना तु सा मता। तत्स्वस्ति न इंद्रः॥ आपिच॥ यस्या द्वौ दशौ वा द्वौ तृतीयश्च न
वाक्षरः॥ एकादशाक्षरश्चांत्यो विराट्स्थानैव सापि चेति श्रुधी हवमिंद्रेति। अथ त्रिष्टुभः पंचमभेदः॥ एकादशिनस्त्रयोऽष्टकश्च विराड्रूपा॥ क्रमेणत्र
यः पादा एकादशाक्षराः। चतुर्थपादोऽष्टाक्षरश्च। सा विराड्रूपा त्रिष्टुप्नाम। तस्योदाहरणं॥ तुभ्यं श्चोतंत्यध्रिगो शचीवः॥ बृहः ११॥ स्तोकासो· व
स्य। ११॥ कवि। नागाः ११ हव्या· धिर। ८। कारिका। एकादशाक्षरा यस्याः पादास्तु त्रय आदितः॥ चतुर्थश्चाष्टकः सोक्ता विराड्रूपेति बह्वृचैः
यजमानोदेवतेति। यादंपतीइत्यादिपंचर्चेजायापत्योः प्रशंसा। दंपतीइतिजायापत्योरित्यर्थः। आसांपंचानांदंपत्योर्देवतेति।

शिष्टानवर्चोदंपत्योराशिषः स्तुतिः। आशामेपर्वतानामित्याद्याः शिष्टाइत्यर्थः। आसामृचांदंपत्योराशिषोदेवतेति। इदंवऊदेवंमित्यंसू ५८
क्तं॥ अग्निवःऋयोगेरेतिचतुर्दश्याक्। अनुष्टुप्। मह्यदेवतइत्याद्यंत्याश्चतस्त्रः। पंक्तयः वीतिहोत्रेतिनवम्युक् अनुष्टुप् आशामेपर्वतानां
मितिदशम्येकपादानिचृत्गायत्रीत्रयः सप्तकाः शिष्टाएकादशर्चेवत्सभेः प्राक्गायत्र्यः। योयजातीतिसूक्तंस्वाध्यायधर्मः। ।इतिश्रीम
द्वे० पंचमाष्टकेसप्तमोध्यायः॥ षष्ठमाष्टकेद्वितीयोध्यायः॥ ॥ मरुतात्रेशस्मेधातिथिः॥ मरुतोनीतित्रेशद्द्वंसूक्तं ३०। कण्व
पुत्रोमेधातिथिऋषिः। अनादेशात्इंद्रोदेवता। वत्सभेःप्राक्गायत्रीछंदः। मरुतानीतिसूक्तेबृहतीसहस्रशस्त्रेमहाव्रतारण्यके।
वयंघेकोनामध्यातिथिर्बार्हतंत्रिगायत्र्यनुष्टुबंतं। । वयंघत्वेत्येकोनत्रिंशत्यर्चंसूक्तं। १०। अनिरुक्तासंख्येति। कण्वपुत्रोमेध्याति
थिऋषिः। अनादेशात्इंद्रोदेवता। बृहतीछंदः। नहिषस्तवनामसमित्याद्यंत्यास्तिस्रोगायत्र्यः। अधः पश्यस्वेत्यंत्यर्क् अनुष्टुप्।
वयंघत्वासुतावंतइतिपंचदशोदिष्टबृहतीसहस्रशस्त्रेमहाव्रतारण्यके॥ ऐंद्रयाहिद्यूनानीपातिथिरानुष्टुभंत्वंचोत्यागायत्र्यास्तंस
हस्रंवस्करोचैपांगिरसोपश्यत्। ऐंद्रयाहिहरिभिरस्यष्टादशर्चंसूक्तं॥१८॥ अनिरुक्तासंख्येति। कण्वपुत्रोनीपातिथिऋषिः॥
अनादेशात्इंद्रोदेवता। अनुष्टुप्छंदः। आयादिंद्रश्चेत्यंत्यस्तिस्रोगायत्र्यः। तंगायत्रस्त्वमंगिरसः पुत्रोवस्करोविर्ऋषयः। सहस्रंस
५८ हस्रसंख्याकाः ऋषयः अपश्यन्। सहस्रंवस्करोऽभिपइतिमंत्रलिंगात्। आंगिरसग्रहणमुक्तार्थं। ऐंद्रयाहिहरिभिरितिसूक्तंस्वा

२६ ध्यायधर्मः॥ अश्विनाच्चतुर्विंशतिः श्यावाश्वआश्विनमुपरिष्टाज्ज्योतिषंपंक्तिमहाबृहतीपर्यंतं। ।अश्विनेंद्रेणेतिचतुर्विंशत्यर्चंसूक्तं २४ अत्रि
पुत्रः श्यावाश्वऋषिः। कात्यायनेन कण्वत्वंनभवति· अत्रेरिवस्तृणुतंपूर्व्यस्तुतिरिति श्यावाश्वस्य स्तुतौमहश्रुतेतिमंत्रलिंगात्।अश्विनौ
देवता।उपरिष्टाज्ज्योतिश्छंदः त्रिष्टुप्भेदः। द्वादशिनस्त्रयोष्टकश्चेति· अर्वाग्रथमित्यकपंक्तिः। नमोवाकेइत्यकमाहाबृहतीत्रिष्टु
भेदः। चत्वारोष्टकाजागतश्चेति· स्वाहाकृतस्येत्यंत्यकेपंक्तिः॥ अश्विनेंद्रेणत्यकं कमतिरिक्तोत्यकरात्रिस्त्वकारः॥ आवित्तासप्तर्चा
करंमहापंक्तिछंदं। आवित्तासीतिसप्तर्चंसूक्तं ७ श्यावाश्वऋषिः। अनादेशात्वइंद्रोदेवता· शाक्करीछंदः षट्पंचाशदक्षरादिति· श्या
वाश्वस्यऋन्वनदृत्यंतस्य महापंक्तिः पंचाष्टकाः। आवित्तासीत्यस्यसूक्तस्यपादव्यवस्थोदाहरणानिलिख्यंते।उक्तंच।आवित्ता
सिक्रन्दनोहृक्तबर्हिषः पिबासोमंमदायकंशतक्रतो।यंतेभागमधारयन्। विश्वाःसहानःपृतनाउरुज्रयःसमप्सुजित्वाम
रुत्वांइंद्रसत्पते। श्यावाश्वस्येत्यंत्यकआतिरिक्तेसर्वसूक्तोदाहरणंज्ञेयं। त्वात्क्रनोसमप्सुजिदित्यवसानेमरुत्वनीयशस्त्रेब्राह्म
णस्तन्त्रयोः। ।पेदंमहापंक्तिमाधातिजगती। ।पेदंत्रलेतिसप्तर्चंसूक्तं ७। पूर्वंवत्सूक्तसंख्येति· श्यावाश्वऋषिः आत्रेयोत्रोपन्य
द्वात·भक्तेःकर्माणिकृण्वतइतिमंत्रलिंगात्· अनादेशात्वइंद्रोदेवता।महापंक्तिछंदोजगतीभेदः षष्टकाः। पेदंत्रलेत्याद्यर्क
अतिजगतीद्विपंचाशदक्षरा। अस्यसूक्तस्यपादव्यवस्थोदाहरणालिख्यंते· सहानइत्याद्यादिषर्कर्चः षष्टकाज्ञेयाः सर्वत्र २६

उक्तंच।सेहानउग्रपृतना॥८॥ अभिपते॥०॥ इंद्रविद्भिः॥०॥ माध्यं।वनस्य।०। वृत्रहन्नसेद्य·६ पिबासोमस्यवज्रिवः॥०। ततः।पेदंत्रलेत्या
द्यपादोद्वादशाक्षरः। पंचमपादः षडक्षरः शेषाः सर्वसूक्तमष्टाक्षराः। अस्यसूक्तस्यपंचमपादस्तथाचतुर्दशपादएतौद्वौपादौसर्वानुदात्तौज्ञे
यौ। प्रातिशाख्योक्तौ। पेदंत्रलेतिचैतस्मिन्सूक्तेपादोस्तिपंचमः। सर्वानुदात्तः षट्सूक्तेसादितश्चचतुर्दश। चकाराच्चतुर्दशपादश्चेत्यर्थः। त
आशानीपतेनधेनेत्यवसानेस्त्रकारः। पेदंत्रलमहत्वत्येघाविथेतिसूक्तेनिष्केवल्यशस्त्रेब्राह्मणस्तन्त्रयोः। ।यज्ञस्यदशेंद्राग्न्यं। यज्ञस्यहिस्थ इ
तिदशर्चंसूक्तं १०। श्यावाश्वऋषिः। इंद्राग्नीदेवता। वत्सापेः प्राक्गायत्रीछंदः। यज्ञस्यहिस्थइत्यच्छावाकशस्त्रेस्त्रकारः॥ ॥अग्निमस्तो
षिनाभाकआग्नेयंमहापंक्तिर्हि· अग्निमस्तोषीतिदशर्चंसूक्तं १० पूर्ववत्सूक्तसंख्येति· कण्वपुत्रोनाभाकऋषिः अग्निर्देवता।महापं
क्तिछंदः। षष्टकाजगतीभेदः। हिशब्दात्रीणिसूक्तानिमहापंक्तीनि। अग्निमस्तोषीतिसूक्तंस्वाध्यायधर्मः इंद्राग्नीद्वादशेंद्राग्नं हिती
याद्यर्कपंत्यात्रिष्टुप्· इंद्राग्नीयुवामितिद्वादशर्चंसूक्तं· १२ नाभाकऋषिः इंद्राग्नीदेवता। हिशब्दात्महापंक्तिश्छंदः षष्टकाजगतीभेदः नाहवा
वामितिद्वितीयर्क्शाक्करीषट्पंचाशदक्षरा। साद्वितीयासप्तपदाप्रवर्तितांगायत्रींचानुष्टुभंच करोत्यारण्यप्रकृतिः। एवंद्राग्निस्याभित्यंत्यर्क
त्रिष्टुप्· इंद्राग्नीयुवंसुनइत्येतस्यार्धर्चानगायत्रीकारमतिबृहतीसहस्रशस्त्रेमहाव्रतारण्यके। अस्माउषुदशवारुणंतु। अस्माऊषित
दशर्चंसूक्तं १० नाभाकऋषिः। वरुणोदेवता।तुशब्दात्उत्तरसूक्तंवारुणंहिशब्दात्महापंक्तिछंदोजगतीभेदः षष्टकाः। नाभाकस्यसनेश्च
लगेस्मेरेनश्रूयते· तस्मान्नाभाकाःप्रातःसवनाभाकौकांस्त्वचोन्वंसतीति। सप्तपःपरिषस्वजइतित्यूचः अथवाविकल्पेनपःककुभानिधा

रयइतित्यृचोमैत्रावरुणशस्त्रे। अपिच· प्रवइ इंद्रोपमादयइतित्यृचोब्राह्मणाच्छंसीशस्त्रे। अपिच। ताहिमध्यंभराणामितित्यृचोछावाकशस्त्रे
इतिब्राह्मणसूत्रयोः। एतेत्रपूस्त्वानाभाकऋषिणापदिष्टाइति· अस्माकंपुत्रप्रवसयइतिसूक्तंस्वाध्यायधर्मः। अस्वप्नात्पर्वनेनानोवेत्रे
पुमंबंत्यंवात्वमाश्विनमानुष्टुभमपश्यत्। अस्वप्नाजामितिषळर्चंसूक्तं ६ अत्रिपुत्रोर्चनानाऋषिः। विकल्पेननाभाकऋषिः। वाविशि
ष्टत्वात् उत्तरत्रनानुवृत्तिः तुशब्दात् आद्यस्तृचोवरुणोदेवता। आवांथावाणइतिद्वितीयतृचोऽन्त्यंवावृचमाश्विनामित्यकत्वात् द्वितीयतृ
चोऽश्विनोदेवतेशब्दात्॥ अस्वप्नादाद्यस्तृचोनाभाकऋषिः। आवांथावाणइत्यंत्यस्तृचोर्चनानाऋषिरिसिद्धार्थः। अस्वप्नात्पूर्वस्तृचस्त्रिष्टु
भः। आंवाथावाणइत्येकचरस्तृचोनुष्टुभः। अस्वप्नाजामस्करोविश्ववेदाइतिवारुण्यापरिदध्यादितिब्राह्मणसूत्रयोः॥ इमेत्रयस्त्रिंशादिदं
पञ्चांगिरसआग्नेयंतु। इमेविप्रस्येतित्रयस्त्रिंशद्वचंसूक्तं। ३३॥ आंगिरसपुत्रोविरूपऋषिः। अग्निर्देवता· तुशब्दादुत्तरसूक्तमाग्नेयं·
वत्सप्रेः प्राकगायत्रीछंदः। इमेविप्रस्येतिसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः॥ समिधाग्निंत्रिंशत्॥ समिधाग्निमितित्रिंशद्वचंसूक्तं ३०
विरूपोनामऋषिः। तुशब्दात् अग्निर्देवता· वत्सप्रेः प्राकगायत्रीछंदः। समिधाग्निमितिसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः॥ आ
घाद्विचत्वारिंशत्त्रिशोकआद्यासैंद्री। ।आघायेअग्निमितिद्विचत्वारिंशद्वचंसूक्तं ४२ कण्वपुत्रस्त्रिशोकनामऋषिः। अनादेशात् इंद्रो
देवता· वत्सप्रेः प्राकगायत्रीछंदः। आघायइत्याद्यर्कअग्नीइंद्रदेवतेति· आघायेअग्निमितिसूक्तंबृहतीसहस्रशस्त्रेमहाव्रतारण्यके

इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांषष्ठाष्टकेतृतीयोऽध्यायः॥ ॥ त्वावतस्त्रयस्त्रिंशद्दशोष्टआसआदिकानीतस्यपृथुश्रवसोदा ५८
नस्तुतिराद्यापादनिचृत्पंचम्यादिककुब्गायत्रीबृहत्यनुष्टुप्सतोबृहतीगायत्रीविपरीतोत्तरः प्रगाथोद्विपदाचतुर्विंशिकाबृहतीपि
पीलिकमध्याककुन्न्यंकुशिरा विराड्जगत्कपरिष्टाद्बृहतीबृहत्यौ विषमपदोत्तरोपंक्तिः संस्तारपंक्तीगायत्रीपंक्तिः प्रगाथौर्वाऽयव्योगाय
त्रीद्विपदोष्णिकपंक्तिर्वायव्यागायत्री। त्वावतःपुरूवसवितित्रयस्त्रिंशद्वचंसूक्तं २२ अश्वनामपुत्रोवशोनामऋषिः। अनादेशातइं
द्रोदेवता। अत्रच। आसएतुपर्इवदेत्यादिभिऋग्भिः कानीतस्यपुत्रस्यपृथुश्रवसोनामराज्ञोदानस्तुतिः स्तूयते। आसएत्वित्यादिभिरृग्भिः पृथुश्रवाराज्ञो
दानंदेवतेति। अत्रकारिका॥ वशोपीरव्यापयत्मादात्कानीतस्यपृथुश्रवाः। तदत्रसंस्तुतंदानं मासएत्वेवमादिभिरिति। तावतइत्याद्यर्कपादनिचृत्
गायत्रीत्रयः सप्तकाः। त्वांहिसत्यमित्यादितिस्रोर्चोवत्सप्रेः प्राकगायत्र्यः। दधानोगोमदितिपंचम्यृक्ककुब्भिडन्नध्यमस्रोतः। तमिंद्रंदानमितिषष्ठी
सकृगायत्री॥ तरियिक्सिसंतीतिसप्तम्यृक्बृहती। यस्मिमदइत्यष्टम्यृक् अनुष्टुप्। योदृष्टइतिनवम्यृक् सतोबृहती अयुजेजागताविति। गव्योषुण
इतिदशम्यृक् गायत्री। नहितेशूरइत्येकादशम्यृक्बृहती। यस्त्वष्टश्रावयत्सखेतिद्वादश्यृक्विपरीतायुजोचेति। अयुजावष्टाक्षरोचेति। अ
युजावष्टाक्षरोसाविपरीतापंक्तिभेदः। वत्रनहितेशूरेति। तथायत्रऋष्वइतिद्वेऋचौ। भिक्तित्वैकाविपरीतोत्तरः प्रगाथोज्ञेयः। स्तनोवाजेष्वितित्र
५८ योदशम्यृक्चतुर्विंशत्यक्षराद्विपदा। इतिजागतद्विपदाइत्यर्थः। अक्षरेणगायत्रीसेदइतिज्ञेयं। अभिवोवीरमंधसइतिचतुर्दश्यृक्पिपीलि

९८ कमध्याबृहती। आद्यंतौ त्रयोदशाक्षरौ। मध्ये ष्टाक्षरश्चेति। ददीरेक्णइति पंच दशाम्यक ककुम्न्यंकुशिरा उष्णिक् त्रैष्टुभजागतं तु षाद्वात्। विश्वेषामि
रज्यंत मिति षोडशर्च सूक्तं दशाक्षरा त्रिपदा विराट् अनुष्टुप्भेदः। दशाकास्त्रयो विराळित्यर्थः। महः स्वव इति सप्तदशाम्यक जगती। येषामयं तद्
त्पञ्चादशपंक्त्युपरिष्टाद्बृहती। अंत्यश्चेत् द्वादशाक्षरस्त्रय इति त्रयोष्टकाः। प्रमंगमित्यो कोनविंशात्यक बृहती। सनितः स सनितारिति विंशात्यक विषमप
दा बृहतीभेदः। नवकाष्टकादश्यष्टिनो विषमपदेति। आसएत्वित्येकविंश्यक पंक्तिः पंचपदाः षष्ठिंसहस्रेति द्वाविंश्यक संस्तारपंक्तिः। आद्यौ
द्वादशाक्षराविति। मध्ये पादशावित्यर्थः। दशारयावेति त्रयोविंश्यक गायत्री। दानासइति चतुर्विंश्यक पंक्तिः। ततः आनोवायविति पंचविंश्यक
योअश्वेभिरिति षड्विंश्यक। एते द्वे च्चावनादेशाद्बार्हतप्रगाथो बृहती सतो बृहत्यौ। तं प्रगाथं वायुदेवत्यावित्यर्थः। योमइमा मिति सप्तविंश्यक
बृहती। उनयेव पृषीत्यष्टाविंश्यक सतो बृहतीत्येतौ द्वावृचावनादेशात् बार्हतप्रगाथो द्वितीयो बृहत्यौ वीसतो बृहत्यौ क्रमेण वेदितव्ये। सा बृहती
यप्रगाथो वायुदेवत्येत्यर्थः। अधप्रियामित्येकोनत्रिंश्यक गायत्री। गोवोन सृष्यामिति त्रिंश्यक द्विपदा अनादेशात् विंश्यत्यक्षरा। आद्यपादो द्वादशाक्ष
रः द्वितीयोष्टाक्षरः सतो बृहती द्विपदा पंक्तिभेदः। पिंगलमते तृतीयं द्विपाज्जागतगायत्राभ्यामित्युक्तेः सतिगायत्रीभेद इत्यर्थः। अधयच्चारये
गणइत्येकत्रिंश्यक उष्णिक्। शतंदासइति द्वात्रिंश्यक पंक्तिः। सा त्र्यृचवायुदेवत्या। अधस्याथोषणेति त्रयस्त्रिंश्यक गायत्रीइदंसूक्तं वऊदंदस्के
वेदितव्यं। अत्रैतरेयारण्यके ब्राह्मणे श्रूयते। दशांसानिविशोमदेइ सर्वमसहितिताएकविंशादिमर्म वंतीत्युक्तेसात् महाधृतं बृहतीसहस्रंशंसने। त्यावतः
पुरुस्वतिवशः सनितः स सनितारित्येतद्दंतो विंशत्यक्षरत्यासां मध्ये ददीरेक्णइति द्विपदा त्वनमथेत्येकपदाइत्युक्ताः संति। तत्रददीरेक्णाइत्ये ९८

२२

कर्चस्य द्वेइत्युक्तेसाति। ताविंशत्यचो भवंतीत्यर्थः। केचिन्मते शाकलसंहितायां सूक्तसहस्रं सप्तदशकं सपादाधिकमिति प्रवादः। मनुस्सएवन्नमथेति
पादइत्याधिकं यथाज्ञानं वेदितव्यं। एवमेव पादाधिकमित्यर्थः। माहिवो भूनाविंतआग्य आदित्येभ्यो त्याउः स्वभ्यः पंचोषसेपि महापंक्तिः। महिवोमहता
मित्यष्टादशर्चं सूक्तं १८ अनिरुक्तासंख्येति। आप्त्यपुत्रस्त्रितऋषिः आदित्यो देवता। महापंक्तिश्छंदो जगतीभेदः षळष्टकाः। अत्रसूक्ते यच्चगोषुदुःष्वप्न
मिति चतुर्दश्याद्याः पंचर्चोदुःस्वप्नघ्नाः। दुःस्वप्ननाशिन्य इत्यर्थः। ता उषादेवत्याः। सूक्तांतर्गत यच्च गोषु दुःष्वप्न्यमिति पंचभिरादित्यमुपतिष्ठेतेति गृह्ये
माहिवोमहतेमित्य इति सूक्तं स्वाध्यायधर्मः। ।स्वादोः पंचोनाप्रगाथः सौम्यं त्रैष्टुभं पंचमीजगती॥ ॥स्वादोरभक्षीति पंचदशर्चं सूक्तं १५ अनि
रुक्तासंख्येति। घोरपुत्रः प्रगाथ ऋषिः। सोमो देवता। त्रिष्टुप् छंदः। इमेमा पीता इति पंचम्यृक् जगती। सूक्तांतर्गत हृचोपामसोमं शंनोभवेति सोमाप्या
यने ब्राह्मस्तत्रयोः॥ अथ ऋग्वेदांतर्गत खिलवालखिल्यमेकादशसूक्तमारभ्यते। सूक्तसहस्रं सप्तशतकमित्यत्र। ऋचां दश सहस्राणीत्येतत्संख्या
व्यतिरिक्तानि वालखिल्यानीति प्रसिद्धिः॥ तत्र यज्ञानुष्ठाने ब्राह्मणेसूत्रे च श्रूयते। वालखिल्याः शंसति प्राणा वै वालखिल्या इति। आभिप्रवः स्तराधसमिति व
द्वे वालखिल्यानां सूक्तानीति ब्राह्मण आरण्यके। अथ वालखिल्या विहरेत् इत्युक्तं षोडशिनीति सूत्रकारः। श्रौतस्मार्तकर्मानुष्ठाने वालखिल्या खिल प्रसि
द्धिः। वेदपारायणे वर्जमित्यर्थः इति शौनकाचार्यवचनात्। यथा पैषाध्यायकुंतापाध्यायनिविदाध्यायप्रवर्ग्याध्याय श्चेति। तदेव वालखिल्याध्या
य इत्यर्थः। ।अथ वालखिल्यानुक्रमणिका लिख्यते। अभिप्रवः प्रस्कण्वः प्रगाथं तत्। अभि प्रवइति दशर्चं सूक्तं १० कण्वपुत्रः प्रस्कण्व ऋषिः
अनादेशादिंद्रो देवता। अनादेशाद्बार्हतप्रगाथं छंदो बृहती सतो बृहत्यौ। पंच प्रगाथ इत्यर्थः। तत्शब्दात् षट्सूक्तानि बार्हतप्रगाथानि॥ प्रति

श्रुष्टिगुः ॥ प्रसुश्रुतमिति दशर्चं सूक्तं १० पूर्ववत्सूक्तसंख्येति कण्वपुत्रः पुष्टिगुर्ऋषिः । अनादेशात् इंद्रो देवता । ततश्शब्दात् बार्हतप्रगाथं छंदो बृहतीसतोबृहत्यौ
पंचप्रगाथा इत्यर्थः ॥ यथा मनौ श्रुष्टिगुः । यथा मनौ सांवरणाविति दशर्चं सूक्तं १० पूर्ववत्सूक्तसंख्येति कण्वपुत्रः श्रुष्टिगुर्ऋषिः । अनादेशात् इंद्रो देव
ता । ततश्शब्दात् बार्हतप्रगाथं छंदो बृहतीसतोबृहत्यौ पंचप्रगाथा इत्यर्थः ॥ यथा मनावायुः । यथा मनौ विवस्वतीति दशर्चं सूक्तं १० पूर्ववत्सूक्तसंख्ये
ति कण्वपुत्र आयुर्ऋषिः । अनादेशात् इंद्रो देवता । ततश्शब्दात् बार्हतप्रगाथं छंदो बृहतीसतोबृहत्यौ । पंचप्रगाथा इत्यर्थः ॥ उपमं त्वा षण्मेध्यः । उप
मं त्वेत्यष्टर्चं सूक्तं ८ कण्वपुत्रो मेध्यो नाम ऋषिः । अनादेशात् इंद्रो देवता । ततश्शब्दात् बार्हतप्रगाथं छंदो बृहतीसतोबृहत्यौ । चत्वारः प्रगाथा इत्यर्थः ।
एतत्ते मातरिश्वा नो विश्वइति वैश्वदेवः प्रगाथः ॥ एतत्त इंद्रेत्यष्टर्चं सूक्तं ८ पूर्ववत्सूक्तसंख्येति कण्वपुत्रो मातरिश्वा ऋषिः । अनादेशात् इंद्रो देवता
। ततश्शब्दात् बार्हतप्रगाथं छंदो बृहतीसतोबृहत्यौ चत्वारः प्रगाथा इत्यर्थः । तत्र नो विश्वे सजोषस इति ऋचः स प्रगाथो वैश्वदेवदेवत्यः ॥ भूरीत्पंच कृ
शस्त्रीयांत्ये अनुष्टुभौ । भूरिदिंद्रस्येति पंचर्चं सूक्तं ५ कण्वपुत्रो नाम ऋषिः । अनादेशात् इंद्रो देवता । ततस्तेः प्राक् गायत्री छंदः । बार्हतप्रगा
थो वधिः ततः शतवेणून्निति तृतीयर्क् । आदद्याश्वस्येत्यंत्यर्क् ए ते द्वे ऋचावनुष्टुभौ । प्रति ते पृषध्रोऽत्याग्निसौरी पंक्तिः ॥ प्रति त इति पंचर्चं सूक्तं ५ ॥
पूर्ववत्सूक्तसंख्येति कण्वपुत्रो पृषध्रो नाम ऋषिः । अनादेशात् इंद्रो देवता । ततस्तेः प्राक् गायत्री छंदः । अचेत्याग्निरित्यंत्यर्क् अग्निः सूर्यो देवता । स पंक्ति
श्छंदश्चेति । युवं देवा चतुष्कं मेध्य आश्विनं त्रैष्टुभं । युवं देवेति चतुर्ऋचं सूक्तं ४ कण्वपुत्रो मेध्यो नाम ऋषिः । अश्विनौ देवता । त्रिष्टुप् छंदः । युवं देवा क्रतुना
पूर्व्येणेति चत्वारो याज्येति सूत्रकारः । यमृत्विजस्त्र्यृचं वैश्वदेवं चत्विक्सर्त्तिर्वा । यमृत्विजो बहुधेति त्र्यृचं सूक्तं ३ पूर्ववत् मेध्यो नाम ऋषिः । विश्वेदेवा देवता ।

यमृत्विज इत्याद्यर्क् ऋत्विक् सर्तिः से वा त्विजो देवता विकल्पेन अनादेशात् त्रिष्टुप् छंदः । यमृत्विजो बहुधा कल्पयंत इति होता रमेत प्रथमं सं प्रणीत इति गृह्ये । इमा
नि वां सप्त सुपर्णं ऐंद्रावरुणं जागतं । इमानि वामिति सप्तर्चं सूक्तं ॥ ७ ॥ तार्क्ष्यपुत्रः सुपर्णो नाम ऋषिः । अयं वा तार्क्ष्यपुत्रः । इक सुपर्ण इत्युक्ते ऋषिः कण्व इत्यर्थं
इंद्रावरुणौ देवता । जगती छंदः । इमानि वां भागधेयानीति सूत्रकारः ॥ ॥ समाप्ति वालखिल्या खिलसूक्तानि । शिल्पसंज्ञकानीत्यर्थः ॥ अग्न आ विं
शतिर्भर्गः ॥ प्रगाथ आग्नेयं प्रागाथं तु ॥ अग्न आ याहीति विंशत्यृचं सूक्तं २० प्रगाथपुत्रो भर्गो नाम ऋषिः । अग्निर्देवता । अनादेशात् बार्हतप्र
गाथं छंदो बृहतीसतोबृहत्यौ । दश प्रगाथा इत्यर्थः । तुशब्दात् उत्तरसूक्तं प्रागाथं । अग्न आ याहीति सूक्तं शंतनुवाकानुमंत्रणे सूत्रकारः ॥ ॥ उ
भयं शृणवत् ॥ उभयं शृणवदित्यष्टादशर्चं सूक्तं १८ आनुक्तासंख्येति पूर्ववत् भर्गो नाम ऋषिः । अनादेशात् इंद्रो देवता । तुशब्दात् बार्हतप्रगाथं छं
दो बृहतीसतोबृहत्यौ । नव प्रगाथा इत्यर्थः । उभयं शृणवच्चन इति सूक्तं बृहतीसहस्रशस्त्रे महाव्रतारण्यके । तथा उभयं शृणवच्च न इति बृह
त इति सूत्रकारः ॥ प्रो अस्मै द्वादश प्रगाथः पंक्तः सप्तम्याद्यास्तिस्रो बृहत्यः ॥ ॥ प्रो अस्मा इति द्वादशर्चं सूक्तं १२ घोरपुत्रः प्रगाथ ऋषिः । अनादे
शात् इंद्रो देवता । पंक्तिश्छंदः ॥ विश्वे त इंद्र वीर्यमित्याद्याः क्रमेण तिस्रो बृहत्यः ॥ प्रो अस्मा इति सूक्तं स्वाध्याय धर्मः । स पूर्व्यो गायत्र्याद्याश्चतुर्थ्यादि
द्वे सप्तमी चानुष्टुभौ अंत्या देवी त्रिष्टुप् । स पूर्व्यो महानामिति द्वादशर्चं सूक्तं १२ पूर्ववत्सूक्तसंख्येति । प्रगाथ ऋषिः । अनादेशात् इंद्रो देवता । गायत्री छं
दः । ततः स पूर्व्यो महानामित्याद्यर्कः स प्रत्ययेति चतुर्थ्यर्क् । आ इन्नु ते पंचम्यर्क् । चकारात् अर्थं ऋजन्ययेति सप्तम्यर्क् एताश्च तिस्रो अनुष्टुभः ॥
अस्माकद्वा इत्यंत्यर्क् देवी देवत्या त्रिष्टुप् छंदश्चेति । गायत्रे सूक्ते सा त्रिअंत्या त्रिष्टुबुक्ते । जागते प्रायेण गायत्र वचनात् जागतानि पृष्टिः ॥ त्रिष्टुबंतं सप्त

१०० कस्याशिशाजगत्य इत्यस्या प्रवादः परंगायत्रं भगवत्स केरनुवादे रव गायत्रस्य करनुवादनिद्दे रित्यर्थः॥ स पूर्व्योमहानामितिमकत्वतीयस्य प्र
त्तपादे ब्राह्मणस्त्रयो उत्वामदंत्विति द्वादशर्चं सूक्तं १२ पूर्ववत्सूक्तसंख्येति। प्रगाथ ऋषिः अनादेशादिंद्रो देवता॥ वत्सः शाकृ गायत्री छंदः
उत्वामदंतु सोमाइति सूक्तं स्वाध्यायधर्मः। । यदिंद्र। यदिंद्र प्रागिति द्वादशर्चं सूक्तं १२ पूर्ववत् संख्येति प्रगाथ ऋषिः अन्यस्मा हर्षे वचनात्॥
अनादेशादिंद्रो दे। वत्सः गाय। दः। यदिंद्र प्रागपागिति सूक्तं स्वाध्याय। ॥ तरोभिः पंचोना कलिः प्रागाथः प्रागाथमंत्यानुष्टुप्। तरोभि
र्वोइति पंचदशर्चं सूक्तं १५॥ आने। रव्येति प्रगाथपुत्रः कलिर्नाम ऋषिः अनादेशादिंद्रो देवता। अनादेशात् वार्हतप्रगाथं छंदो द्वत्नीसतो
बृहत्यो। समहत्त्वः प्रगाथ इत्यर्थः सोमइद्व इत्यंत्यर्क् अनुष्टुप्। तरोभिर्वो विदद्वसुमितिसूक्तं वृहद्वृहतीसहस्रशाको महाव्रतारण्यके तथा ह्यानाकरा
क्षेत्रस्त्रयो। त्वामुसेकामत्य्य। सांमदो मित्रावरुणिर्मान्योवावहवो वामत्स्य जालन ह्यआ इत्याम्र्कवन्दत्वाव्याघास्तिस्रोपपदिते॥ ॥ त्यान्नु क्षत्रियाणि
त्येकविंशत्यृचं सूक्तं २१ अनि। रव्येति। सम्मदपुत्रो मत्स्यो नाम ऋषिः सांमदाख्यो महामत्स्यराजपुत्र इत्यर्थः। अथ वा मित्रावरुणपुत्रो मान्यो नाम
सर्षिर्विकल्पेन। अथवा बहवो वा मत्स्या ऋषयः। ते बहवो वाधिक ल्पेनेति। ते जालनद्धाः अन्यापेन बद्धा मत्स्य ऋषय इत्यर्थः। आदित्या वसोपद्र
व इत्यस्य ऋवस्तुतिरित्यर्थः। मत्स्यानां यो त्रं नाम्नानुपदेशात्। उपदेशात् ऋषीणामेव विकल्पः। नदेवतायाः तेन सांमदमान्योरप्यादित्या एव
सूक्तस्याः सूक्तस्यादित्यादेवतेति। उतत्वामादित्येमहीतिदव्याम्याद्यास्तिस्त्र ऋचोदितिर्देवता। वत्सपे। शाकृ गायत्री छंदः। मत्स्यानां जालमापन्ना
नामेतदार्षं वेदयं वेम्यस्यामथाउद्द कस्यं दंतइति। तथा जालं जलचरं भवतीति व्याख्याया स्कंदेन उक्ते॥ त्यान्नु क्षत्रियाणिति सूक्तं स्वाध्यायधर्मः १००

इति श्रीमदृग्वेदानुक्रमणिदीपिकायां षष्ठाष्टके चतुर्थोध्यायः॥ ॥ आत्वेकोन प्रियमेधआदावनुष्टुभ्युरवास्त्वचाश्चत्वारो ऽंत्याः षकृत्याः स्वमेधयो
दानस्तुतिः॥ आत्वारथमित्येकोनविंशत्यृचं सूक्तं १९ अनिरुक्ता संख्येति। आंगिरसपुत्रः प्रियमेध ऋषिः अनुक्रगोत्रमांगिरसं विद्यादिति वचनात्। अनादे
शादिंद्रो देवता। सूक्तस्याद्याश्चत्वारस्तृचोनुष्टुभः प्रगाथं छंदः। अनुष्टुवौनुष्टुभ्युरवाः प्रगाथा इत्युच्यंते। आत्वा रथमित्यृक् अनुष्टुप्। तुविशुष्म
त्यृक्। यस्य ते महिनेत्यृक् एते द्वे गायत्र्यावित्येकोनुष्टुभ्युरवाः स्तृचः प्रगाथः। ततः विश्वानरस्येत्यृक् अनुष्टुप्। अभिष्ट्यसदावृधमित्यृक्। परोमा
त्रमित्यृक् एते द्वे गायत्र्याविति द्वितीयोनुष्टुभ्युरवस्तृचः प्रगाथः। ततः तंतमिद्राधस इत्यृक् अनुष्टुप्। यं स्येदेरस्याद्वित्यृक्। न यस्य त इत्यृक्। तोवा
स स्तिरस्थ। एते द्वे गायत्र्याविति तृतीयोनुष्टुभ्युरवस्तृचः प्रगाथः। ततः तंत्वायज्ञेभिरित्यृक् अनुष्टुप्। यस्य ते स्वादित्यृक्। उरुणस्तन्व इत्यृक् ए
ते द्वे गायत्र्याविति चतुर्थोनुष्टुभ्युरवस्तृचः प्रगाथ इति। अनुष्टुप् गायत्र्यौ चानुष्टोनुष्टुभ्युरवास्तृचा इति परिभाषोक्तेः। एताश्चत्वारोनुष्टुभ्युरवास्तृ
चाः प्रगाथा इत्यर्थः। ततः उपमा षट् इत्याद्यं त्याश्चतुर्दशाद्याः षळर्चाः। ताः कृत्वा अश्वमेधयोराज्ञो दानस्तुतिः स्तुतवान्। आसामृचामश्वमेधस्य
मेधो दानं देवतेति। तथाहि। उपमेत्या स्कंदेनश्वमेधो ऋक्षएकं च। प्रीतायदद्रव्युर्विन्नं प्रियमेधस्तदब्रवीत्। इति पद्यते। ततः उरुं त्रय उ
इत्याद्यं त्याः समर्चाः। वत्सः शाकृ गायत्री छंदः। आत्वा रथं यथोतय इति त्त्वचा मरुत्वतीय शस्त्रे ब्राह्मणस्त्रयोः। प्रथम्यानानुष्टुभांहिष्टह
स्यंतं द्वितीयो द्विकच्चतुष्पाद्यास्तिस्रो गायत्र्यः षोळश्यकादश्यो पंक्ती अपांहे श्वदेवो ऽग्ने स्त्रयो वारुणः॥ प्रथवस्त्रिष्टुसमित्यष्टाद
शर्चं सूक्तं १८ अनिरुक्ता संख्येति। प्रियमेध ऋषिः। अनादेशादिंद्रो देवता। अनुष्टुप् छंदः। तं घेमित्थेत्यंत्ये द्वे ऋचौ वृहत्यौ। नदं व ओद

तीनांभितिद्वितीयक्ऋउष्णिक्।अभिप्रगोपतिमितिचतुर्थ्याद्यास्तिस्रोगायत्र्यः।आत्वक्रशिप्रेतिषोळश्यृक्।अपादिंद्रइत्येकादश्यृक्।एतेद्वेचत्वोपंक्ति
षोळश्येकादश्यौ।अपादिंद्रइत्यर्धर्चवैश्वदेवदेवत्यः।वरुणइंद्रहस्पयुदित्यादिरुत्तरोर्धर्चोवरुणदेवत्यः।प्रप्रवस्त्रिष्टुभमिस्कंके।अर्चतप्रार्चतेत्य
ष्टतीरेष्कणयुदिति·नदंवओदतीनामित्येतयेताजिन्वतीषजतीतिषोळशास्त्रेबृहतीसहस्त्रेब्राह्मणस्त्रयोः। ।योराजाचर्षणीनांपुरुहन्मावा
र्हतंत्रिप्रगाथाद्याधिकंगनुष्टुपपुरउष्णिगंते॥ योराजेतिपंचदशर्चंसूक्तं१९ आनिरुक्तासंख्याति।आंगिरसपुत्रःपुरुहन्माऋषिःअनादेशा
त्तइंद्रोदेवता।योराजेत्याद्याःषळर्चाअनादेशाद्बार्हतप्रगाथोबृहतीसतोबृहत्यौ।योराजेतिप्रथमद्वचः।नाकिष्टमितिद्वितीयेद्व
चः प्रथावइंद्रेतितृतीयेद्वचइतित्रयःप्रगाथइत्यर्थः।सखायःक्रतुमित्यक्उष्णिक्।यतिभिःसमहेत्यक्अनुष्टुप्।कर्णगृह्येत्यक्पुर
उष्णिक्।आघन्देत।नसीमदेवइत्याद्याःषोळशीबृहत्यः।योराजाचर्षणीनामित्येकादशोतिबृहतीसहस्त्रशास्त्रेमहाव्रतारण्यके॥ ॥त्वं
नःस्कदीतिपुरुमीळ्होतयोर्वान्यतरआग्नेयंतुत्रिप्रगाथ्यांतं॥ त्वन्नोअग्नेमहोभिरितिपंचदशर्चंसूक्तं१९ पूर्ववत्सूक्तसंख्येति·आंगिरसोपुत्रो
होत्रदीत्येकःपुरुमीळ्होद्वितीयश्चद्वावृषीसहाप्रश्यतां॥ अथवातयोरन्यतरयोरप्रश्यत।अग्निर्देवता।तुशब्दादुत्तरसूक्तमाग्नेयं।वत्स
प्रेःप्राक्गायत्रीछंदः।अद्धानःशीरशोचिषमित्याद्यास्याःषळर्चोअनादेशाद्बार्हतप्रगाथोबृहतीसतोबृहत्यौत्रयःप्रगाथइत्यर्थः॥ त्वं
नोअग्नेमहोभिरितिसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः॥ ॥हविर्धानाहर्यंतःप्रगाथोहविषांस्कन्दौ। ।हविष्कृणुध्वमित्यष्टाद
शर्चंसूक्तं१८ आनिः ख्येतिप्रगाथपुत्रोहर्यतऋषिः॥तुशब्दादग्निर्देवता·हविर्देवताविकल्पेन·हविस्क्रतिरित्यर्थः।वत्सप्रेःप्राक्गा

यत्रीछंदः हविष्कृणुध्वमितिसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः॥सूक्तशब्दात्॥ उदीराथांगोषूक्तआत्रेयःसप्तवध्रिर्वाश्विनं·उदीराथामित्यष्टादश
र्चंसूक्तं१८ पूर्ववत्सूक्तसंख्येति॥अत्रिपुत्रोगोपवनऋषिः।अथवात्रिपुत्रःसप्तवध्रिर्नामऋषिर्विकल्पेन·अश्विनौदेवता।वत्सप्रेःप्राक्गायत्रीछंदः॥उ
दीराथामितिसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः।विशोविशोवःपंचोनाग्नेयंत्वनुष्टुभमुखास्तृचाश्चत्वारोत्यास्तिस्रोनुष्टुभ आर्थ्यस्यकतर्दपोदानस्क
विशोविशोवइतिसूक्तंपंचदशर्चंसूक्तं१५ आनिरुक्तासंख्येति।गोपवनऋषिः।सप्तवध्रिरृषिर्विकल्पेन॥आत्रेयगोत्रवचनेनानुवर्त्तते॥अग्निर्देवता।तुशब्दा
तउत्तरसूक्तमाग्नेयं।विशोविशोवइत्याद्याद्वादशर्चास्तेचत्वारोनुष्टुम्मुखास्तृचाःप्रगाथः।ततः विशोविशोवइत्यृक् अनुष्टुप्।यंजनासइत्यृक्।पत्यासंजा
तवेदसमित्यृक्।एतेद्वेगायत्र्यावित्येकोनुष्टुम्मुखस्तृचःप्रगाथः।ततःआगन्मवृत्रहन्तममित्यृक्अनुष्टुप्।अग्नेतंजातवेदसमित्यृक्।सबाधोयं
जनाइत्यृक्।एतेद्वेगायत्र्याविति द्वितीयोनुष्टुम्मुखस्तृचःप्रगाथः।ततःइयंतेनव्यसीमतिरित्यृक्·अनुष्टुप्।सानेअग्नइत्यृक्सापुष्टिरित्यृक्
एतेद्वेगायत्र्याविति·तृतीयोनुष्टुम्मुखस्तृचःप्रगाथः।ततःअश्वमिवत्यृक् अनुष्टुप्।यंत्वागोपवनइत्यृक्·यंत्वाजनासइत्यृक्।ए
तेद्वेगायत्र्याविति चतुर्थोनुष्टुम्मुखस्तृचःप्रगाथइति।अनुष्टुप्गायत्र्यौचानुष्टुम्मोनुष्टुम्मुखास्तृचाइत्यत्रइतिपरिभाषोक्तेः। एतास्त्वत्वारोनुष्टुम्मु
खाःप्रगाथाइत्यर्थः।अहंहुवानइत्यादितृचोदशाद्यास्तिस्रोनुष्टुभः।तार्क्ष्यानामराजपुत्रस्यश्रुतर्वणोनामराज्ञोदानस्तुतिःसूक्तवाक्ये
स्यर्थः।अस्यत्वंतस्यश्रुतर्वणोदानंदेनंदेवतेति।विशोविशोवोअतिथिमितिपुष्टिकामइत्यारण्यकेतथाआज्यशास्त्रेसूत्रकारःसुष्वाणहिषोळ
शावित्रयः।सुष्वाहीतिषोळशर्चंसूक्तं१६ आंगिरसपुत्रोविरूपोनामऋषिः।तुशब्दादग्निर्देवता·वत्सप्रेःप्राक्गायत्रीछंदःसुष्वाहिदेवहूत
मांअश्वांअग्नेरथीरिवेत्याज्यशास्त्रेब्राह्मणस्त्रयाः।इमंनुद्वादशकुरुसुतिःकाण्वः॥इमंनुमायिनमितिद्वादशर्चंसूक्तं११।कुरुसुतिर्नामऋ

305

१२ कण्वपुत्रः कुरुसुतिर्नामऋषिः अनादेशादिंद्रो देवता। वत्सप्रेः प्राक् गायत्री छंदः इमं नु मायिनं हुव इति पर्यासइति ब्राह्मणस्त्रयी॥ ॥अजज्ञानेकादशानि
गाथांते॥ ॥जज्ञानोनुशतक्रतुरित्येकादशर्चं सूक्तं ११ कुरुसुतिर्नामऋषिः॥ अनादेशाद् इंद्रो देवता· वत्सप्रेः प्राक् गायत्री छंदः॥ नतं वृषवं चाविदुरित्यृच
हती॥ तुविग्रीवं तइत्यृक् सतो बृहती॥ इत्येते द्वे तृचे कोनादेशाद् बार्हत प्रगाथ इत्यर्थः॥ जज्ञानोनुशतक्रतुरित्येका बृहती सहस्रशास्त्रे महाव्रतारण्यके। पु
रोळाशदशाबृहत्यंतं। पुरोळाशं न इति दशर्चं सूक्तं १० कुरुसुतिर्नामऋषिः अनादेशात् इंद्रो देवता। वत्सप्रेः प्राक् गायत्री छंदः॥ तं वां दस्रा हमित्यंत्यं
पुरोळाशं नो अंधस इति तिस्रो बृहती सहस्रशास्त्रे। ।अयं कृत्नुर्नवकृत्नुर्भार्गवः ।सौम्यमंत्यानुष्टुप्। अयं कृत्नुरितिनवर्चं सूक्तं ९ भृगुपुत्रः
कृत्नुर्नामऋषिः सोमो देवता। वत्सप्रेः प्राक् गायत्री छंदः। अपत्यस्वइत्यंत्या अनुष्टुप्। अयं कृत्नुरगृभीत इति पर्यासं वार्तं भावि विरस्त्रकारः। ।नह्यन्यं बळाक
घ्नैर्धस्तोगायनेत्यादेवीत्रिष्टुप्। ।नह्यन्यमितिदशर्चं सूक्तं १० नोधसपुत्रएकद्यूर्नामऋषिः। अनादेशादिंद्रो देवता॥ गायत्री छंदः॥ अर्वावधम्
त्यं भ्रंदे वेदत्यात्रिष्टुप् छंदस्थेति। अस्मिन्सूक्ते गायन्नइत्यनुष्टुबित्यंत्या त्रिष्टुप् उक्तेसातिमाय न वचनात् शिष्टा जगती नइति। त्रिष्टुबंतस्वस्य सू
स्य शिष्टा जगत्यइति परिभाषा वचनात् इत्यनुवादः नह्यन्यं बळाकरमित्येषोराज्ञपर्यायशास्त्रे सूत्रकारः। ।आत्वेनानवकुसीदीकाण्वः।आत्व
नइंद्रेतिनवर्चं सूक्तं ९ कण्वपुत्रः कुसीदीनामऋषिः अनादेशादिंद्रो देवता। वत्सप्रेः प्राक् गायत्री छंदः। आत्वनइंद्रक्षुमंतमितिरात्रिपर्यायशास्त्रे
सूत्रकारः। ।इतिश्रीमदृग्वेदानुक्रमणिदीपिकायां षष्ठाष्टके पंचमोध्यायः। ।आ म।आ मा द्रवेति नवर्चं सूक्तं। ९ पूर्ववत्सूक्तसंख्यानं कुसी
दीऋषिः। अनादेशादिंद्रो देवता। वत्सप्रेः प्राक् गायत्री छंदः आ प्र द्रवइति सूक्तं बृहतीसहस्रशास्त्रे महाव्रतारण्यके। ।देवानां वैश्वदेवं। देवानामिद

वइति नवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्येति। कुसीदीनामऋषिः। अन्यस्मादृषेर्वचनात्· विश्वेदेवा देवता· वत्सप्रेः प्राक् गायत्री छंदः। देवानामिदवो महद्
तिवैश्वदेवमिति ब्राह्मणस्त्रयी॥ प्रेष्ठमुशनाकाव्य आग्नेयं॥ प्रेष्ठं व इति नवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्येति· काव्यपुत्र उशनानामऋषिः अग्निर्दे
वता। वत्सप्रेः प्राक् गायत्री छंदः॥ प्रेष्ठं व इत्यत्र पिंगलमते अतिपादनिचृद्गायत्री। षड्सप्तकौ यो मध्ये स्यात् इति गायत्री भेद इत्यर्थः॥ प्रेष्ठं व इति सूक्तं
प्रातरनुवाकानुमंत्रणे सूत्रकारः ।आमेकृष्णआश्विनं हि। ।आमे हवमिति नवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्येति· आंगिरसपुत्रः कृष्णोनामऋषिः
अश्विनौ देवता॥ हिशब्दात् त्रीणि सूक्तान्यश्विदेवत्यानि· वत्सप्रेः प्राक् गायत्री छंदः॥ आमे हवमिति सूक्तं प्रातरनुवाकानुमंत्रणे सूत्रकारः॥ उ
भाहि पंच विश्वकोवाकाश्विजागतं॥ उभा हि दस्रेति पंचर्चं सूक्तं ५। कृष्णपुत्रो विश्वकोनामऋषिः। अथवांगिरसपुत्रः कृष्णोनामऋषिर्विकल्पेन· वा
विशिष्टत्वात् उत्तरत्र नानुवृत्तिः। हिशब्दात् अश्विनौ देवता। जगती छंदः। उभा हि दस्रेति सूक्तं प्रातरनुवाकानुमंत्रणे सूत्रकारः। ।द्युम्नीषट् वासि
ष्ठोवाद्युम्नीकः॥ प्रियमेधो वा प्रागाथं ह। द्युम्नी वामिति षळृचं सूक्तं ६ वासिष्ठपुत्रो द्युम्नीकनामऋषिः। अथवांगिरसपुत्रः प्रियमेधऋषिः। एतौ द्वे
पुक्तेः॥ अथ वा कृष्णांगिरसपुत्रः कृष्ण एवेति। ननु कृष्णपुत्रो विश्वकः प्रकृतोपि। वा विशिष्टत्वादुत्तरत्र नानुवृत्तिः। हिशब्दात् अश्विनौ दे
वता। अनादेशात् षळृचस्त्रयो बार्हत प्रगाथं छंदो बृहती सतोबृहत्यौ त्रय इत्यर्थः॥ हशब्दात् चत्वारि सूक्तानि बार्हत प्रगाथानि· द्युम्नी
वां सूक्तं प्रातरनुवाकानुमंत्रणे सूत्रकारः। तं वो दस्मं नोधाः॥ ॥तं वो दस्ममिति षळृचं सूक्तं ६ पूर्ववत्सूक्तसंख्येति· गौतमपुत्रो नोधा ऋ
षिः। अन्यच नवनोधागौतमइति पूर्वमित्युक्तं। अनादेशादिंद्रो देवता· हशब्दात् षळृचो बार्हत प्रगाथं छंदो बृहती सतोबृहत्यौ त्रयः प्रगाथ इत्य

र्थः। नरो दस्ममिति द्वृचो ब्राह्मणाच्छंसीशस्त्रे सूत्रकारः॥ बृहदिंद्राय सप्त नृमेधपुरुमेधौ घानुष्टुप्बृहत्यंतं॥ बृहदिंद्रायेति सप्तर्चं सूक्तं ७ आंगि
रसपुत्रौ नृमेधपुरुमेधौ। द्वावृषी सहापश्येतां। अनादेशात् इंद्रो देवता। बृहदिंद्रायेत्याद्यौ द्वृचौ हशब्दात् अनादेशात् बार्हतप्रगाथं छंदो बृहतीस
तोबृहत्यौ। ततः यज्ञायथेत्यृक्। तत्र यज्ञ इत्यृक् एते द्वे ऋचौ पंचमीषष्ठ्यावनुष्टुभौ। आमास्तुपदकमित्यंत्यर्क् बृहती॥ बृहदिंद्राय गायतेति द्वे ऋचौ
मरुत्वतीयशस्त्रे तृचावमहाव्रतारण्यके ब्राह्मणस्तुत्रयोः॥ आ नो विश्वासु षट्। आ नो विश्वास्विति षळृचं सूक्तं ६ पूर्ववत् नृमेधपुरुमेधौ द्वावृषी पश्ये
तां। अनादेशादिंद्रो देवता। हशब्दात् अनादेशात् पंक्तिस्त्रयो बार्हतप्रगाथं छंदो बृहतीसतोबृहत्यौ। आ नो विश्वास्विति सूक्तं रुद्रसहस्रशस्त्रे म
हाव्रतारण्यके। कन्यावाः सप्तात्रेय्यपालेतिहासैंद्रमानुष्टुभं द्विपंक्त्यादि॥ कन्यावाइति सप्तर्चं सूक्तं ७। अत्रिपुत्रिका अपालानाम्नी ऋषिका॥ यामधिकृत्या
पालानामतपश्चचारसामामनंति॥ ऐंद्र इतिहासोऽत्रोच्यत इति शेषः इतिहासस्वायं। अपालात्रिकन्यासीत् कन्यात्वग्दोषिणी पुरा। अलब्धवतुर्भगेवाति
भर्त्तारिकामतीपथी॥ सौम्याद्रसादिंद्रवद्धि रिति यज्ञैस्वस्वान्तश्रुतेः। अन्विक्षंति हेमलतां जलायावृत्तरत्तदा। सोममप्यविदत्कन्याध्यागाच्चापितुराश्रमं
तामिंद्रश्चकमे दृष्ट्वा विजने पितुराश्रमे। ततस्साबुबुधेसानुरर्थमिंद्रश्चकी त्तर्पितं। ऋश्यातऋसुरवो सोमं स्वैर्दंतैर्ग्राविभिः सह। तस्यास्तत्त्यानिरेके
णयया विंद्रश्चतन्मुखवात् निरगात्कश्चिदपूर्ववुषसहायितां महान्पुनः। उदकुंभमादायापामर्थे पस्साप्यगात्। ऋग्भिस्त्वाजगादेदं कुमारस्त्व
न्विषाति। अथाछद्रेणतामिंद्रः शकटस्य युगस्य च। प्रक्षिप्यानस्वकर्षित्रिस्ततः सा सुत्वचाभवत्। तस्याः पूर्वंहतायास्त्वमजातिः शकटोभवत्। उत्तरात्व

भवेत्राधात्कत्रसस्त्वथोत्तमइति। कन्यावाइति सूक्तदेवता अपालेंद्रश्च संवाद इत्यर्थः। अनादेशात् इंद्रः सर्वत्रेति कन्यावइत्याद्यौ द्वावृचौ पंक्ती।
आ च नेत्याद्याः पंचर्चः शेषा अनुष्टुभः। कन्यावाइति सूक्तं साध्याय धर्मः। पांतं त्रयस्त्रिंशत् कृतवक्षाः सुकक्षो वा घानुष्टुप्। पांतमाइति त्र य
यस्त्रिंशदृचं सूक्तं ३३ आंगिरसपुत्रः कृतकक्ष ऋषिः अथवांगिरसपुत्रः सुकक्षो नाम ऋषिर्विकल्पेन। अनुक्तगोत्रमांगिरसं विद्यादिति वच
नात्। अनादेशादिंद्रो देवता। वत्सपेः प्राक्गायत्रीछंदः। पांतमा व इत्याद्यर्क् अनुष्टुप्। पांतमा वो अंधस इति सूक्तं रात्रिपर्यायशस्त्रे ब्राह्मण
सुकक्षो॰ स्तुत्रयोः॥ ॥ उद्धेन्नु त्रिंशत्र्त्यैं द्वार्सवे॥ उद्धेदभीति चतुस्त्रिंशदृचं सूक्तं २४ पूर्ववत् कृतकक्ष ऋषिः। विकल्पेन कृतवक्ष इत्यर्थः। अना
देशात् इंद्रो देवता। वत्सपेः प्राक्गायत्री छंदः। इंद्र इषे इत्यंत्यर्क् इंद्रऋभुदेवत्यौ। इंद्र इषे ददातु न इति ब्राह्मणस्मृतेः। उद्धेदभीति सूक्तं
बृहतीसहस्रशस्त्रे महाव्रतारण्यके॥ गौर्द्धयति द्वादश बिंदुः पूतदक्षो वा मारुतं॥ गौर्धयतीति द्वादशर्चं सूक्तं १२ आंगिरसपुत्रो बिंदुर्नाम ऋ
षिः। अथवांगिरसपुत्रः पूतदक्षो नाम ऋषिर्विकल्पेन। मरुतो देवता। वत्सपेः प्राक्गायत्री छंदः। गौर्धयति मरुतामिति सूक्तं त्रिष्वनुरूपावित्ति
सूत्रकारः। आ त्वा नव तिरश्चीरांगिरसमानुष्टुभं। आ त्वा गिर इति नवर्चं सूक्तं ९ आंगिरसपुत्रस्तिरश्चीनाम ऋषिः। अनादेशात् इंद्रो देवता। अनु
ष्टुप्छंदः। आ त्वा गिरो रथीरिवेति सूक्तं मैत्रेकम् इति सूत्रकारः। अस्मै से काद्युतानो वा मारुतस्त्रैष्टुभं चतुर्थी विराट् श्यामीति मध्यमः पादः प
रैंद्रो वा बार्हस्पत्यो वा। अस्मा उ षु प्रभूतय इत्येकविंशत्यृचं सूक्तं २१ आनिरुक्तासंरवेति मरुतपुत्रो द्युतानो नाम ऋषिः अथवा मरुतस्तिरश्चीनाम सार्षं
विकल्पेन॥ वार्षशिष्टत्वात् उत्तरत्रानानुवृत्तिः। अनादेशात् इंद्रो देवता। त्रिष्टुप्छंदः। मन्ये त्वा यज्ञियामिति चतुर्थीसूक्तरदशास्त्रात्रुपदा।

विराट्छंदः पंक्तिर्वेदः ॥ अथवा त्रिष्टुप्‌दशाविराड्दशकैरिति परिभाषोक्तेः ॥ दशाक्षरा विराडिति श्रुतेः ॥ ततः इममपश्यमिति ऋक् एतस्य चतुर्थ पाद
कृष्णाभिवो च पणइति मरुद्देवत्यः ॥ केचित्तु शाखांतरे पाठः ॥ कृष्णा भिवो मरुतो युष्यता जाता वा तस्य युत इत्यर्थः ॥ ततः अधद्रप्सो अंशुमत्या इत्यृचः ॥
स्याई द्राबृहति देवत्या ॥ अस्मा उपास इति सूक्तं स्वाध्यायधर्मः ॥ याइंद्र पंचोनारेभः काश्यपो बार्हत मित्यु परि ष्टाद्बृहत्या विति जगती त्रिष्टुप्
जगती तत ॥ याइंद्र भुज इति पंचदशर्चं सूक्तं ७५ आनरुक्त्वा संख्येति । कश्यपपुत्रो रेभो नाम ऋषिः अनादेशात् इंद्रो देवता ॥ बृहती छंदः ॥ विश्वाः
पृतना इति दशम्यृक् आद्या जगती द्विपंचा दशाक्षरा । समीरेभास इत्येकादश्यृक् उपरिष्टाद्बृहती । अंत्याश्चेति । नेमिंनमंतीति द्वादश्य
ऋ उपरिष्टाद्बृहती । अंत्याश्चेति । तमिंद्रं जोहवीतिच योदश्यृक् आद्या जगती द्विपंचा रादक्षरा । त्वं पुर इंद्रेति चतुर्दश्यृक् त्रिष्टुप् । तत्
सतमित्यंत्यर्क् जगती । याइंद्र भुज आभर इति नव ऋदो हाइति बृहती सहस्राख्ये महाव्रतारण्यके ॥ ॥ इति श्रीमदृग्वेदानुक्रमणि
दीपिकायां षष्ठाष्टके षष्ठोध्यायः ॥ ॥ इंद्राय द्वादशान्मेध ओष्णिहं समन्युं पांत्येच ककुभ्यौ त्वानवम्यौ पुर उष्णिहौ ॥ इंद्राय सोमेति द्वादश
र्चं सूक्तं १२ आंगिरसपुत्रो नृमेध ऋषिः ॥ अनादेशात् इंद्रो देवता अनादेशात् इंद्रो देवता । उष्णिक् छंदः ॥ ततः अधा हींद्रेति सप्तम्यृक्
त्वं न इंद्रासरेत्यृक् । त्वां हि नः पिता वसा वित्यु पांत्ये द्वे चकारात् ॥ एते त्रयः ककुबुष्णिहः मध्यम श्चेदिति । ततः युंजंति हरी हाति नवम्यृक् ।
त्वां हि शश्वदिति त्वंत्यर्क् एते द्वे ऋचौ पुर उष्णिहौ । आद्य श्चेदिति । इंद्राय साम गायते ति सूक्तं बृहती सहस्राख्ये महाव्रतारण्यके ॥ १०४

२८

त्वा मिद्धि होत्र गाथं । त्वामिद्धि इत्यष्टर्चं सूक्तं ८ नृमेध ऋषिः अनादेशात् इंद्रो देवता । चत्वारि बार्हत प्रगाथं छंदो बृहती सतो बृहत्यौ । त्वामिदा
ह्योनर इति सूक्तं बृहती सहस्राख्ये महाव्रतारण्यके । अयं ते हादने मो भार्गव स्त्रैष्टुभं षष्ठी जगती । तिस्रो नुष्टुभो ष्टमी सोपण्ङ्क्ति नवमी वज्र संस्कृतिर
यमिति द्वे नेंद्र आत्मानमस्तौत् उपांत्ये वाच्यौ । । अयं त एमीति द्वादशर्चं सूक्तं १२ भृगु पुत्रो नेमो नाम ऋषिः अनादेशात् इंद्रो देवता । त्रिष्टुप् छंदः ॥ विश्वेत्ता त
इति षष्ठी ऋक् जगती । प्रनूनं धावतेति सप्तम्याद्याः तिस्रो नुष्टुभः ॥ आसामृचां मध्यमे मनोजव इत्य ष्टम्यृक् सुपर्ण देवत्या । समुद्रे अंतरिति नवम्यृक्
वज्रसंस्कृतिः । तस्य वज्रो देवतेति । ततः अयं त एमीति द्वे ऋचौ इंद्र आत्मानमस्तौत् संस्कृतिः तस्य द्वे चस्येंद्र ऋषिः इंद्रो देवते ति । ततः यद्वाग्वदंतीत्युपांत्ये द्वे ऋचौ
वाग्देवत्यौ ॥ अयं त एमीति सूक्तं स्वाध्याय धर्मः ॥ ऋध कृ षोक्त्यजमदग्निर्भार्गवो मैत्रावरुणं प्रगाथं त्रिष्टुबं तं तृतीया गायत्री परा सतो बृहती स्तो
त्रं राजसु ऋक् सपादादित्याश्विन्यौ वायव्यै सौर्यो बृहत्युषस्या सूर्यप्रभा स्तुतिर्वा पावमानी गव्ये ॥ ॥ ऋधगित्था स पोक्त्यर्चं सूक्तं १६ भृगुपुत्रो जमदग्नि ऋषिः
मित्रावरुणौ देवता । ततः ऋधगित्थेत्याद्य द्वे अनादेशात् बार्हत प्रगाथो बृहती सतो बृहत्यौ ॥ प्रजा हात्स्र इत्यंतस्तृतीय स्त्रिष्टुभः ॥ प्रयो वां मित्रा वरुणे तितृतीयर्क्
गायत्री परा नपः संश्छे नेति चतुर्थ ऋक् सतो बृहती । ततः प्रमित्राय प्रार्यम्ण इत्यगस्य चतुर्थ पाद स्तोत्रं राजस्तु गायतेति तो हास्तिरइत्यृक् एता सैव पंचपदा
आदित्य देवत्याः ॥ ततः आ मे वचांस्यृक् । शतं यद्वामित्यृक् एते द्वे ऋचावाश्विदेवत्यौ । ततः आ नो यज्ञमित्यृक् वेत्य ध्वयुरित्यृक् एते द्वे ऋचौ वायुदेवत्यौ । ततः
बण्महाँ असीत्यृक् बट् सूर्येत्यृक् एते द्वे ऋचौ सूर्यदेवत्यौ । इयं या नीच्येत्यृक् पावमानी देवत्या बृहती छंदश्चेति अथवा सूर्यप्रभा स्तुतिर्विकल्पेन से
श्वेरेतत्पर्य प्रजा हा तिस्र इत्यृक् पावमानी देवत्या ॥ माता रुद्राणामित्यंत्ये द्वे ऋचौ गोदेवत्यौ । ततः प्रमित्रयेति द्वे ऋचः । आ मे वचांसीति द्वे च । आ नो यज्ञ

मितिहृचः॥ त्वमहानीतिहृचः इत्येताश्चत्वारोहृचोनादेशात्बार्हतप्रगाथंछंदो बृहतीसतोबृहत्यौ। चत्वारःप्रगाथइत्यर्थः॥ऋधामिथासमर्त्यइतिस्
क्तांतर्गतेषानोयज्ञमितिहृचः॥ प्रउगशस्त्रेतथात्वमहांअसीतिसूर्यस्त्रकाः शंसनेब्राह्मणस्त्वयेः॥त्वमग्नेद्याधिकापार्गवःप्रयोगोबार्हस्पत्योवाग्निः
पावकः॥ सहसःस्कतयोर्वाग्न्योर्गृहपतियविष्ठयोर्वान्यतरआग्नेयंतु॥त्वमग्नेबृहदितिद्वाविंशत्यृचंसूक्तं २२ आनरुक्तासंख्येति। भृगुपुत्रःप्रयोगनामऋ
षिः॥अथवाबृहस्पतिपुत्रःपावकाग्निःशोषेणोग्निऋषिः॥अथवासहोनाम्नःपुत्रोद्वौगृहपतियविष्ठाविति संज्ञावग्नीऋषीसहापरयतां॥ अथवान्यो
त्यतश्चेति। अग्निर्देवता। तुराद्यावुत्तरसूक्तमाग्नेयं॥ वत्सप्रेःप्राक्गायत्रीछंदः॥ त्वमग्नेबृहद्वयइतिसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः॥ ॥अदर्शि
षट्कनासोमरिबार्हतंपंचमीविराडूपासप्तम्याद्ययुजःसतोबृहत्योष्टम्याद्ययुजः ककुब्ककसीयसीककुबनुष्टुबंत्याग्निमारुती॥अदर्शिगातुवित्त
मइतिचतुर्दशार्चंसूक्तं १४ आनरुक्तासंख्येति कण्वपुत्रःसोभरिऋषिः॥तुराद्वादग्निर्देवता। बृहतीछंदः॥ सदर्श्वेत्तिदितिपंचम्यकाविराडूपात्रिष्टु
पूभेदः॥ एकादशिन्यस्त्रयोष्टकन्योदि॥ ततःअश्वंनगीर्भिरितिसप्तम्यकू॥ आवंसतइतिनवम्यकू। उदितायइकादश्यकू। मोतेरपन्योत्तित्रयोदश्यकू
इत्येताश्चतस्त्रः अयुजोविषमाःसतोबृहत्यः॥ अयुजोजागतावितिसप्तम्याद्ययुजइत्यर्थः॥ ततःप्रमंहिष्ठायेत्यष्टम्यककुप्उष्णिमध्यस्थेव॥
प्रेष्ठमुप्रियाणामितिदशम्यककुसीयसीगायत्रीभेदः॥ द्वौककुभौसप्तकन्येति। मानोहणीतामितिद्वादश्यककुबुष्णिकमध्येमस्थेव॥आग्नेयाहि
तिचतुर्दश्यकअनुष्टुप्साग्निमरुद्देवतेति। एताश्चतस्त्रयुजःसमाः॥अष्टम्यादियुजइत्यर्थः॥अदर्शिगातुवित्तमसप्तैतबार्हतमितिप्रा

तरनुवाकानुमंत्रणेसूत्रकारः॥ सूक्तानांनवतिर्द्वेचस्तक्तेमंडलमुत्तमं॥ कण्वादीनांप्रगाथशोर्धैरनुवाकाद्दशैवतु॥ सूक्तसंख्याष्टमेमंडले ९२ अनुवा
कक्रमोलिख्यते॥ मान्चिदन्यत्। यइंद्रसोमपातमः। इंद्रःसुतेषु। वयमुत्वामपूर्व्य। यथजाति। इमेविप्रस्य। अग्नआयाहि। योराजा। आतूनइंद्र। गौर्द्धं
यति। इतिदशानुवाकानि॥ इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांप्रगाथार्धेराख्याष्टमंमंडलंसंपूर्णं॥ अथनवमंमंडलमित्यधिकृत्यपरिभाषते।
ध्यानार्चननमस्कारःस्तुतियागादिकर्मभिः। पुनातिवद्धःसोमात्माषवमानःसमावतु॥ ॥नवमंमंडलंपावमानंसौम्यं॥ वक्ष्यमाणनवमंमं
डलंसर्वंसोमदेवत्यं। सचसोमःपावमान्यकगुणकइति। पवमानमितिविशेषणं॥सोमस्यपृथक्कारणमिति॥ क्वचित्सोमापवादस्तान्या
देरपिपावमानगुणत्वार्थं॥ तथाचमंत्रलिंगंसूत्रे॥अग्नेःपावमानस्येति। अग्नआयूंषीत्यादितस्यर्चोगृहे। अग्नआयूंषिपवसेग्नेपवस्वस्व
पाः॥ इत्येतेश्रौतेमंत्रेदृष्टे॥ अत्रसौम्यत्वायनवमंमंडलमितिवक्ष्यत्यार्थं॥अस्मिन्मंडलादिषोग्नेयत्वापवादइति॥स्वादिष्ठयादशमधुछंदः॥ स्वादिष्ठयेति
दशार्चंसूक्तं १० विश्वामित्रपुत्रोमधुछंदाऋषिः॥अग्निंनवमधुछंदावैश्वानरइत्युक्तं। पवमानसोमोदेवता। पवमानपावकसोमस्यगुणाः॥ वत्सप्रेःप्रा
क्गायत्रीछंदः॥ पवस्वमेध्यातिथिः। पवस्वदेववीरितिदशार्चंसूक्तं १० पूर्ववत्सूक्तसंख्येति। कण्वपुत्रोमेध्यातिथिऋषिः। पवमानगुणःसोमोदेवता। व
त्सप्रेःप्राक्गायत्रीछंदः॥ एषदेवःशुनःशेपः॥ एषदेवइतिदशार्चंसूक्तं १० पूर्ववत्सूक्तसंख्येति। अजीगर्तपुत्रःशुनःशेपऋषिः॥ पवमानगुणः
सोमोदेवता॥ वत्सप्रेःप्राक्गायत्रीछंदः॥ सनहिरण्यस्तूपः॥ सनाचसोमेतिदशार्चंसूक्तं १० पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रोहिरण्यस्तू
पऋषिः॥ पवमानगुणःसोमोदेवता। वत्सप्रेःप्राक्गायत्रीछंदः॥ सप्तिमिद्रएकादशाकाश्यपासितोदेवलोवाविंशतिःसूक्तान्यावमापि

१०६ पञ्चमुरनुष्टुबंतं॥ समिद्धो विश्वतइकादशर्चं सूक्तं। कश्यपपुत्रोऽसितऋषिः। अथवा कश्यपपुत्रो देवलो नामऋषिर्विकल्पेन। तत्र समिद्धो विश्व
तइत्यादिविंशतिः सूक्तानि कश्यपासितदेवलानि॥ प्रसोमासोऽधन्विषुरित्यंतानि आकृष्टइत्युतागस्त्यानि। तत्राद्यवचनात्समिद्धो विश्वतइत्या
दाविश्वेदेवाः स्वाहाकृतमित्यंतः। आप्रीसूक्तोक्तदेवता। एकादशाद्यृचः। इदंतन्न पादेवतं सूक्तं। नराशंसवर्जं। अत्राग्निदेवतत्वे केसलिनरम्नंमंडलं
सोमदेवत्यप्रवादः एकादशर्चाः। पवमानसोमोदेवता। आतिस्तिकाइत्यर्थः। नतु विंशतिः सूक्तानीतिवाच्यं॥ तत्र कारिका। इतित्वाच्चेलघुत्वार्थमिति
चेतइक्ष्वनुनि। अनुष्टुभश्चतस्रोऽत्यागायत्र्यः सप्तचोदितः। ततः भारती पवमानस्येत्याद्याश्चतस्रोऽत्यानुष्टुभः शेषा वत्सप्रेः प्राक्गायत्रीछंदः।
मंद्रयानव। मंद्रयासोमेतिनवर्चं सूक्तं। ९ असितनामऋषिः। विकल्पेनदेवलऋषिः। तौ द्वौ काश्यपौत्यंनौ। पवमानगुणः सोमोदेवता। वत्सप्रेः
प्राक्गायत्रीछंदः। असृग्रं। असृग्रमिंदवइतिनवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्येति। असितऋषिः विकल्पेनदेवलः। तौ द्वौ काश्यपौ। पवमानगुणः
सोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। प्रस्वानासः। प्रस्वानासइतिनवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्येति। असितऋषिः। विकल्पेनदेवलश्चैतौ द्वौ काश्यपौ।
पवमानगुणः सोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। उपास्मै। उपास्मैगायतेतिनवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्येति। असितऋषिः। विकल्पेन
देवलश्चैतौ द्वौ काश्यपौ। पवमानगुणः सोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः॥ सोमाअसृग्रं॥ सोमाअसृग्रमितिनवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्ये
ति॥ असितऋषिः॥ विकल्पेनदेवलश्चैतौ द्वौ काश्यपौ। पवमानगुणः सोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। ।श्रीमदृग्वेदानुक्रमणिदीपि १०६

कांषष्ठाष्टकस्यसप्तमोऽध्यायः। सोमः। सोमःपुनानइतिनवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्येति। असितऋषिः विकल्पेनदेवश्चैतौ द्वौ काश्यपौ। पवमान
गुणः सोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। परिप्रासिष्ये॥ परिप्रासिष्यदित्यष्टर्चं सूक्तं ८ असितऋषिः॥ विकल्पेनदेवलश्चैतौ द्वौ काश्यपौ॥ पवमान
गुणः सोमोदेवता॥ वत्सप्रेः प्राक्गायत्रीछंदः। एषधिया। एषधियेत्यष्टर्चं सूक्तं ८ पूर्ववत्सूक्तसंख्येति। असितऋषिः विकल्पेनदेवलश्चैतौ द्वौ काश्य
पौ। पवमानगुणः सोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। प्रते। प्रतेसोतारइत्यष्टर्चं सूक्तं ८ पूर्ववत्सूक्तसंख्येति। असितऋषिः विकल्पेनदेवलश्चै
तौ द्वौ काश्यपौ। पवमानगुणः सोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। प्रनिम्नेनेव। प्रनिम्नेनेत्यष्टर्चं सूक्तं ८ पूर्ववत्सूक्तसंख्येति। असितऋषिः
विकल्पेनदेवलश्चैतौ द्वौ काश्यपौ॥ पवमानगुणः सोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। परिस्कवानः सप्त परिस्कवानइतिसप्तर्चं सूक्तं ७ असित
ऋषिः। विकल्पेनदेवलश्चैतौ द्वौ काश्यपौ। पवमानगुणः सोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। यत्सोम। यत्सोमचित्रमितिसप्तर्चं सूक्तं ७
पूर्ववत्सूक्तसंख्येति। असितऋषिः। विकल्पेनदेवलश्चैतौ द्वौ काश्यपौ॥ पवमानगुणः सोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। प्रकविः। प्रक
विरितिसप्तर्चं सूक्तं ७ पूर्ववत्सूक्तसंख्येति असितऋषिः विकल्पेनदेवलश्चैतौ द्वौ काश्यपौ। पवमानगुणः सोमोदेवता। वत्सप्रेः प्राक्गायत्री
छंदः। एतेधावंति। एतेधावंतीतिसप्तर्चं सूक्तं ७ पूर्ववत्सूक्तसंख्येति असितऋषिः विकल्पेनदेवलश्चैतौ द्वौ काश्यपौ। पवमानगुणः सोमोदेव
ता। वत्सप्रेः प्राक्गायत्रीछंदः एतेसोमासः एतेसोमासइतिसप्तर्चं सूक्तं पूर्ववत्सूक्तसंख्येति असितऋषिः विकल्पेनदेवलश्चैतौ द्वौ का

श्यपो। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः सोमाअसृग्रं सोमाअसृग्रमितिसप्तर्चंसूक्तं ७ पूर्ववत्सूक्तसंख्येति। असितऋषिः
विकल्पेनदेवलश्चैतौद्वौकाश्यपौ। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः प्रसोमासः प्रसोमासइतिसप्तर्चंसूक्तं ७ पूर्ववत्सूक्त
संख्येति। असितऋषिः केविकल्पेनदेवलऋषिः एतौद्वौकाश्यपगोत्रोत्पन्नौ। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। असितदेव
लौःयोःपूर्वोक्ताविः। पवस्वइन्दुदृळ्हच्युतआगस्त्यः। पवस्वदक्षसाधनइतिषळर्चंसूक्तं ६ अगस्त्यपुत्रोदृढच्युतोनामऋषिः। पवमानगुणःसोमोदेव
ता। वत्सप्रेः प्राक्गायत्रीछंदः॥ तमस्रक्षंतेध्मवाहोदार्ढच्युतः॥ तमस्रक्षंतेतिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। दृढच्युतपुत्रइध्मवाहोना
मऋषिः। अगस्त्यीनामगस्त्युदार्ढच्युतेध्मवाहेतित्रप्रवराध्यायवचनात्। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। एषकविर्नृ
मेधः। एषकविरितिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रोनृमेधऋषिः। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः।
एषवाजीप्रियमेधः। एषवाजीतिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रःप्रियमेधऋषिः। पवमानगुणःसोमोदेवता। वत्सप्रेः प्रा
क्गायत्रीछंदः प्रास्यन्नृमेधः प्रास्यधाराइतिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रोनृमेधऋषिः। पवमानगुणःसोमोदेव
ता। वत्सप्रेः प्राक्गायत्रीछंदः। प्रधाराबिंदुः प्रधाराअस्येतिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रोबिंदुनामऋषिः। पवमान
गुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। प्रसोमासोगोतमः प्रसोमासःस्वाध्यइतिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। रहू

गणपुत्रोगोतमऋषिः। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः प्रसोमासःश्यावाश्वः प्रसोमासोमदच्युतइतिषळर्चंसूक्तं।
६ पूर्ववत्सूक्तसंख्येति। अत्रिपुत्रःश्यावाश्वऋषिः पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः प्रसोमासस्त्रितः प्रसोमासोविप
श्चितइतिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। आप्त्यपुत्रस्त्रितऋषिः। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। प्रसुवानः प्रसु
वानासइतिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। पूर्ववत्त्रितऋषिः। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। आनःपवस्वप्रभू
वसुः। आनःपवस्वेतिषळर्चंसूक्तं। ६ पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रःप्रभूवसुऋषिः। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गाय
त्रीछंदः। असार्जि असर्जिरथ्यइतिषळर्चंसूक्तं। पूर्ववत्सूक्तसंख्येति। प्रभूवसुऋषिः पवमानगुणःसोमोदेवता॥ वत्सप्रेः प्राक्गायत्रीछं
दः। ससुतोरहूगणः ससुतइतिषळर्चंसूक्तं। पूर्व॰ सूक्तसंख्येति। आंगिरसपुत्रोराहूगणऋषिः। पवमान॰ सोमोदे॰ वत्सप्रेः प्राक्गा॰ छंदः
एषउस्य॥ एषउस्यइतिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। रहूगणऋषिः। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्रीछंदः। आशुरर्ष
बृहन्मतिः। आशुरर्षेतिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रोबृहन्मतिऋषिः। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्गायत्री
छंदः पुनानः पुनानोअक्रमीदितिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। पूर्ववद्बृहन्मतिऋषिः। पवमानगुणःसोमोदेवता। वत्सप्रेः प्राक्
गायत्रीछंदः। प्रयेगावोमेध्यातिथिः। प्रयेगावइतिषळर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। कण्वपुत्रोमेध्यातिथिऋषिः। पवमानगुणःसो

१०८ मोदेवता।वत्सप्रेःआर्कगायत्रीछंदः।जनयन्।जनयन्नितिषळृचंसूक्तं ६ पूर्ववत्सूक्तसंख्येति।मेध्यातिथिर्ऋषिः।पवमानगुणःसोमोदेवता।वत्सप्रेः
आर्कगायत्रीछंदः।योअत्यइव।योअत्यइवेतिषळृचंसूक्तं६ पूर्ववत्सूक्तसंख्येति।मेध्यातिथिर्ऋषिः।अन्यस्मादृषेर्वचनात्।पवमानगुणःसोमो
देवता।वत्सप्रेःआर्कगायत्रीछंदः॥ ॥इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांडोपलोपनामकभट्टकनगणेशकृतौषष्ठाष्टकःसमाप्तः॥ ॥
प्रणो।अयास्यः॥प्रणइंदवइतिषळृचंसूक्तं।आंगिरसपुत्रोअयास्यऋषिः।पवमानगुणःसोमोदेवता।वत्सप्रेःआर्कः दः।सपवस्व॥सपव
स्वेतिषळृचंसूक्तं६ पूर्ववत् ख्येति।अयास्यऋषिः।अनुक्तगोत्रमांगिरसंविद्यादितिवचनात्॥पवमानगुणःसोमोदेवता।वत्सप्रेःआर्कगा
यत्रीछंदः॥ असृग्रन् असृग्रन्नितिषळृचंसूक्तं६ पूर्ववत्सूक्तसंख्येति।अयास्यऋषिः अन्यस्मादृषेर्वचनात् पवमानगुणःसोमोदेवता॥
वत्सप्रेःआर्कगायत्रीछंदः। ।अयासोमःपंचकविर्भार्गवः॥ ॥अयासोमइतिपंचर्चंसूक्तं ५ भृगुपुत्रःकविर्नामऋषिः।पवमानगुणःसोमोदेव
ता।वत्सप्रेःआर्कगायत्रीछंदः। ।तंत्वा। ।तंत्वानृम्णानीतिपंचर्चंसूक्तं५ पूर्ववत्सूक्तसंख्येति। पूर्ववत्।कविर्नामऋषिः पवमानगुणःसोमो
देवता।वत्सप्रेःआर्कगायत्रीछंदः। पवस्व पवस्वदक्षसाधनमितिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति।कविर्नामऋषिः।पवमानगुणःसोमोदेवता व
त्सप्रेःआर्कगायत्रीछंदः। ।उत्तेशुष्मास‍उचथ्यः॥ उत्तेशुष्मासइतिपंचर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति आंगिरसपुत्रउचथ्यऋषिः प
वमानगुणःसोमोदेवता।वत्सप्रेःआर्कगायत्रीछंदः।अध्वर्यो। अध्वर्योअद्रिभिरितिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति पूर्ववत्उचथ्यऋषिः १०८

पवमानगुणःसोमोदेवता।वत्सप्रेःआर्कगायत्रीछंदः॥ परिद्युक्षः॥परिद्युक्षइतिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति पूर्ववत्उचथ्यऋषिः।पवमान
गुणःसोमोदेवता।वत्सप्रेःआर्कगायत्रीछंदः। ।उत्तेचतुष्कमवत्सारः। ।उत्तेशुष्माइतिचतुर्ऋचंसूक्तं ४ कश्यपपुत्रोवत्सारऋषिः।पवमा
नगुणःसोमोदेवता।वत्सप्रेःआर्कगायत्रीछंदः। ।अस्यप्रत्नां।अस्यप्रत्नामितिचतुर्ऋचंसूक्तं ४ पूर्ववत्सूक्तसंख्येति पूर्ववत्अवत्सारऋषिः।
पवमानगुणःसोमोदेवता।वत्सप्रेःआर्कगायत्रीछंदः यवंयवं॥यवंयवमितिचतुर्ऋचंसूक्तं ४ पूर्ववत्सूक्तसंख्येति अवत्सारऋषिःपवमान
गुणःसोमोदेवता॥वत्सप्रेःआर्कगायत्रीछंदः॥ परिसोमः॥परिसोमाइतिचतुर्ऋचंसूक्तं ४ पूर्ववत्सूक्तसंख्येति।अवत्सारऋषिः।पवमानगु
णःसोमोदेवता।वत्सप्रेःआर्कगायत्रीछंदः। प्रतेधाराः॥प्रतेधाराइतिचतुर्ऋचंसूक्तं ४ पूर्ववत्सूक्तसंख्येति।अवत्सारऋषिः।पवमानगु
णःसोमोदेवता।वत्सप्रेःआर्कगायत्रीछंदः। तरत्सः।तरत्समंदीतिचतुर्ऋचंसूक्तं४ पूर्ववत्सूक्तसंख्येति।अवत्सारऋषिःपवमानगुणःसो
मोदेवता।वत्सप्रेःआर्कगायत्रीछंदः। पवस्व।पवस्वगोजिदितिचतुर्ऋचंसूक्तं४ पूर्ववत्सूक्तसंख्येति अवत्सारऋषिःपवमानगुणःसोमो
मोदेवता।वत्सप्रेःआर्कगायत्रीछंदः। प्रगायत्रेणपांत्याऽपुरउष्णिक्।। प्रगायत्रेणेतिचतुर्ऋचंसूक्तं ४ पूर्ववत्सूक्तसंख्येति अवत्सारऋषिः॥
अन्यस्मादृषेर्वचनात्।काश्यपोवत्सारस्तंप्रत्यत्सक्तं।पवमानगुणःसोमोदेवता।वत्सप्रेःआर्कगायत्रीछंदः आतवारानित्यपांत्यर्कपुरउष्णि
क्‌आद्यश्चेत्। ।अयावीतीत्रिंशदमहीयुः अयावीतीत्रिंशदृचंसूक्तं ३० आंगिरसपुत्रआमहीयुर्ऋषिः।पवमानगुणःसोमोदेवता।वत्सप्रेः

माकुगायत्रीछंदः। एतेअसृग्रंजमदग्निः। एतेअसृग्रमित्येतत्त्रिंशदृचंसूक्तं ३० भृगुपुत्रोजमदग्निरृषिः पवमानगुणः सोमोदेवता। वत्सप्रेः प्राकुगाय
त्रीछंदः। अथापवस्वनिध्रुविः काश्यपः॥ आपवस्वेत्येतत्त्रिंशदृचंसूक्तं ३० पूर्ववत्सूक्तसंख्येति। कश्यपपुत्रोनिध्रुविरृषिः पवमानगुणः सो
मोदेवता। वत्सप्रेः ० छंदः॥ इषासोमकश्यपः॥ इषासोमेत्येतत्त्रिंशदृचंसूक्तं ३० मरीचिपुत्रः कश्यपऋषिः॥ पवमा० सोमोदे० वत्सप्रेः ० गा० छं०॥
॥ ॥ इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांडोरवलोपनामकश्रमदृक्तगणेशकृतौसप्तमस्यप्रथमोध्यायः॥ ॥हिन्वंतिभृगुर्वारुणिर्जमदग्निर्वा
॥हिन्वंतिसूरमित्येतत्त्रिंशदृचंसूक्तं ३० पूर्ववत्सूक्तसंख्येति। वरुणपुत्रोभृगुर्नामऋषिः भृगुर्वैवारुणिरित्येतत्तैत्तिरीयोपनिषदश्रुतेः अथवाभृगुपुत्रो
जमदग्निरृषिर्विकल्पेन। पवमानगुणः सोमोदेवता। वत्सप्रेः प्राकुगायत्रीछंदः। पवस्वशतंवैखानसाअष्टादश्यनुष्टुप्। परास्तिस्रआग्नेय्यः
॥ ॥पवस्वविश्वचर्षणइत्येतत्त्रिंशदृचंसूक्तं ३० पूर्ववत्सूक्तसंख्येति। वैखानसानामृषयः। शतंऋषयेदमपश्यत्। सूक्तंदशर्षेरित्यर्थः।
नेयामांगिरसत्वंस्मात्। उपदेशोपदर्शनात्। यथापौरुषेयसूक्तेनारायणस्यतुयथोपदेशमित्येवसर्वत्रानुवर्तते॥ कारिका। पवस्वेत्यपयः सू
क्तंशतंवैखानसाविदुरिति॥ इत्येतावदार्षानुक्रमण्यामित्यर्थः। पवमानगुणः सोमोदेवता। वत्सप्रेः प्राकुगायत्रीछंदः। त्वंसोमसूरएषइ
त्यष्टादश्यनुष्टुप्। ततः। अग्नआयूंषिपवसइत्याद्याः परास्तिस्रोग्निदेवत्याः। पवमानगुणोग्निरिति। नसोमइत्यर्थः। ।त्वंसोमा
सिद्वात्रिंशद्भरद्वाजः कश्यपोगोतमोत्रिर्विश्वामित्रोजमदग्निर्वसिष्ठइतीहतृचाः। सप्तऋषयः। शेषेपवित्रेवसिष्ठोवाप्रोवापवस्वसो
मतिस्रोनित्याद्विपदागायत्र्यो। वितानस्तिस्रःपोष्टोवायचेपावस्त्रंपंचाग्नेय्यःसावित्र्यग्निसावित्रीवैश्वदेवीवासामीत्यास्त्रिंशीपुरउष्णि

क्ससप्तावेश्यपतुएवंतेचदेपावमान्यध्येतृक्की॥ ॥त्वंसोमासीतिद्वात्रिंशदृचंसूक्तं ३२ भरद्वाजइत्याद्याः सप्तर्षयः सप्ततृचोद्रष्टारइति। आद
तः प्रत्येकंक्रमेणतृचदर्शनमित्युच्यंते। तत्रत्वंसोमासीत्याद्यस्तृचोबृहस्पतिपुत्रोभरद्वाजऋषिः। ततः इंदुर्हिन्वानइतिद्वितीयतृचोमरीचिपुत्रः
कश्यपऋषिः। ततः पवमानासइंदवइतितृतीयतृचोरहूगणपुत्रोगोतमऋषिः। ततः अविद्वानोअज्यावेश्वइतिचतुर्थतृचोभूमिपुत्रोत्रिऋषिः
ततः वाचोजंतुरितिपंचमतृचोगाधीपुत्रोविश्वामित्रऋषिः। ततः पवस्वसोममंदयन्नितिषष्ठतृचोभृगुपुत्रोजमदग्निऋषिः। ततः आपवानुंन्व
इतिसप्तमतृचोमैत्रावरुणपुत्रोवसिष्ठऋषिः। इत्यादिसप्ततृचाः क्रमेणसप्तर्षयोज्ञातव्याः। हृइत्प्रसिद्धावेवनामकमकाएवेसप्तर्षयइत्य
र्थः। सप्तर्षयः प्रागाथमित्यादौवेवनामकाभवंतीत्यर्थः। केवलंसप्तसुक्तोप्रसिद्धेरेषामेवग्रहणेप्येषक्रमोदुर्लभः स्यात्। उक्तिप्रणयनयैवप्रसिद्धइ
त्येकविंशत्यृचगताः। शेषाएकादशर्चः। पवमानः सोमोअघनइत्याद्याः। आंगिरसपुत्रः पवित्रोनामऋषिः अथवामैत्रावरुणपुत्रोवसिष्ठऋषिर्विक
ल्पेन। अथवापवित्रवसिष्ठावुभौसहैवपश्यतां। ततः पवस्वसोममंदयन्नितिक्रमेणतिस्रोनित्याद्विपदागायत्र्योष्टाक्षराः पादाइत्यर्थः। नित्यशब्दइ
त्यध्ययनेतिद्विर्द्विपदेतिनिवृत्त्यर्थं। गायत्र्यइतिशब्दात्विंशिकाद्विपदाभावः। ततः आवितानोअजाश्वइत्याद्यास्तिस्रः पूषादेवत्याः। विकल्पेन
पवमानसोमदेवत्याः। ततः यत्तेपवित्रमर्चिषीत्याद्याः पंचर्चोग्निदेवत्याः। आसांपंचानामृचामंत्यस्तृचउभाभ्यांदेवेतीतिस्रोदेवता। विकल्पेन॥
ततोमाभ्यांदेवेत्येकासवितृदेवतेति। ततः त्रिभिष्ट्वंदेवेतिद्वितीयाग्निः सवितादेवतेति। ततः पुनंतुमामित्येतत्तीयावैश्वदेवोवास्तिस्रचोपैक
ल्प्यः। ततः अलाय्यस्येतित्रिंशककुप्। उष्णिक्। आद्यस्येत्। पुनंतुमांदेवजनाइतिसप्तविंश्यनुष्टुप्। याः पवमानीरध्येतीत्यंत्येद्वेऋचावनुष्टुभौ। वे

११० चकारात्पावमान्यश्चेतत्सूक्तमित्यर्थः। पावमानीनां नवमं मंडलवर्त्तिनीनां मध्ये पावमान्यश्चेता वरंभात सूक्तमिदं कृतमिति। पवमानगुणयुक्तः सोमोदेव
ता। वत्सप्रेः आर्षं गायत्रीछंदः अनुक्तछंदसां गायत्रीति विशेषः। अनुक्तः देवताः सोमः सर्वा देवताः पवमानगुणायुक्ताः भगवन्स भर्गापत्रत्वं पूर्णाव
षिः ।अथोत्तरार्धं परस्मात्पदेति ।जागतमूर्ध्वं तु उशनसः ।अतऊर्ध्वं उशनसः आर्षं जगतीछंदो वेदितव्यं। प्रतुद्रवेति सूक्तमुशनाय भिविव
क्ष्यति। आर्षं एतस्मात् उशनसंशब्दनात् इति यत्सूक्तं जागतमित्यर्थः। ।प्रदेवंदश वत्सप्रिर्भालंदनस्त्रिष्टुबंतं ह। ।प्रदेवमछेति दशर्चं सूक्तं १०। भा
लंदनपुत्रो वत्सप्रिर्नाम ऋषिः। पवमानगुणः सोमो देवता। त्रिष्टुबंतस्येति जागतं छंदः। हशब्दात् चत्वारि सूक्तानि त्रिष्टुबंतानि। एवानः सोमपरिषि
च्यमान इत्यंत्यऋक् त्रिष्टुप्। ।इषुर्नो हिरण्यस्तूपोत्यो त्रिष्टुभौ। इषुर्नधन्वन्निति दशर्चं सूक्तं। १० पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रो हिरण्यस्तूप ऋ
षिः। पवमानगुणः सोमो देवता। हशब्दात् त्रिष्टुबंतस्येति जागतं छंदः। एते सोमाः पवमानास इंद्रं भक्तं त्यहे ऋचौ त्रिष्टुभौ। ।त्रिरस्मैरेणुः त्रि
रस्मा इति दशर्चं सूक्तं १०। पूर्ववत्सूक्तसंख्येति। विश्वामित्रपुत्रो रेणुर्नाम ऋषिः। विश्वामित्रर्षेरुत्तरत्र वक्ष्यति। पवमानगुणः सोमो देवता। ह
शब्दात् त्रिष्टुबंतस्येति जागतं छंदः। हितो न सप्तिरित्यंत्यऋक् त्रिष्टुप्। ।आदक्षिणा नव ऋषभः स्वौ वैश्वामित्रौ। ।आदक्षिणेति नवर्चं सूक्तं ९
विश्वामित्रपुत्र ऋषभो नाम ऋषिः। अथ रेणुऋषभयोः पूर्ववत्सूक्तं एतयोरुभयोर्गोत्रमाह। तौ द्वौ विश्वामित्रादुक्तौ रेणुऋषभौ इष्यते। अथ विश्वामित्रः
पुत्रानामंत्र्य यासम धुछंदाः श्रृणोतन ऋषभो रेणुरष्टक इत्येतत्। पवमानगुणः सोमो देवता। हशब्दात् त्रिष्टुबंतस्येति जागतं छंदः। उप्तो वभ्रु
थेत्यंत्यऋक् त्रिष्टुप्। हरिं हरिमंतः। ।हरिं मृजंतीति नवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रो हरिमंतो नाम ऋषिः। पवमानगुणः सोमो ११०

देवता। प्रायुशनसो जागतं छंदः। ।स्रक्रे पवित्रः ।स्रक्रेद्रप्सस्येति नवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रः पवित्रो नाम ऋषिः। पवमानगु
णः सोमो देवता। प्रायुशनसो जागतं छंदः। स्रक्रेद्रप्सस्य धमतः समस्वरन् इति नवपावमान्य इति प्रकर्षेण संनेचालनस्वचयोः। ।शिशुर्न कक्षीवांस्त्रि
ष्टुबन्त्यौ। ।शिशुर्नजात इति नवर्चं सूक्तं ९ पूर्ववत्सूक्तसंख्येति। दीर्घतमसपुत्रः कक्षीवान् ऋषिः पवमानगुणः सोमो देवता। प्रायुशनसो जागतं छंदः।
अध श्वेतमित्यष्टम्यृक् त्रिष्टुप्। ।अभिप्रियाणि पंच कविः ।अभिप्रियाणीति पंचर्चं सूक्तं ५ भृगुपुत्रः कविर्नाम ऋषिः पवमानगुणः सोमो देवता।
प्रायुशनसो जागतं छंदः। ।इतिश्रीमदृग्वेदानुक्रमणिदीपिकायां गणेशकृतौ सप्तमाष्टकस्य द्वितीयोध्यायः। ।धर्त्ता। धर्त्तादिव इति पंच
र्चं सूक्तं ५ पूर्ववत्कविर्नाम ऋषिः पवमानगुणः सोमो देवता। प्रायुशनसो जागतं छंदः। ।एषः। एष प्रकोश इति पंचर्चं सूक्तं ५। पूर्ववत्सूक्तसंख्ये
ति। कविर्नाम ऋषिः पवमानगुणः सोमो देवता। प्रायुशनसो जागतं छंदः प्रराजा। प्रराजा वाचमिति पंचर्चं सूक्तं ५ पूर्ववत्सूक्तसंख्येति। कविर्नाम
ऋषिः पवमानगुणः सोमो देवता। प्रायुशनसो जागतं छंदः अचोदसः अचोदसो न इति पंचर्चं सूक्तं ५ पूर्ववत्सूक्तसंख्येति। पूर्ववत्कविर्नाम ऋषिः
पवमानगुणः सोमो देवता। प्रायुशनसो जागतं छंदः। ।अचोदसः ।अचोदसो न इति पंचर्चं सूक्तं ५ पूर्ववत्सूक्तसंख्येति। पूर्ववत्। कविर्नाम ऋषिः।
पवमानगुणः सोमो देवता। प्रायुशनसो जागतं छंदः। ।सोमस्य वसुर्भरद्वाजः ।सोमस्य धारेति पंचर्चं सूक्तं ५ पूर्ववत्सूक्तसंख्येति। भरद्वाजपुत्रो व
सुर्नाम ऋषिः। पवमानगुणः सोमो देवता। प्रायुशनसो जागतं छंदः। ।प्रसोमस्य। ।प्रसोमस्येति पंचर्चं सूक्तं ५ पूर्ववत्सूक्तसंख्येति। पूर्ववत् व
सुर्नाम ऋषिः। पवमानगुणः सोमो देवता। प्रायुशनसो जागतं छंदः। उभे द्यावापृथिवी विश्वमिन्व इत्यंत्यऋक् त्रिष्टुप्। असावीति त्रिष्टुबंते। असा

विसोमइतिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति· वत्सनामऋषिः॥ अन्यस्मादप्येवंवचनात् पवमानगुणःसोमोदेवता· धागुशानसोजागतंछंदः॥ यथा
पूर्वेष्वित्यंतत्र्चंत्रिष्टुप्· इतित्रिष्टुवंतइत्यर्थः॥ प्रसोमंस्यासावीतित्रिष्टुवंतेइदसूक्तेत्रिष्टुवंतइत्यक्तेउभयस्यक्तेवाच्येनकेवलंजागतमिति॥ ॥पवित्रंते॥
पवित्रः॥ पवित्रंतइतिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति· आंगिरसपुत्रः पवित्रोनामऋषिः॥ पवमानगुणःसोमोदेवता॥ धागुशानसोजागतछंदः॥ पवि
त्रंतेविततमितिद्वचः पवर्ग्येशंसनेत्राल्पस्त्रयोः॥ ॥ पवस्ववाच्यः॥ प्रजापतिः॥ पवस्वदेवमादनइतिपंचर्चंसूक्तं॥ ५ पूर्ववत्सूक्तसंख्येति॥ वाच्यपुत्रः
प्रजापतिऋषिः॥ अभितष्ठीपेसूक्तेप्रजापतयेर्वाच्यत्वमुक्तं॥ विश्वामित्रत्वंमाभूत्॥ पवमानगुणःसोमोदेवता॥ धागुशानसोजागतंछंदः॥ ॥इंद्रायद्या
दशवेनोभार्गवोद्वित्रिष्टुवंतं॥ इंद्रायसोमेतिद्वादशर्चंसूक्तं १२ भृगुपुत्रोवेनोनामऋषिः॥ पवमानगुणःसोमोदेवता॥ त्रिष्टुवंतस्यैत्वजागतंछंदः॥ धागुशानसो
मित्वात्॥ नाकेसुपर्णमित्याद्यंत्येद्वेऋचौत्रिष्टुभौ॥ प्रतेष्टाचत्वारिंशदृषिगणादशर्चाअकृष्टामाषाःप्रथमेसिकतानिवावरीद्वितीयेपृश्नयो
जाऋतीयेत्रयः स्वतुर्थेत्रिःपंचांत्याग्स्त्समदः॥ ॥प्रतआशवइत्यष्टाचत्वारिंशदृचंसूक्तं ४८॥ अथदशर्चांऋषिगणाश्चत्वारोपश्यत्· दशर्चेद्वेष्टा
वैस्ते॥ तत्रप्रथमदशर्चेद्वष्टारो॥ प्रतआशवइत्याद्याः ज्योतिर्यज्ञस्येत्यंततः अकृष्टेति· माषेतिचद्विनामानावितिद्वावृषीपश्येतां॥ ततःद्वितीयेदशर्चे
द्रष्टारो· अभिक्रंदन्नयन्नित्याद्याः मनीषिभिःपवतइत्यंतवःसिकताइति॥ निवावरीइतिचद्विनामाऋषीनाद्विवितिद्वावृषीसहापश्येतां· ततःतृती
येदशर्चेद्रष्टारो· अयंपुनानइत्याद्याः मनीषिभिःपवतइत्यंततः॥ त्वंपवित्रेरजसइत्यंततः॥ पृश्नयइति॥ अजाइतिचद्विनामानाभितिद्वावृषी
पश्येतां· ततःचतुर्थेदशर्चेद्रष्टारो॥ प्रेममएतीत्याद्याः॥ उन्मध्वऊर्मीरित्यंततः॥ अत्रयोनामानऋषयइतिचत्वारिंशदृगताः एषांगोत्रमुप॥

देशोवक्तुक्तेः॥ नोक्तमित्यर्थः॥ यथापूर्वचवैरवानसशतस्यनारायणपौरुषस्यतृयोति· ततःसमंदनाइत्याद्याःपंचर्चाः अग्येगोराजेत्यंततः सोमानिऋ
षिः॥ पूर्वोत्रिमैत्रिमियेत्रइत्यर्थः॥ ततः असर्जिस्कंभइत्यंत्यस्तृचोगृत्समदऋषिः॥ आंगिरसःशौनहोत्रोभूत्वाभार्गवःशौनकोसवत्सम्त्समदइत्यर्थः
अंत्योष्टर्चस्य॥ पंचैकःत्वैकश्च॰ पवमानगुणःसोमोदेवता· धागुशानसोजागतंछंदः॥ जगत्याधिकारस्यपूर्णोवधिः ॥प्रतुद्रवोशनी॥ ॥प्रतुद्रवेतिनव
र्चंसूक्तं ९ कविपुत्रोशनानामऋषिः॥ उशनाकाव्यःसंचेतस्कात्दर्शनात्· पवमानगुणःसोमोदेवता॥ अनादेशात्त्रिष्टुप्छंदः ॥अयंसोमोष्ठो॥ ॥
अयंसोमइत्यष्टर्चंसूक्तं ८ पूर्ववत्उशनानामऋषिः पवमानगुणःसोमोदेवता॥ अनादेशात्त्रिष्टुप्छंदः॥ ॥प्रोस्यवह्निःसप्त॥ प्रोस्यवह्निरितिसप्त
र्चंसूक्तं ७ पूर्ववत्उशनानामऋषिः पवमानगुणःसोमोदेवता· अनादेशात्त्रिष्टुप्छंदः॥ ॥प्रहिन्वानःषड्वसिष्ठः ॥प्रहिन्वानइतिषडर्चंसूक्तं
६ मित्रावरुणपुत्रोवसिष्ठऋषिः॥ पवमानगुणःसोमोदेवता· अनादेशात्त्रिष्टुप्छंदः॥ ॥इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांसप्तमाष्टकेतृ
तीयोध्यायः॥ ॥असर्जिकश्यपः॥ ॥असर्जिवक्रेतिषडर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति· मरीचपुत्रःकश्यपऋषिः पवमानगुणःसोमोदेवता
अनादेशात्त्रिष्टुप्छंदः ॥परिस्कानः॥ परिस्कवानइतिषडर्चंसूक्तं ६ पूर्ववत्सूक्तसंख्येति· पूर्ववत्कश्यपऋषिः॥ पवमानगुणःसोमोदेवता॥
अनादेशात्त्रिष्टुप्छंदः॥ ॥साकमुक्षःपंचनोधाः॥ साकमुक्षइतिपंचर्चंसूक्तं ५ गोतमपुत्रोनोधाऋषिः॥ पवमानगुणःसोमोदेवता॥ अनादेशा
त्त्रिष्टुप्छंदः॥ आधियत्कण्वः॥ आधियदितिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति· घोरपुत्रःकण्वऋषिः॥ पवमानगुणःसोमोदेवता· अनादेशा
त्त्रिष्टुप्छंदः॥ ॥कनिक्रंतिप्रस्कण्वः॥ कनिक्रंतीतिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति॥ कण्वपुत्रःप्रस्कण्वऋषिः॥ पवमानगुणःसोमोदेवता·

अनादेशात्त्रिष्टुप्छंदः ॥ प्रसेनानीश्चतुर्विंशतिर्दैवोदासिः प्रतर्दनः ॥ प्रसेनानीरिति चतुर्विंशत्यृचं सूक्तं २४ दिवोदासराजर्षेः पुत्रः प्रतर्दनो नाम राज
र्षिः प्रपश्यत् ॥ पवमानगुणः सोमो देवता । अनादेशात्त्रिष्टुप्छंदः ॥ ॥अस्य प्रेषा षट्पंचाशद्वसिष्ठो पश्यदुत्तरान्नव पृथग्वासिष्ठाद्
इंद्रप्रमतिर्वृषगणो मन्युरुपमन्युर्व्याघ्रपाच्छक्तिः कर्णश्रुन्मृळीको वसुक्र इति चतुर्दश पराशरोंत्याः कुत्सः ॥ ॥अस्य प्रेषेत्यष्टापंचाशदृचं सूक्तं
५८ अथ ऋषिक्रमोच्यते ॥ अस्य प्रेषेत्याद्यतृचस्य मैत्रावरुणपुत्रो वसिष्ठ ऋषिः ॥ अथोत्तरनवतृचान् पृथग्वसिष्ठपुत्रा नू पृथक् पश्यत् । तेषु इंद्र
प्रमत्यादिनामतद्दाति । प्रगायतेत्यादि द्वितीयतृचस्य वसिष्ठपुत्र इंद्रप्रमतिर्नाम ऋषिः ॥ ततः प्रकाव्यमुशनेवेत्यादि तृतीयतृचस्य वसिष्ठपु
त्रो वृषगणो नाम ऋषिः ॥ ततः इंदुर्वाजीत्यादि चतुर्थतृचस्य वसिष्ठपुत्रो मन्युर्नाम ऋषिः ॥ ततः रुषा शोण इत्यादि पंचमतृचस्य वसिष्ठपुत्र उपम
न्युर्नाम ऋषिः ॥ ततः जुष्टी न इंद्रेति षष्ठतृचस्य वसिष्ठपुत्रो व्याघ्रपान्नाम ऋषिः ॥ ततः जुष्टो मदायेत्यादि सप्तमतृचस्य वसिष्ठपुत्रः शक्तिर्नाम
ऋषिः ॥ ततः तक्षद्यदीत्याद्यष्टमतृचस्य वसिष्ठपुत्रः कर्णश्रुन्नाम ऋषिः ॥ ततः अर्वां इव श्रवसे इत्यादि नवमतृचस्य वसिष्ठपुत्रो मृळीको
नाम ऋषिः ॥ ततः अश्वो न क्रंद इत्यादि दशमतृचस्य वसिष्ठपुत्रो वसुक्रो नाम ऋषिरिति नवसु तृचेषु पृथक्त्वाच्चमित्याद्यतृचसहैव त्रिंशदृग
ताः ॥ ततः प्र ते धारा मधुमतीरित्याद्युत्तरचतुर्दशर्चो मध्वः सूदं पवस्वेत्यंततः ॥ शक्तिपुत्रः पराशर ऋषिः ॥ ततः सोमः स्म नो धारयेत्याद्यंत्याश्च
तुर्दशर्चः त्वया वयं पवमानेन सोमेत्यंततः आंगिरसपुत्रः कुत्स ऋषिः इत्येताः सर्व ऋषयः पराशरकुत्सौ विस्ताव वसिष्ठगोत्रोत्पन्नाः ॥ इंद्रं वर्द्ध
सप्तिमितं सूक्तं । पवमानगुणः सोमो देवता । अनादेशात्त्रिष्टुप्छंदः ॥ ॥अभिनो द्वादशांबरीष ऋजिश्वाचानुष्टुभं हर्ष्टुहत्स्वंत्या ॥ ११२

अभिनो वाजसातममिति द्वादशर्चं सूक्तं १२ वृषागिरिर्नाम राजर्षेः पुत्रो अंबरीषनाम राजर्षिः ॥ भरद्वाजपुत्र ऋजिश्वानाम ऋषिः ॥ तेषु हस्पतिपौ
त्रो वाशिरत पौत्रो वेत्यक्ते ॥ चेति सहतत्त्वायतो द्वौ सह पश्यतां । पवमानगुणः सोमो देवता । अनुष्टुप्छंदः ॥ हशब्दात् तत्ता रिस्त्यक्त्वान्यानुष्टुभानि । तेष्वत्ता
सहर्षात्यर्च ऋक् हबृहती ॥ आहर्यताया ष्टौ रेभसूनू काश्यपौ हत्याद्या । आहर्यतायेत्यष्टर्चं सूक्तं ८ काश्यपपुत्रो द्वौ रेभनामा सूनुनामानौ द्वावपी सह
पश्यतां । पवमानगुणः सोमो देवता । आहर्यताय त्वा ह्यर्च बृहती ॥ हशब्दात् शेषाः सप्तर्चो अनुष्टुभः ॥ अभीनवंतेनव ॥ अभी नवंत इति नवर्चं सूक्तं ९
पूर्ववत् रेभसूनुनामानौ द्वावपी पश्यतां । पवमानगुणः सोमो देवता । हशब्दात् अनुष्टुप्छंदः ॥ ॥इति श्रीमदृग्वेदानुक्रमणिदीपिकायां सप्तमाष्टके
चतुर्थो ध्यायः ॥ ॥पुरोजितीषोळशांधीगुः श्यावाश्विर्ययातिर्नाहुषो नहुषो मानवो मनुः सांवरण इति तृचाः शेषेः प्रजापतिरुपाद्येगायत्र्यो ॥ ॥पुरोजिती
व इति षोळशर्चं सूक्तं १६ अथ ऋषयोच्यंते पादिक्रमेण्यंते । पुरोजितीत्याद्यतृचस्य श्यावाश्वपुत्रो अंधीगुर्नाम ऋषिः ॥ ततः सोम उ ष्वाण इति द्वितीयतृचस्य
नहुषपुत्रो ययातिर्नाम ऋषिः ॥ अतः अयं पूषेति तृतीयतृचस्य मनुपुत्रो नहुषो नाम ऋषिः ॥ ततः सोमाः पवंत इंदव इति चतुर्थतृचस्य संवरणपुत्रो मनुर्ना
म ऋषिः ॥ एते चत्वारस्तृचाः तिस्रश्चोद्दिष्टाः इति द्वादश ऋग्गताः ॥ ततः प्र सन्वानस्यांधस इत्यंत्याश्चतस्रो वाच्य विश्वामित्रपुत्रो प्रजापतिर्नाम ऋषिः
॥ सध्रामुष्याण इत्यर्चः ॥ पवमानगुणः सोमो देवता । हशब्दात् त्रिष्टुप्छंदः ॥ ततः यो धारया पावकयेत्याद्ये द्वे ऋचावुपाद्येगायत्र्यो ॥ ॥काणाश्चैतिततो च्छिद
वै ॥ ॥काणाशिशुरित्यष्टर्चं सूक्तं ८ आप्त्यपुत्रस्त्रित ऋषिः पवमानगुणः सोमो देवता । उष्णिक्छंदः ॥ वैशब्दात् पंच सूक्तान्यौष्णिहानि ॥ ॥प्रपुनानाय
षट् द्वित आप्त्यः ॥ प्र पुनानायेति षळृचं सूक्तं ६ आप्त्यपुत्रो द्वितो नाम ऋषिः पवमानगुणः सोमो देवता । वैशब्दात् उष्णिक्छंदः ॥ सख्ययपर्वतनारदौ का

स्यपौ दौ शिखंड्यौ वाप्सरसौ ॥ ॥ सखाय आनिषीदतेति षळर्चं सूक्तं ६ पूर्ववत्सूक्तसंख्येति । कश्यपपुत्रौ द्वौ पर्वतनामानौ वौ द्वौ सहापश्येतां । केचिन्मतेनो
काण्वविति उक्तावित्यर्थः । अथवा कश्यपपुत्रो द्वौ शिखंडिन्यौ नामाप्सरसौ तौ द्वौ विकल्पेन सहापश्यतां · पवमानगुणः सोमो देवता । वैशब्दात् उष्णिक्छं
दः तं वः तं वः सखाय इति षळर्चं सूक्तं ६ पूर्ववत्सूक्तसंख्येति · पूर्ववत् पर्वतनारदावृषी । अथवा शिखंडिन्याव प्सरसौ विकल्पेन तौ काश्यपगोत्रा वित्य
र्थः । पवमानगुणः सोमो देवता । वैशब्दात् उष्णिक्छंदः इंद्रमच्छ पञ्चनाग्निश्चाक्षुषश्च ऋक्र्मानवो मनुरप्सव इति तृचाः पंचाग्निः ॥ इंद्रमच्छेति चतु
र्दशर्चं सूक्तं १४ आनिरुक्तसंख्येति · अथार्षकमोच्यते । इंद्रमच्छेत्याद्य स्तृचस्य चक्षुपुत्रोग्निर्नामऋषिः ततः प्रधन्वा सोमेति द्वितीयस्तृचस्य मनुपुत्र
श्चक्षुर्नामऋषिः ततः पवस्व देववीतय इति तृतीयस्तृचस्याप्सुपुत्रो मनुर्नामऋषिरित्येते त्रयस्तृचाखिलस्तृचो द्रष्टायेरितिन वर्चोनिताः ततः सोमः पु
नान ऊर्मिणेत्याद्यस्ताः पंचर्चाः चक्षुः पुत्रोग्निर्नाम ऋषिः पवमानगुणः सोमो देवता । वैशब्दात् उष्णिक्छंदः परीतः षड्विंशतिः सप्तर्षयः प्रागाथं तु
तीया वोक्स्यौ द्विपदे अष्टम्याद्ये बृहत्यौ । । परीतो षिंचतेति षड्विंशत्यृचं सूक्तं २६ । अथ सप्तर्षयः क्रमोच्यंते । भरद्वाजः कश्यपो गोतमोऽत्रिर्वि
श्वामित्रो जमदग्निर्वसिष्ठ इत्युक्ताः ते च त्वं सोमासि धारयुरित्यृक्रमः पुरस्तादुक्ता इत्यर्थः । ते षां सप्तर्षीणां गोत्राणि पुरस्ताद्व्याख्यातानि । ते
सप्तापश्यत् । पृथक्दर्शनहेत्वात् · इदं वक्रत्रेष्विमं तं सूक्तं । पवमानगुणः सोमो देवता । ततः प्रगाथक्रमोच्यंते । परीतो षिंचतेति द्व्यृच एकः प्रगा
थः ततः पुनानः सोम धारयेति द्व्यृचो द्वितीयः प्रगाथः ततः पुनानः सोम जागृविरिति द्व्यृचस्तृतीयः प्रगाथः ततः आ सोम स्वानो अद्रिभिरिति द्व्यृ
चश्चतुर्थः ततः प्र सोम देववीतय इति द्व्यृचः पंचमः प्रगाथः ततः अभि सोमास आयव इति द्व्यृचः षष्ठः प्रगाथः ततः इंद्राय पवते मद इति द्व्यृ

चः प्रगाथः ततः तवाहं सोम रारणेति द्व्यृचोऽष्टमः प्रगाथः ततः मृज्यमानः सहस्त्येति द्व्यृचो नवमः प्रगाथः ततः पवस्व वाजसातय इति द्व्यृचो दशमः प्रगाथः ततः
पवमाना असृक्षतेति द्व्यृच एकादशः प्रगाथ इत्येते एकादश प्रगाथा अनादेशात् बार्हताः प्रत्येकं द्व्यृचो बृहती सतोबृहत्यौ सर्वत्र परिभाषेयमित्यर्थः अ
त्रैकादश प्रगाथान्वयसूक्ते । इदं सूक्तं बार्हत प्रगाथेन व्याप्तं ॥ अपि च ॥ परिष्कृण्वन्नप्रसासे देवमादन इति तृतीयर्क् अनादेशात् एकविंशत्यक्षरा भुरि
क्द्विपदा सतोबृहती पंक्तिभेदः ततथा नभिर्येमान इति षोडश्यृक् अनादेशात् विंशत्यक्षरा द्विपदा विराट् सतोबृहती पंक्तिभेदः । उभयो द्विपदे स
तोबृहत्यावित्यर्थः । अयुजा जागतावितिवचनात् । विंशिका द्विपदा विराज इति परिभाषोक्तेः ततः सोम उ षुवाणः सोतृभिरिति द्वे सचावृहमी
नवम्यौ बृहत्यौ । अष्टम्याद्ये बृहत्यावित्यर्थः ॥ ॥ पवस्वैषो कशा गौरिवीति द्व्यृचं शक्तिरेकामुरुर्ऋजिश्वोर्ध्वसद्मा कृतयशा ऋणंचय इत्यृषयो द्व्यृचा
स्त्रिस्रः शक्तिः काकुभाः प्रगाथाः सस्कन्ने गायत्रीयवमध्या परा सतोबृहती ॥ ॥ पवस्व मधुमत्तम इति षोळर्चं सूक्तं १६ अथर्षिक्रमोच्यंते ।
पवस्व मधुमत्तम इत्याद्य द्व्यृचस्य शक्तिपुत्रो गौरिवीतिर्नाम ऋषिः गौरिवीतिः शक्त्य इत्युक्तेः ततः त्वं ह्यं १ ग दैव्येत्येकर्चस्य वसिष्ठपुत्रः शक्तिरृ
षिः ततः येना नवग्व इति द्व्यृचस्यांगिरसपुत्र उरुर्नाम ऋषिः ततः य उस्रिया इति द्व्यृचस्य भरद्वाजपुत्र ऋजिश्वा नाम ऋषिः ततः सहस्रधारं वृष
भमिति द्व्यृचस्यांगिरसपुत्र ऊर्ध्वसद्मा नाम ऋषिः ततः आ व्यस्य स्फदसोति द्व्यृचस्यांगिरसपुत्रः कृतयशा नाम ऋषिः ततः वृषा वि जज्ञे इति द्व्यृच
स्य ऋणंचयो नाम ऋषिरित्येते सप्तर्षयो द्व्यृचाः द्वे सचौ कृष्टयोरिति त्रयोदशर्ग्गनाः ततः यस्य न इंद्रः पिबादित्याद्यंत्यस्तृचो वसिष्ठपुत्रः श
क्तिरृषिः वासिष्ठ शक्त्य इत्यर्थः पवमानगुणः सोमो देवता सूक्तस्याष्टौ काकुभः प्रगाथं छंदः आद्यर्क् ककुबुष्णिक् मध्यमपादो द्वादशाक्षरः

११५ प्रथमतृतीयपादावष्टाक्षरौ॥ द्वितीयस्त्वनीज्ञ पुजोज्जागतौ चेत्। एते हे त्रैष्टुभी लिंङ्गः॥ काकुभप्रगाथोऽशेषः सर्वत्र। एतेषां मध्ये सकृन्मध्ये पद इत्यर्थः ककुप
चेत्प्राप्ते यवमध्या गायत्री कथ्यते। मध्यमपादो दशाक्षर इति गायत्री विशेषणं। महाबृहती यवमध्या भवेत्॥ परिभाषया यवमध्या गायत्री भेद इत्यर्थः। ततः य
स्य नरेंद्रः पिबादित्यक्षराकेवलेऽसतो बृहती पंक्तिश्छंदः। अस्य बृहतस्य काकुभप्रगाथसंज्ञास्ति। स एव काकुभप्रगाथ इत्यर्थः॥ । परिप्रधन्वीविंकाम्रयोधिष्ण्य
स्य ऐश्वरचोदेऽपदं॥ ॥ परिप्रधन्वेति द्वाविंशत्यृचं सूक्तं २२ अनिरुक्ता संख्येति। अग्नयो नाम ऋषयः। धिष्ण्यो नाम यज्ञ सद सि धिष्ण्य वंतः। ऐश्वर
जः ईश्वरपुत्रः। धिष्ण्यानामग्नेर्विशेषणं॥ तथा च पुराणोक्तं॥ यन्निचाराद्दुम्पताधिष्ण्यास्ता सूक्तत्वं तास्तु धिष्ण्यः। धिष्णीपुजा द्विरियस्मात्तत्स्वधि
ष्ण्यः स्मृता इति पवमानगुणः सोमो देवता। विंशत्यक्षरा द्विपदा विराट् छंदः। विंशिका द्विपदा विराज् बृहत्यना देशात् परिभाषेयं। अध्यापनो द्विद्विप
दास्त्वृचः समामनंतीत्येकादशर्चं सूक्तं चतुष्पदा विराट्वा पंक्तिभेद इत्यर्थः। शंससने द्विपदा इति सिद्धः॥ ॥ पर्यूषुद्वादश त्र्यरुणत्रसदस्यू राजानौ इति
स्वो नुष्टुभः पिपीलिकमध्याः षडूर्ध्वं बृहत्यस्तिस्रश्चाविराजः॥ ॥ पर्यूषुप्रधन्वेति द्वादशर्चं सूक्तं १२ त्र्यरुणश्च त्रसदस्यू द्वौ राजपुत्रावृषी सहापरय
तां॥ पवमानगुणः सोमो देवता॥ परिप्रधन्वेत्याद्यास्तिस्रऋचः पिपीलिकमध्यानुष्टुप्छंदः। मध्ये चेद् ष्टकः॥ आद्यंतौ द्वादशाक्षरौ पादौ चेत्॥ ततः अ
जनो अग्न्वेत्याद्याः षडूर्ध्वबृहत्यः त्रिपदः त्रिपदाजागतश्चेत्यर्थः॥ ततः सोमः पुनानो अव्यये वार इत्यंत्यस्त्वृचो दशाक्षरा विराट् अनुष्टुप्छंदः ए
कादशाक्षरा वेति विकल्पेन॥ ॥ अयारुचात्वमनानृतः पारुच्छेपरात्यष्टं॥ अयारुचेति एकर्चं सूक्तं॥ २ परुच्छेपपुत्रो नानन्दो नाम ऋषिः पवमानगु
णः सोमो देवता॥ अत्यष्टिश्छंदः॥ अत्यष्टिका षष्ठाक्षरेति। पारुच्छेपं सर्वमास्य ष्टयमाप्तिपूर्वोक्तं परिभाषेयमित्यर्थः॥ ॥ नानानं चतुष्कं शिशुः ११५

शिशुः पांक्तं हि॥ ॥ नानानं वा इति चतुर्ऋचं सूक्तं ४ आंगिरसपुत्रः शिशुर्नाम ऋषिः पवमानगुणः सोमो देवता॥ पंक्तिश्छंदः। हि शब्दात् त्रीणि सूक्तानि पांक्ता
नि॥ ।शार्यणावत्येकादश कश्यपः॥ शार्यणावतीत्येकादशर्चं सूक्तं ११ मरीचिपुत्रः कश्यप ऋषिः पवमानगुणः सोमो देवता॥ हि शब्दात् पंक्तिश्छंदः॥ य
इंद्रेन्द्रचतुष्कं॥ ॥ यत्रब्रह्मेति चतुर्ऋचं सूक्तं॥ ४ पूर्ववत् कश्यप ऋषिः पवमानगुणः सोमो देवता॥ हि शब्दात् पंक्तिश्छंदः इति पवमानगुणः सोमः पूर्णो ऋ
षिः तत्र कारिका॥ नानानीयेन सूक्तेन ऋषीणामेव सन्निधौ॥ तानीद्रस्त्वब्रवीत् सर्वान् तपध्वं सुमहातपः॥ तपस्तेपुन्तपस्तेपुः सर्वे स्वर्गजिगीषवः॥ ततस्ते
तपसोग्रेण पावमानीरृचोऽब्रवीत्॥ पापं यच्चाकरोत्किंचिन्मनो वाक्देहतो मतः॥ एतत्समस्मात्सर्वस्माद्वृत्त्यमाल्लोकयतामपि॥ पावमानं परं ब्र
ह्म शुक्रं ज्योतिः सनातनं॥ गायत्र्यात्मेति यो देवः श्वासां प्राणानायम्य तन्मनाः॥ पावमानं पितृन् देवान् ध्यायेध्यस्त्वसरस्वती॥ पितृंस्तस्योपवर्तेत स्त्री
रं सर्पिर्मधूदकं॥ एतत्सूक्तं शतं सोम्यं मंडलं च चतुर्दश॥ पावमानीस्तिकाविरव्यादमनुवाकास्तु सप्त वै॥ ततः अनुवाकास्त्वृच्यंते॥ स्वादिष्ठया॥ पव
स्व दक्षसाधनः अयावीति॥ प्रदेवमच्छा॥ प्रराजा वाचं॥ घृतआशिरः॥ अस्य प्रेषा॥ सरवायआनिषीदत॥ सप्तानुवाकान्॥ सूक्तसंख्या ११४ नवमं मंडलमे
क सूक्तं पावमानं सौम्यसंज्ञकं विनियोगस्तेयं। स्वादिष्ठयेत्यादि यच्चेरजाल्लित्यंततः ग्रामस्तोत्रशंसने सर्वमंडलमित्यर्थः॥ पावमानीरोषययार्थमावाग्र ह
ग्रहणादितिस्त्रकारः॥ तथा सूक्ते आर्षवे पवमाने बहिष्पवमाने माध्यंदिने च स्तोत्रे विनियोग इति। पावमानीषु साममगास्तवनेतथापवमानो नुरास्तो
भवती ब्राह्मणश्रावितः॥ इदं पावमानं सोममंडलं देवतास्त्वृचं ज्ञेयमित्यर्थः॥ ॥ इति श्रीमदृग्वेदानुक्रमणिदीपिकायां नवमं मंडलं पावमानं सोमदेव
त्यं संपूर्णं॥ ॥ नवमं मंडलं त्वेवं पावमानं प्रकीर्तितं। इदानीं दशमं सम्यक् वस्तु मेवाभिज्ञस्यते। ।अथेदं दशमं मंडलं वक्ष्यते। अग्रेस प्रमितः अ

प्रेष्ठहान्वितिसप्तर्चंसूक्तं ७ आप्त्यपुत्रस्त्रितऋषिः।मंडलादिष्वाग्नेयमित्यनादेशाद्अग्निर्देवता।आइंद्रदर्शनात्प्रकेतुनेतिसूक्तस्यांत्यस्तृचोस्यत्रि
तः ऋतुनेत्यंतकः।शाकआग्नेयंद्दर्शोअनादेशात्त्रिष्टुप्छंदः।अग्रेबृहन्नुषसामूर्ध्वोअस्थादितिसर्वांश्चेदनुगतादितिसूत्रकारः ।पिप्रीहि। ।पिप्री
हिदेवानितिसप्तर्चंसूक्तं ७ पूर्ववत्सूक्तसंख्येति। पूर्ववत्त्रितऋषिः।अग्निर्देवता।अनादेशात्त्रिष्टुप्छंदः।पिप्रीहिदेवांउशतोयविष्ठेत्यनुवा
केतिसूत्रकारः। इनः। इनोराजन्नितिसप्तर्चंसूक्तं ७ पूर्ववत्सूक्तसंख्येति।त्रितऋषिः।अग्निर्देवता।अनादेशात्त्रिष्टुप्छंदः। इनोराज
न्नितिसूक्तंस्वाध्यायधर्मः। प्रते। प्रतेयक्षीतिसप्तर्चंसूक्तं ७ पूर्ववत्सूक्तसंख्येति-त्रितऋषिः-अग्निर्देवता-अनादेशात्त्रिष्टुप्छंदः। प्रते
यक्षीतिसूक्तंस्वाध्यायधर्मः। एकः। एकःसमुद्रइतिसप्तर्चंसूक्तं ७ पूर्ववत्सूक्तसंख्येति।त्रितऋषिः।अग्निर्देवता-अनादेशात्त्रिष्टुप्छंदः। एकःस
मुद्रइतिसूक्तंस्वाध्यायधर्मः। ।।इतिश्रीमदृग्वेदानुक्रमणिदीपिकायां०सप्तमाष्टकेपंचमोध्यायः।। ।।अयं।।अयंसयस्येतिसप्तर्चंसूक्तं।।
७ पूर्ववत्सूक्तसंख्येति।त्रितऋषिः-अग्निर्देवता-अनादेशात्त्रिष्टुप्छंदः।अयंसयस्येतिसूक्तंस्वाध्यायधर्मः। स्वस्ति ।स्वस्तिनोदिवइतिस
प्तर्चंसूक्तं ७ पूर्ववत्सूक्तसंख्येति। पूर्ववत्त्रितऋषिः।अन्यस्मादृषेर्वचनात्।अग्निर्देवता।अनादेशात्त्रिष्टुप्छंदः।स्वस्तिनोदिवइतिसूक्तंस्वाध्या
यधर्मः। प्रकेतुनानववत्त्रिशिरास्त्वाष्ट्रस्तृचोत्यऐंद्रः। प्रकेतुनेतिनवर्चंसूक्तं ९ त्वष्टृपुत्रस्त्रिशिरानामऋषिः। ततःप्रकेतुनेत्याद्याःषड्ऋचोग्निदेव
त्याः ततःअस्यात्रितःऋतुनेत्यंत्यस्तृचइंद्रदेवत्यः मंडलादिष्वाग्नेयंपूर्णोवृष्टिः।अनादेशात्त्रिष्टुप्छंदः।प्रकेतुनेतिसूक्तंस्वाध्यायधर्मः।
आपोहिसिंधुद्वीपआंबरीषोवापंगायत्र्यंच्यनुष्टुब्वंतपंचमीवर्धमानासप्तमीप्रतिष्ठा।। आपोहिष्ठेतिनवर्चंसूक्तं ९ पूर्ववत्सूक्तसंख्ये

ति।आंबरीषपुत्रःसिंधुद्वीपऋषिः।वाविशिष्टत्वादुत्तरत्रानानुवृत्तेः।प्रकृतत्वष्टृपुत्रस्त्रिशिरानामऋषिःविकल्पेन-आपोदेवता-गायत्रीछंदः 338
ततः इदमापः प्रवहतेत्यंत्येद्वेऋचावनुष्टुभौ-ईशानावार्याणामितिपंचम्यृक्वर्धमानागायत्री।।षट्सप्तकाष्टकेति। आपःपृणीतेतिसप्तम्यृक्प्र
तिष्ठागायत्रीविपरीतात्प्रतिष्ठेति।आपोहिष्ठामयोभुवइतित्र्यृचेनोविगृह्ये। ।ओचिवत्षकृनावैवस्वतयोर्यमयोःसंवादः-षष्ठ्युग्भिर्यमीमिथुनार्थंयमंप्रोव
चसवांनवमीयुग्भिरनिच्छन्प्रत्याचष्टे।। ।।ओचित्सखायमितिचतुर्दशर्चंसूक्तं१४ आनरुकास्संख्येति।वैवस्वतयोर्यमयोर्मिथःपरस्परंसंवादःक
थमित्याह। अथायुजक्रमोच्यते।ओचित्सखायमितिप्रथमऋक्।ऋतः उशंतिघातइतिद्वितीयर्क्।गर्भेनुनावितिपंचम्यृक्।कोअस्यवेदेतिष
ष्ठीसकृत्।युजश्चषष्ठ्युग्भिरित्यर्थः।यमस्यमेतिसप्तम्यृक्।किंभ्रातेत्येकादश्यृक्।बतोबतासीतित्रयोदश्यृक्।एताःसप्तभिरयुग्भिरृग्भिःष
ष्ठीयुक्ताभिःवैवस्वतकन्यकायमीऋषिकापश्यत्।एताभिःसप्तभिःऋग्भिःवैवस्वतपुत्रोयमोदेवता। अथमिथुनार्थिनींयमींभ्रातरमाह।ततःयु
जर्चोक्रमउच्यते-नतेसखेतिद्वितीयऋक्।नयत्पुरेतिचतुर्थ्यृक्।नतिष्ठंतीत्यष्टम्यृक्।रात्रीभिरस्माइतिनवम्यृक्।युग्भिरितिसर्वानवमीयुग्भि
रितिवचनात्।आघातादशम्यृक्।नवाउतेतन्वेतिद्वादश्यृक्।अन्यमूषुत्वेतिचतुर्दश्यृक्एताभिःसप्तभिर्युजोभिःचाग्भिर्नवमीयुक्ताभिर्वैवस्वत
पुत्रोयमोनामऋषिरपश्यत्।एताभिःसप्तभिर्युजोभिर्ऋग्भिर्वैवस्वतपुत्रीयमीदेवता।।आनिच्छन् अनिच्छमानःकार्यरहितः।मनसैवाकार्य
मितिस्पहारानिःसप्रत्याचष्टेप्रतिकूलमेवोक्तवान्।वैवस्वतीयमी।वैवस्वतयमइत्यनयोर्भ्रातृभगिन्योःसंवादइत्यर्थः।।अनादेशात्त्रि
ष्टुप्छंदः।ओचित्सखायमितिसूक्तंस्वाध्यायधर्मः। ।वृषानवांगिर्हविर्धानआग्नेयंतुत्रिष्टुब्वंतं। वृषाहसीतिनवर्चंसूक्तं ९ आंगिरसं

११६ गः पुत्रोहविर्धानोनामऋषिः अग्निर्देवता। वृषावृदात्उत्तरसूक्तमाग्नेयं त्रिष्टुबंतंस्येतिजागतंछंदः। ततः यस्तेअग्नेसुमतिमित्यंत्यस्यच त्रिष्टुप्सः
वृषावृष्णइतिसूक्तंस्वाध्यायधर्मः। द्यावा। द्यावाहक्षामेतिनवर्चंसूक्तं ९ पूर्ववत्सूक्तसंख्येति। पूर्ववत्हविर्धानऋषिः वृषाद्यावअग्निर्देवता। अना
देशात्त्रिष्टुप्छंदः। द्यावाहक्षामेतिसूक्तंस्वाध्यायधर्मः। युजे पंच विवस्वानादित्योहाविर्धानेजगत्यंतं। युजेवांब्रह्मेति पंचर्चंसूक्तं ५ आदितिपुत्रो
विवस्वान्नामऋषिः वादिशिष्टत्वावउत्तरत्ननानुवृत्तिः। अथवा एकतहविर्धाननामऋषिर्विकल्पेन। हविर्धानेदेवता। हविर्धानदेशकेतदेवतइत्य
र्थः अनादेशात्त्रिष्टुप्छंदः। ततः सप्तस्वरंत्यर्क्जगती। युजेवांब्रह्मपूर्व्यंनमोभिरित्यन्नाहेतिब्राह्मणस्कृत्ययोः। परेयिवांसं पंचदशयमोयामिषष्ठीलिं
गोक्तदेवता परास्त्वातिस्रः पित्र्यावात्तरस्यांपराअनुष्टुभोबृहत्यकपात्या। परेयिवांसमितिषोडशर्चंसूक्तं १६ वैवस्वतोनामसूर्यपुत्रस्तत्पुत्रोयमो
नामऋषिः यमोदेवता। अनादेशात्त्रिष्टुप्छंदः। अंगिरसोनइतिषष्ठीसक्तलिंगोक्तदेवता। अंगिरसः पितरः अथर्वाणः भृगुः सोमः इत्येताः
पंच देवताः। ततः प्रेहिप्रेहीत्याद्यास्तिस्रऋचः पराछिंगोक्तदेवत्याः। प्रेहिप्रेहीत्येका। संगच्छस्वेति द्वितीया। अपेतवीतेतितृतीयेत्येताः। परास्तिस्र
चः वकारात्विकल्पेनपितृदेवत्याः। ततः अतिद्रवेत्याद्यास्तिस्रऋचः श्वस्यां श्वानौदेवतासरमायाःपुत्रोयमसारमेयमभिलक्षितौतौऋचः श्वस्याभितः। ततः
यमायसोमंसुनुतेत्याद्यस्त्रयोदशाद्यास्तिस्रऋचः पराअनुष्टुभः। आसांमध्येयमायमधुमत्तममित्येकपात्यसंकृतृहती। परेयिवांसंप्रवत
तिपितृभिः त्वचकारः यमायनाः परेपंच। यमायनइतियमपुत्राः पंचेतिपंचर्षयः। पराउत्तरपंचसूक्ताः शंखाद्याः पंचसूक्ताः। उदीरतांपक्नाशं
खः पित्र्यंजगत्येकादशी। उदीरतामितिचतुर्दशर्चंसूक्तं १४ आनिरुक्तासंख्येति। यमायनः यमगोत्रोत्पन्नः शंखऋषिः पितरोदेवता। अना ११६

देशात्त्रिष्टुप्छंदः। ततः अग्निष्वात्ताइत्येकादश्यर्क्जगती। उदीरतामवरउत्परासइत्यष्टाभिकुर्त्वेतिगृह्ये। मैनंदमनआग्नेयंचतुरनुष्टुबंतं। मैनमग्नेविद
हइतिचतुर्दशर्चंसूक्तं १४ पूर्ववत्सूक्तसंख्येति। यामायनः यमगोत्रोत्पन्नः दमनोनामऋषिः अग्निर्देवता। अनादेशात्त्रिष्टुप्छंदः। ततः योअ
ग्निः क्रव्यवाहनइत्याद्यंत्याश्चतस्रऋचोनुष्टुभः। मैनमग्नेविदहइतिसूक्तमंत्येष्टिर्गृह्ये। त्वष्टादेवश्रवाद्विसरण्युदेवंनेपोप्यनंतस्तिस्रः सा
रस्वत्यः पंचाप्योद्र आस्तिस्रः सोम्यावांत्यअनुष्टुभावुपांत्यापुरस्ताद्बृहतीवा। त्वष्टादुहित्रइतिचतुर्दशर्चंसूक्तं १४ पूर्ववत्सूक्तसंख्येति। यमायनः
यमगोत्रोत्पन्नः देवश्रवाऋषिः। ततः त्वष्टादुहित्रइत्याद्यर्क्। अपागूहन्नितिद्वितीयर्क्। एतेद्वेऋचौसरण्युदेवते। सरण्युर्नामत्वष्टा वैवस्वतयोः सूर्याभि
धायिनीत्यर्थः। अजहादुमिथुनोसरण्युरितिनैरुक्ते। ततः पूषात्वेतश्च्यावयत्वित्याद्यास्तिस्रऋचः पूषदेवत्याः। ततः सरस्वतीदेवयंतइत्याद्यास्तिस्रऋचः
सरस्वतिदेवत्याः। ततः आपोअस्मान्मातरइत्याद्याः पंचर्चः अप्देवत्याः। आसांमध्येद्रप्सश्चस्कंदेतितिस्रऋचःसोमदेवत्याः विकल्पेन। यस्तेद्रप्सइत्यं
त्येद्वेऋचावनुष्टुभौ। अथवायस्तेद्रप्सइत्येकपात्यर्क्पुरस्ताद्बृहतीविकल्पेन। आद्यस्येदानि। आद्यस्तोदाद्वेशर्चोअनादेशात्त्रिष्टुभः। त्वष्टा
दुहित्रइतिसूक्तमंत्येष्टिर्गृह्ये। परंमृत्योसंकुसुककश्चतस्रोमृत्युदेवताःपराधातृदेवतापरात्वाष्ट्रीपराःपितृमेधाएकादशीप्रस्तारपंक्तिर्जगत्येकपात्या
नुष्टुप्प्रजापत्यावासानिरुक्ता। परंमृत्योइतिचतुर्दशर्चंसूक्तं १४ पूर्ववत्सूक्तसंख्येति। यमायनः यमगोत्रोत्पन्नःसंकुसुकोनामऋषिः परंमृ
त्योइत्याद्याश्चतस्रऋचोमृत्युदेवताः। मर्त्यव्यामितिवचनोविस्पष्टार्थः। ततः यथाहानीतिपंचमर्क्पराधातृदेवत्या। ततः आरोहतायुरितिषष्ठीसक्
परात्वष्टृदेवत्या। ततः इमानारीरविधवाइत्याद्यंत्याःपराःशेषाऋचःपितृमेधाःपितृदेवत्याः। पितृयज्ञाभिधानइत्यर्थः। ततः उच्छ्वंचस्वपृ

थिवीत्येकादशयक्रमस्तारपंक्तिः पंक्तिभेदः आद्योचेद्द्वादशकौ अंत्यावष्टकौ। तत्र उच्चैस्त्वभासीतित्रयोदश्यक्रउपांत्याजगती। ततःप्रतीचीनेम
मत्यंत्यर्क् अनुष्टुप् सोनिरुक्तेति। अथवाप्रजापतिर्देवताविकल्पेन अनिरुक्तशब्दात्तदनिरुक्तं प्राजापत्यं शंसतीति यथासोनिरुक्तरोदसी
नेत्यत्र यो ब्राह्मणस्कंनेः। यथाहंसः शुचिषदित्यानिरुक्तत्वं देवता असंभवइति सूर्यदेवत्वमित्यर्थः। सूक्तस्यानादेशाच्छेषास्त्रिष्टुभः
परंमृत्योइति सूक्तमंत्योष्टिर्मंदो॥ ॥इतिश्रीमदृग्वेदानुक्रमणिदीपिकायां सप्तमाष्टकेषष्ठोध्यायः॥ ॥निवर्त्तध्वमष्टौ मथितोभृगुर्वा
णिर्भार्गवश्च्यवनोवाप्रांगवंत्यानुष्टुभमग्नीषोमीयोद्वितीयोर्धर्चः षष्ठीगायत्र्यैंद्रीच।
निवर्त्तध्वमित्यष्टर्चं सूक्तं ८ यामायनः यमगोत्रो मननःमथितोनामऋषिः अथवावरुण
पुत्रोभृगुर्नामऋषिर्विकल्पेन ततःअग्नीषोमापुनर्वसूइत्यर्द्धर्चोग्नीषोमदेव
त्या ततःआनिवर्त्तनिवर्त्तयेतिषष्ठीसृक्गायत्रीचकारात्इंद्रदेवत्या सूक्तस्यानुष्टुप्छंदइति
निवर्त्तध्वमितिसूक्तस्याध्यायधर्मः। अथवक्ष्यमाणसूक्तसप्तकस्यद्रष्टुर्विशेषमाह। सप्तोत्तराण्यैं
द्रोविमदः प्राजापत्योवावासुक्रोवावसुकृद्वादर्शेतिशेषः सूक्तसप्तकस्यैंद्रोविमदोद
दर्श। अथवाप्रजापतिः अथवावासुक्रनामवसुकृद्विकल्पेन नोत्तरसप्तकइत्यर्थः
महेंद्राग्नेयंतुगायत्र्यमाद्येकपदापादएवपाशांत्यर्थः पराअनुष्टुबंत्येविराट्त्रिष्टुभौ।

महेंनोअपिवातयेतिदशर्चं सूक्तं १० इंद्रगोत्रोविमदऋषिः अथवाप्रजापतिगोत्रोवा। अथवावासुक्रनामवसुकृद्विकल्पेन अग्निर्देवता तु ३३८
शब्दात्उत्तरसूक्तमाग्नेयं गायत्रीछंदः महेंनोअपिवातयेत्याद्यर्क् एकपादादशाक्षराविराट्छंदः अनादेशात्तदर्धमेकपदेति।
सैवपादविकल्पेन शांत्यर्थविकल्पेनजपश्चेति सप्तादशुनिभिः पुरेत्याद्यनुक्रमणीव्यवहारः पादस्य पारायणं संप्रकीर्तितमिति मदानां
तिरित्यत्रप्रयोजनं ततःअग्निमीळेभुजांमित्यर्क्पराअनुष्टुप् ततःद्वे ऋचः खेत्इत्यर्क् त्रिपदादशाक्षराविराट्। ततःएवाते अग्नइत्यंत्य
र्क् त्रिष्टुप् एतदंत्येत्यर्थः। महेंनोअपीतिसूक्तस्याध्यायधर्मः॥ अग्निनाद्यावास्तारपंक्ती। आग्निनस्वद्रुक्तिभिरित्यष्टर्चं सूक्तं ८ इंद्रगोत्रोविमदऋषिः
अथवाप्रजापतिगोत्रोवा अथवावासुक्रनामवसुकृद्विकल्पेन तुशब्दात्अग्निर्देवता आस्तारपंक्तिछंदः पंक्तिभेदः अंत्यौचेद्द्वादशाक्षरौ आ
द्यावष्टाक्षराविति। आग्निंनस्वदृक्तिभिरितित्यान्यशास्त्रेसन्देवमन्त्रंवइति ब्राह्मणस्तुत्र्योः कुहपंचोनापुरस्ताद्बृहतंत्रिष्टुबंतंत्वाचिदानसूक्तं
नोनुष्टुभः कुहश्रुतइतिपंचदशर्चं सूक्तं १५ आनिरुक्तासंख्येति इंद्रगोत्रोविमदऋषिः। अथवाप्रजापतिगोत्रोवा। अथवावासुक्रनामव
सुक्रोविकल्पेन अनादेशादिंद्रोदेवता॥ पुरस्ताद्बृहतीछंदः आद्यश्चेद्द्वादशाक्षरः शेषास्त्रिरष्टाक्षराः ततःपिबापिबेदित्यंत्यर्क् त्रिष्टु
प् ततःत्वंत्याचिदात्मस्येत्यर्क् आनइंद्रपृक्षसइत्यर्क् त्वंनइंद्रशूरशूरैरित्यर्क् इत्येतात्रिष्टोष्टाक्षराः ततःपिबापिबेदित्यंत्यर्क् त्रिष्टुप् तुष्ट
भः कुहश्रुतइंद्रःकस्मिन्नद्येतिसूक्तेन केवल्यशस्त्रे ब्राह्मणस्त्र्योः यजामहेसप्ताद्यांत्यत्रिष्टुभोपंचम्यभिसारिणी। यजामहइतिसप्तर्चं
३३८ सूक्तं ७ इंद्रगोत्रोविमदऋषिः। अथवाप्रजापतिगोत्रोवा। अथवावासुक्रनामवसुकृद्विकल्पेन। अनादेशादिंद्रोदेवता। ततःयजामहइत्याद्य

ह्र। माकिर्नएनेत्यर्द्धर्चएतेद्वेऋचौत्रिष्टुभौ। ततः प्रोवाचेतिपंचर्चस्य सूक्तस्य अभिसारिणी त्रिष्टुप्‌भेदः। वैराजोजागतोचेतिशिष्टर्चः त्रिष्टुभंतस्येतिजागतं छं
दः। यजामहइंद्रंवज्रदक्षिणमितिद्वितीयानेवनेवेतिस्वचकारः॥ इंद्रसोमंषच्चास्तारपांक्तत्वाभिर्नेत्याहिस्तिसोनुष्टुभः। इंद्रसोममितिपंचर्चंसूक्तं ६
इंद्रगोत्रोत्पन्नोविमदऋषिः अथवाप्रजापतिगोत्रोवा। अथवा वासुक्रनामवसुकृद्वाकल्पेन। अनादेशात् इंद्रोदेवता। आस्तारपंक्तिछंदः पंक्तिभेदः
अंत्यौद्वेद्वादशाक्षरौ। आद्यावष्टाक्षराविति। तुशब्दादुत्तरस्य सूक्तस्य पांक्तेयं। ततः पुवंशाकेत्वं
त्याश्चिस्त्रश्चोशिवदेवत्यः। तासुनुष्टुप् छंदस्काः इंद्रसोममितिसूक्तंस्वाध्यायधर्मः भद्रमेकादश
सौम्यं। भद्रंनोअपिवातयइत्येकादशर्चंसूक्तं ११ इंद्रगोत्रोत्पन्नोविमदऋषिः। अथवाप्रजाप
तिगोत्रोवा। अथवावासुक्रोनामवसुकृद्वाकल्पेन। सोमोदेवता तुशब्दात्
आस्तारपंक्तिछंदः पंक्तिभेदः। अंत्यौचेद्वादशाक्षरौ। आद्यावष्टाक्षरौ
भद्रंनोअपिवातयइतिसूक्तंस्वाध्यायधर्मः। प्रहिनवपोक्षमानुष्टुभसाद्या
चतुर्थ्याद्युष्णिहौ। प्रयछेतिसूक्तंनवर्चं इंद्रगोत्रोत्पन्नोविमदऋषिः। अथवा
प्रजापतिगोत्रोवा। अथवावासुक्रोनामवसुकृद्वाकल्पेन। पूषादेवता। अनुष्टुप्छंदः
ततः प्रयछेत्याद्यर्द्धं मंसीमहीतिचतुर्थीसूक्तएतेद्वेऋचौचतुर्थ्याद्युष्णिहौ

चतुःसप्तकइति। प्रयछेतिसूक्तंस्वाध्यायधर्मः। इंद्रप्रजापत्ययोर्विमदस्तथावासुक्रोवसुकृद्वित्येवंयोन्न पूर्णोविधिः॥ असत्सुचतुर्विंशाद्यैरेंद्रोवसुक्रः॥ असत्सुमइति
चतुर्विंशत्यर्चंसूक्तं २४ इंद्रपुत्रोवसुक्रोनामऋषिः॥ अनादेशादिंद्रोदेवता। अनादेशात्त्रिष्टुप्छंदः। असत्सुमेजरितरित्सूक्तं हवीसहस्रंशाकेभिरिमहावतारण्य
के॥ तदुवासुक्रःकृष्णावसुक्रोवंनैतदहरितिप्रशंसा॥ विश्वोहिद्वादशैंद्रवसुक्रयोःसंवादऐंद्रः सूक्तस्यप्रथमयेंद्रस्यस्नुषापरोक्षवदिंद्रमाहेंद्रस्यपुत्रः शेषास्त्वे
चतुर्थर्च। विश्वोह्यन्यइतिद्वादशर्चंसूक्तं १२ इंद्रवसुक्रयोःपितापुत्रयोःसंवादऐंद्रः। अथऋषिज्ञानायस्त्विविशेषमाह। सूक्तस्येत्यादिंद्रस्यस्नुषावसुक्रपत्नी॥ स्व
कस्यप्रथमया विश्वोह्यन्यइत्यनयाऋचामेवेंद्रमज्ञापरोक्षवदसावाहतद्वदाहवदति। एतेनायर्चं विश्वोह्यन्यइतिवसुक्रपत्नीऋषिकाज्ञेया। तस्याइंद्रोदेवतेति।
ततःसरोरुवदितिद्वितीयादियुजः क्रमः चतुर्थवर्जितानामिति। एवाहिमांतवसंवर्द्धयंतीतिषष्ठीऋक्। देवासआयन्नित्यष्टम्यृक्। सुपर्णइत्थेतिदशम्यृक्।
एतेषामीभिर्विद्वादशस्यर्कइत्येताः पंचर्चः चतुर्थ्यातिरिक्तायुजइति। आसामृचामिंद्रऋषिः आसामृचांवसुक्रोदेवतेति। अथतृतीयादीनांचतुर्थ्यासहिता
नामयुजः क्रमोयंते। ततःआद्रणातइतितृतीयर्क्। इदंसुमइतिचतुर्थ्यृक्। कथातएतदितिपंचम्यृक्। एवाहिमांतवसंजघ्नुरस्याभिति सप्तम्यृक् शशः क्षु
रमितिनवम्यृक्। तेस्योगोधाइत्येकादश्यृक्इत्येताः षडृचः चतुर्थ्यासहिताः वासावसुक्रोनामऋषिः इंद्रोदेवतेति। परस्परसंवादसूक्तेसति। ऋ
षिर्देवतासहैवेत्यर्थः यस्यवाक्यंसऋषिः यातेनोच्यतेसादेवतेत्युक्तेः। अनादेशात्त्रिष्टुप्छंदः। अत्रेतिहासमाहुः। इंद्रपुत्रेवसुक्रेनाम्नियजमानसति
यज्ञमिंद्रः प्रच्छन्नंकुर्वन् आजगाम। तदागमनमिंद्रस्यस्नुषावसुक्रपत्नीनामावबुध्यत। ततःसाश्वशुरागमनकांक्षिणीपरिदेवनांचक्रे। अथेंद्रः प्री
तः प्रकाराभ्यंतरस्यास्याः प्रीत्यैस्वपुत्रेणवसुक्रेणसहसंवादमकरोदिति। विश्वोह्यन्यइतिसूक्तंस्वाध्यायधर्मः। अथेंद्रवसुक्रयोःप्रशंसेति। वनेनाष्टौ

॥ वनेनवायइत्यष्टर्चं सूक्तं ८ इंद्रपुत्रो वसुक्रो नाम ऋषिः ॥ अनादेशात् इंद्रो देवता । अनादेशात् त्रिष्टुप् छंदः ॥ वनेन वायो न्यधायि चाकन्नित्य ब्राह्मणाच्छंसी शस्त्रे ब्रा
ह्मणस्त्रयो ॥ ॥ प्रदेवत्रा पंचोना कवषरैलूष आपम पोनप्त्रीयं वा ॥ ॥ प्रदेवत्रेति पंचदशर्चं सूक्तं १५ अनुक्रमसंख्येति । इलूषपुत्रः कवषो नाम ऋषिः आपो
देवता । अथवा अपांनपाद्देवता विकल्पेन । अपांनपान्मधुमतीरपो दा इति मंत्रलिंगात् ॥ अनादेशात् त्रिष्टुप् छंदः ॥ तेकवषमैलूषमिति । अपिच । अपोनप्त्रीया अ
न्वाहेति ब्राह्मणस्त्रयो ॥ प्रदेवत्रा ब्रह्मणे गातुरेत्विति न देति स्तृतकार ॥ ॥ आ न एकादश वैश्वदेवं ॥ ॥ आ नो देवानामित्येकादशर्चं सूक्तं ११ प्रवन्नयः ऐलूषपु
त्रः कवषो नाम ऋषिः विश्वेदेवा देवता ॥ अनादेशात् त्रिष्टुप् छंदः आ नो देवानामिति सूक्तं स्वाध्यायधर्मः ॥ ॥ प्रमंदे नान पंचाद्या गात्रमन्त्याः ॥ ॥ प्र
मंदेतेति नवर्चं सूक्तं ९ कवषो नाम ऋषिः अनादेशात् इंद्रो देवता । प्रमंदेनेत्याद्याः पंच जगत्यः ॥ शेषाश्चत्वारो नादेशात् त्रिष्टुभः ॥ प्रमंदेनेति सू
क्तं स्वाध्यायधर्मः ॥ ॥ इति श्रीमदृग्वेदानुक्रमणिदीपिकायां सप्तमाष्टके सप्तमोऽध्यायः ॥ ॥ प्रमाद्या वैश्वदेव्यैंद्रः प्रगाथः परा गायत्र्यो हि कुरुश्रवणस्य त्रा
सदस्यवस्य दानस्तुतिः पराभिस्तेभिर्मित्रातिथौ राज्ञ तत्स्नेहाद्दृषिः कुपमश्रवसं पुत्रमस्य व्यशोकयत् । प्रमा युयुज्र इति नवर्चं सूक्तं ९ पूर्ववत् सूक्तसंख्येति । पू
र्ववत् कवषो नाम ऋषिः । अन्यस्मादृषेर्वचनात् प्रमायुयुज्र इत्याद्यर्क् वैश्वदेवी ॥ सा नादेशात् त्रिष्टुप् । ततः संमातपंतीत्यर्क् ऐंद्री ब्रहती । सं मा तपंतीत्यृकस
तो बृहती मीनत्ते को नादेशात् बार्हत प्रगाथः ॥ महेंद्रद्वदेवत्या । ततः कुरुश्रवणमावृणीत्याद्याः षडृचो गायत्र्यः ततः कुरुश्रवणमावृणीति द्वाभ्यामृग्भ्यां
त्रसदस्यवस्य पुत्रस्य कुरुश्रवणनाम्नो महाराजस्य दानं स्तूयते । तयोर्द्वयोः कुरुश्रवणनाम्नो दानं देवतेति । अथपराभिस्त्वतस्रभिर्ऋग्भि
श्चाभिर्यस्य प्रस्वादसो गिरइत्यादिभिर्ऋषिरैलूषः कवषो मित्रातिथिनाम्नि राज्ञि स्वते परलोकं गते शोकाभिभूतं मित्रातिथेः पुत्रमुपम

वोनामानं मित्रातिथेः स्नेहादुपमश्रवः स्नेहाद्धा न्येस्यपवशोक्यत् विगतशोकमकरोत् ततः यस्य प्रस्वादस इत्यादिस्तस्रभिः सृग्भिः मित्रातिथौ उपमश्रवो
नामानं देवतेति । कारिका ॥ यस्येति सूक्तशेषेण मृते मित्रातिथौ नृपे । उपमश्रवसः स्नेहादृषिः शोककृशं पातुरदिति ॥ प्रमा युयुज्र इति सूक्तं स्वाध्यायधर्मः ॥ प्रावे
पाः सप्तोना मौजवाद्यक्षो सक्तऋषिप्रसंसाचाक्षाकृतवनिंदा च सप्तमी जगती ॥ ॥ प्रावेपामिति चतुर्दशर्चं सूक्तं १४ आनुक्रमसंख्येति । मौजवान् मुजवन् पुत्रऽ
क्षो नाम ऋषिः । अथवा प्रकृतकवषो नाम ऋषिर्विकल्पेन ॥ वा विशिष्टत्वात् उत्तरत्र नानुवृत्तिः । अत्र चाक्षप्रशंसा क्रियते । अपिच । अक्षाकितवनिंदा क्रियते ।
तत्राक्षान्द्वादशीस्तौवीति । यो वः सेनानीरित्यृक् इति । ततः प्रावेपामित्याद्यर्क् अक्षास इदंकुशिन इति सप्तम्यृक् नीचा वर्तंत इति नवम्यृक् । अक्षैर्मा दीव्य इति च
यो दशर्चकरता मित्य चतुर्भिर्ऋग्भिर्द्वादशीसाहिताभिः अक्षा ऋषिस्तोतिस्तुतवान् । आसां पंचानामक्षा ऋषिर्देवतेति । अथाक्षनिंदा । ततः न मा मिमायेति द्विती
यर्क् । द्वेष्टि श्वश्रूरिति तृतीयर्क् । अन्ये जायामिति चतुर्थ्यर्क् । यदादीध्ये नेति पंचम्यृक् । सभामेति षष्ठी ऋक् । त्रिपंचाश इत्यष्टम्यृक् । जाया तप्यत इति दश
म्यृक् । स्त्रियं दृष्ट्वायेत्येकादश्यृक् । मित्रं कृणुध्वमिति चतुर्दश्यृक् । इत्येताभिर्नवभिर्ऋग्भिः अक्षाकितवनिंद्यत इति । आसां नवर्चानामक्षाकितवो देवतेति । त
तः अक्षास इदमिति सप्तम्यृक् जगती ॥ शिष्टास्त्रयोदशर्चो अनादेशात् त्रिष्टुभः ॥ एवमक्षसूक्ते कृतनिंदा च ऋषिप्रशंसा चेति नैरुक्ते । प्रावेपामेति सूक्तं स्वा
ध्यायधर्मः ॥ ॥ अबुध्रं लुशो धानाको वैश्वदेवं तु द्विःत्रिष्टुबंतं तु ॥ अबुध्रमुत्य इति चतुर्दशर्चं सूक्तं १४ पूर्ववत् सूक्तसंख्येति । धानाकस्य पुत्रो लुशो नाम
ऋषिः । विश्वेदेवा देवता । तुशब्दात् उत्तरस्य सूक्ते वैश्वदेवं । द्विःत्रिष्टुबंतस्येति जागतं तस्येति छंदः । विश्वे अद्य त्येत्यंत्ये द्वे ऋचौ त्रिष्टुभौ । तुशब्दात् उत्तरसूक्ते
द्विःत्रिष्टुबंतं । अबुध्रमित्य इति सूक्तं स्वाध्यायधर्मः ॥ उषासानक्ता ॥ उषासानक्तेति चतुर्दशर्चं सूक्तं १४ पूर्ववत् सूक्तसंख्येति । पूर्ववत् लुशो नाम ऋषिः
तुशब्दात् द्विःत्रिष्टुबंतस्येति जागतं छंदः ॥ येसा वनुरित्यंत्ये द्वे ऋचौ त्रिष्टुभौ ॥ उषासानक्तेति सूक्तं स्वाध्यायधर्मः ॥ महीद्वादशसौर्यभितपाः सौर्यं
नमो

१२० जागतं वैत्रिष्टुब्दशमी॥ नमो मित्रस्येति द्वादशर्चं सूक्तं १२ सूर्यपुत्रोऽभितपाः स ऋषिः सूर्यो देवता। जगती छंदः। वैशब्दात् पंच सूक्तानि जागतानि। शंनो भ
भवन्त्वसौ दशम्यत्क त्रिष्टुप्। नमो मित्रस्य वरुणस्येति सूक्तमाश्विन सहस्रे ब्राह्मणस्तत्र योः। अस्मिन्नः पंच मुष्कवानिंद्रः। अस्मिन्न इंद्रेति पंचर्चं सूक्तं ५
मुष्कवद्गुण इंद्र ऋषिः मुष्कवान् इंद्रस्य विशेषणमित्यर्थः। अस्य गोत्रं नास्त्यपदेशात्। नत्वांगिरसत्वं राजर्षित्वात्। अनादेशात् इंद्रो देवता। वैशब्दात्त्वा
ह्रीतं छंदः। अस्मिन्न इंद्रेति सूक्तं स्वाध्याय धर्मः॥ ॥यो वां पर्ज्मा कक्षीवती घोषाश्विनं हि त्रिष्टुबंतं। यो वां परिज्मेति चतुर्दशर्चं सूक्तं १४ अनिरुक्ता
संख्येति। कक्षीवतो नाम राज्ञः पुत्री घोषानाम्नी ऋषिकस्य पात्। अश्विनौ देवता॥ हिशब्दात् त्रीणि सूक्तान्याश्विदेवत्यानि॥ त्रिष्टुबंतस्येति तथा
वैशब्दात् जागतं छंदः। एतं वां स्तोममश्विनावित्यंत्या त्रिष्टुप्। यो वां परिज्मेति त्रीणि सूक्तानि प्रातरनुवाकानुमंत्रणे सूत्रकारः॥ ॥रथं यांतं॥ ॥
रथं यांतमिति चतुर्दशर्चं सूक्तं १४ पूर्ववदस्य सूक्त संख्येति। पूर्ववत् कक्षीवत राजः पुत्री घोषानाम्नी ऋषिका पश्यत्। हिशब्दात् अश्विनौ देवता। वैशब्दा
त् जागतं छंदः। रथं यांतमिति सूक्तं प्रातरनुवाकानुमंत्रणे सूत्रकारः। ।समानं त्वं सुहस्त्यो घौषेयः। ।समानमुत्यमिति त्वं सूक्तं त्वं २ कक्षीवतपु
त्री घोषायाः पुत्रः सुहस्त्यनाम ऋषिः। हिशब्दात् अश्विनौ देवता। वैशब्दात् जागतं छंदः। समानमुत्यमिति सूक्तं प्रातरनुवाकानुमंत्रणे सूत्रकारः।
अस्त्वेवैकादश कृष्णः। ।यस्ते स्वधतरमित्येकादशर्चं सूक्तं ११ आंगिरसपुत्रः कृष्ण ऋषिः। अनुक्तगोत्रमांगिरसं विद्यादिति वचनात्। अनादेशात् इंद्रो
देवता। अनादेशात् त्रिष्टुप् छंदः। अस्ते व स्वधतरमिति सूक्तं ब्राह्मणाच्छंसी स्वैरीं श्रेस्तत्कारः॥ ॥अच्छामीह त्रिष्टुबंतं तु। ।अच्छायमिंद्रमित्येकाद
शर्चं सूक्तं ११ पूर्ववदस्य सूक्त संख्येति। पूर्ववत् कृष्ण ऋषिः। अनादेशात् इंद्रो देवता। त्रिष्टुबंतस्येति जागतं छंदः। तुशब्दात् उत्तर सूक्तं हि त्रिष्टुबंतं। गोभि
ष्टरेमेत्यंत्ये द्वे ऋचौ त्रिष्टुभौ। अच्छा म इंद्रमिति सूक्तमुक्थपर्याय शास्त्रे सूत्रकारः। आयात्वत्रि त्रिष्टुबादि। आयात्विंद्र इत्येकादशर्चं सूक्तं ११ पूर्वव १२०

दस्य सूक्त संख्येति। पूर्ववत् कृष्ण ऋषिः। अन्यस्याहषेर्वचनात्। अनादेशात् इंद्रो देवता। आयात्विंद्र इत्याद्यास्तिस्रश्च त्रिष्टुभः। तुशब्दात् गोभिष्टरेमेत्यंत्ये
द्वे ऋचौ त्रिष्टुभौ। शिष्टास्तत्र त्रिष्टुबंतस्येति जागतं छंदः। आयात्विंद्रः स्वपतिरिति ब्राह्मणाच्छंसी शस्त्रे सूत्रकारः। ।दिवस्परि द्वादश वत्सप्रियाग्नेयं
तु। दिवस्परीति द्वादशर्चं सूक्तं १२। भालंदन पुत्रो वत्सप्रिर्नाम ऋषिः। प्रदेवमच्छेति भालंदनो वत्सप्रिः पूर्वमुक्तं। अग्निर्देवता। तुशब्दात् उत्तर सूक्तमाग्ने
यं। अनादेशात् त्रिष्टुप् छंदः॥ ॥ इति श्रीमदृग्वेदानुक्रमणिदीपिकायां डोरवलोपनामक कृष्ण ह्रुवोसप्तमाष्टकः समाप्तः॥ ॥महोवा दश॥
महो वा जात इति दशर्चं सूक्तं १० पूर्ववत् वत्सप्रिर्नाम ऋषिः। तुशब्दात् अग्निर्देवता। अनादेशात् त्रिष्टुप् छंदः॥ दिवस्परीति सूक्तयोः शितमहोवा
जात इति सूक्तं सहैव प्रातरनुवाकानुमंत्रणे सूत्रकारः॥ ॥जगृभ्मा ष्टौ सप्तगुर्वैकुंठमिंद्रं तुष्टाव॥ जगृभ्मा इत्यष्टर्चं सूक्तं ८ आंगिरस पुत्रः स
प्तगुर्नाम ऋषिः। वैकुंठ इंद्रो देवता। वैकुंठ इतींद्रस्य विशेषणं। यथैतदिंद्रो वैकुंठ इति नैरुक्ते। अनादेशात् त्रिष्टुप् छंदः। जगृभ्मा इति सूक्तं स्वाध्या
य धर्मः। अथेंद्रस्य वैकुंठत्वमुपपादयितुमितिहासमाह। विकुंठा नामासुरी इंद्रतुल्यं पुत्रमिच्छंती महत्तपस्तेपे तस्याः स्वयमेवेंद्रः पुत्रो जज्ञे। विकुं
ठा नाम्नी आसुरी असुरजातिरासीत्येवं सतेत्यर्थः। तपः श्चांद्रायणादिकं परतः कृतवती। स्वयमेव पुत्रो जज्ञे स्फवान्। इंद्रतुल्यं पुत्रमिच्छंती इंद्रस
मानमिच्छंतीत्यर्थः। इत्येवमिंद्रस्य वैकुंठत्वमिंद्रः तस्यां थास्यैव वैकुंठस्य सप्तगुस्कवस्यैंद्रोत्तर सूक्तत्रयं दर्शितं स्कत्यत्वं चाह। स सप्तगुस्तं विसंहृष्य आ
त्मानमुच्चैरस्तिभिस्तुष्टाव। जगृभ्मेत्यादि सूक्तदर्शिनः सप्तगुर्नाम ऋषेः स्तुत्या प्रीत इति। स वैकुंठ इंद्रो विस्मितः स्वमहात्म्यं बुध्या ऋषिमध्य
आत्मानं महं भुवमित्यादि सूक्तत्रयेण तुष्टाव। एवं चाहं भुवमित्यादि सूक्तत्रये देवतात्वमृषित्वं चैंद्रस्येति सिद्धं भवति। अहं भुवमेकादशां
त्ये त्रिष्टुभौ सप्तमी च। अहं भुवमित्येकादशर्चं सूक्तं ११ वैकुंठ इंद्र ऋषिः। वैकुंठगुण इंद्रो देवता। त्रिष्टुबंतस्येति जागतं छंदः। ततः पने मस्मिन्त्वं

१२२ त्येद्वे स्तचौ त्रिष्टुभौ। ततः अभीदमेकमेक इति सप्तम्यस्य चकारात् त्रिष्टुप्॥ अहंभुवं वसुन इति सूक्तं ब्राह्मणस्वरयोः। अहं दामित्योपाधे च॥ अहं दां गृणत इत्ये
कादशर्चं सूक्तं ११ पूर्ववत्सूक्तसंख्येति। पूर्ववत् वैकुंठ इंद्र ऋषिः। वैकुंठगुण इंद्रो देवता। त्रिष्टुबंतस्येति चकारात्। जागतं छंदः ततः एवादेवानित्यंत्यर्कं मे
धुरिंद्रमित्युपाधर्के। एते द्वे ऋचौ चकारात् त्रिष्टुभौ। अहं दां गृणत इति सूक्तं रात्रिपर्यायशस्त्रे सूत्रकारः। । प्रवोमहेसमद्धजगत्याद्यंतंकेवभिकाधि
न्वो॥ ॥प्रवो महे मंदमानायेति सप्तर्चं सूक्तं ७ पूर्ववद्वैकुंठ गुण इंद्र ऋषिः। वैकुंठगुण इंद्रो देवता। वैकुंठ इंद्रस्य विशेषणमित्यर्थः। ततः प्रवोम
ह इत्याद्ये द्वे ऋचौ जगत्यौ। ततः ऐता विश्वा सवनेत्यंत्ये द्वे ऋचौ जगत्यौ। ततः केतन इंद्र इति चाव भिसारिण्यौ। आद्यौ द्वौ पादौ दशाक्षरौ। अंत्ये द्वौ
द्वादशाक्षरौ। वैराजो जागतोचेति त्रिष्टुप्भेदः। अवानुकं ज्यायानुनित्यक अनादेशात् त्रिष्टुप्। प्रवामहे मंदसाना इत्यैंद्रे निष्केवल्य इत्यारण्य
के॥ ॥इंद्रो वैकुंठस्य पूर्णो विधिः॥ ॥अथ महत्तदुल्बमित्यादि सूक्तत्रयस्य ऋषिदेवतज्ञानार्थं कथामाह॥ ॥वषट्कारेण वज्रेण भ्रातृष्वध्वसौ
चीकोग्निरणः प्रविश्य देवैः समवदद्युत्तरैस्त्रिभिः। ।स्वभ्रातृषु त्रिषु अग्निहोतृत्वात् वषट्कारेण वज्ररूपेण वृक्णेषु छिन्नेषु सत्सु। एषां कनिष्ठः सौ
चीकोनामाग्निर्वषट्कारः हविर्वहनाख्यात् भीतो यः प्रविश्य नष्टः तत्र द्वाव प्रदर्शितः सन् अनेषु मागतैर्देवैः सह समवदत् संवादमुत्तरसूक्तत्र
येण वषट्कारहा विर्वहनभीतिर्नष्टं त्वं च। कल्पांतरात्। अग्नेस्त्रयो ज्यायांसो भ्रातर आसंते। देवेभ्यो हव्यं वहंतः प्रमीयंते इति हास स्मामनंति। अ
थ सूक्तत्रयं विविच्य दर्शयति। । महत्तन्न वत त्रयुजो ग्निवाक्यं विश्वदस्तुत रं च कं षट्कं मयुजो देवानां यमेच्छामित्युत्तरं चैकादशकं तदद्ये त्रिवृत्तोग्ने
स्त्वंनु माधाजगत्यो प्रमीव जं। । महत्तदुल्बमिति नवर्चं सूक्तं ९ विश्वेदेवा उवाच पक्वेचं सूक्तं ६ अथ महत्तदुल्बमिति द्वितीयादि युजर्चः। क्रमः ततः को १२२

मा ददर्शेति द्वितीयर्क् होत्रादहमिति चतुर्थ्यृक्। अग्नेः पूर्वे भ्रातर इति षष्ठी ऋक्। प्रयाजान्म इत्यष्टम्यृक्। ताभ्यस्तस्याः सर्वैः। तथा विश्वे देवा इत्युत्तरस्
क्तत्रकारात् पक्वेचं भिक्तिवासहैवदशोग्निवाक्यं॥ आसामृचामग्निर्ऋषिः देवा देवता। ततः यमैच्छामित्युत्तरमेकादशर्चं सूक्तं ११ ततः महत्तदुल्ब
मित्याद्युजर्चः क्रमः महत्तदुल्बमिति प्रथमर्क्। ऐच्छाम त्वेति तृतीयर्क्। एहि मनुरिति पंचम्यृक्। कुर्मस्त आयुरिति सप्तम्यर्क्। तव प्रयाजा इति न
वम्यृक्। इत्येताः पंचर्चः पूर्वसूक्तोक्ता अयुजः। तथोत्तरसूक्तं यमैच्छामिति चकारात् एकादशर्चं चैतामीक्षितात् पंचदशी चे देवानां वाक्यं। आसांषोक
ष राद्धानां देवर्षिः। देवा देवतेति। यस्य वाक्यं स ऋषिरित्युक्तं। तं तुं तं च त्वं नजस इत्याद्यंत्याः सर्वा ऋचो जगत्यः। तत्रारमन्वती रीयत इत्यष्टम्यृक् जगतीव
र्जं। सा। अनादेशात् त्रिष्टुप्। सूक्तत्रयस्य शिष्टा ऋचाः अनादेशात् त्रिष्टुभः। महत्तदुल्बमित्यासां मध्ये प्रयाजान्म इति द्वे ऋचौ प्रयाजानुयाजेषु प्र
शंसेति। आग्नेयावेव प्रयाजा आग्नेया अनुयाजा इति च ब्राह्मणं नैरुक्ते आख्या। महत्तदुल्बमिति सूक्तत्रयं स्वाध्यायधर्मेः॥ ॥तां सुपट्र बृहदु
क्थो वामदेव्यः। तां सु ते इति पक्वेचं सूक्तं ६ वामदेव पुत्रो बृहदुक्थो नाम ऋषिः। अनादेशात् इंद्रो देवता। अनादेशात् त्रिष्टुप् छंदः। तां सु ते कीर्ति
मिति सूक्तं ब्राह्मणाच्छंस्यारण्ये पृष्ठ्यहर्तीसहस्रशस्त्रे। ।हरेष्ठे ॥ हरे वन्नाम इत्यष्टर्चं सूक्तं ८ पूर्ववत् बृहदुक्थ ऋषिः। अनादेशात् इंद्रो देवता। अनादे
शात् त्रिष्टुप् छंदः। हरे तन्नामेति सूक्तं स्वाध्यायधर्मः। ।इदं त सप्त वैश्वदेवं तु। ।चतुर्थ्याद्यास्तिस्रो जगत्यः। इदं त एकमिति सप्तर्चं सूक्तं ७ पू
र्ववत् बृहदुक्थ ऋषिः। विश्वेदेवा देवता। तु शब्दात् उत्तर सूक्तं वैश्वदेवं। ततः महिम्न एषामित्याद्यास्तिस्र ऋचो जगत्यः। ततः इदं त एकमित्याद्यास्तिस्रो
र्चः नयानावनसोद इत्यंत्येताभ्यस्तस्याः चानादेशात् त्रिष्टुभः। इदं त एकं पर ऊत एकमिति संवदमो दिविसूत्रकारः। अथ मा प्रगामेत्यादि उत्तरसूक्त

चतुष्टयस्यार्थमाह॥ ॥पराणि चत्वारि सूक्तान्युक्तान्ऋषयो द्वे पदे त्वत्रि मंडले॥ ॥अत्र हृष्टे पंचमे मंडले। अबोध्यग्निः समिधेत्यादौ द्वे पदे द्विपदास्
सूक्ते। अग्ने त्वं नो अंतम इति। अनयर्षयो मेत्वं गौपायना लौपायना विकल्पेन बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुरित्येवमादिभिस्त्वा। ते पराणि सूक्तानि
न्येते ऋषयो पश्यन्निति विशेषः ततः चत्वारि सूक्तान्युच्यंते। मा प्रगामेति। यत्ते यममिति। प्रतार्यायुरिति। आजनमिति। एतानि चत्वारि सूक्तानि कथ
कथयन्नेव सूक्तचतुष्टयस्य ज्ञातव्यं सर्वमाह॥ ॥अत्रेतिहासः॥ ॥अथ हैक्ष्वाको राजा असमातिर्गौपायनान्बंध्वादीन्पुरोहितान्सत्कृत्यान्यौ मा
याविनौ श्रेष्ठतमौ मत्वा पुरोदधे। तदा मतस्कृद्धा अभिचेरुः। ततो मायाविनौ सुबंधोः प्राणानाक्षिपतुरथ हास्य भ्रातरस्त्रयः। अथ ह खलु पुरा ऐक्ष्वा
कुपुत्रो राजा असमातिर्नामा नेतृकेषां गौपायनिकस्मार्चव्यः। अपि तु गौपायनान्यमेवाल्विक्षु गौपायनानि पूर्वमात्मनैव वृत्वा वा बंधुः सु
बंधुः श्रुतबंधुर्विप्रबंधुस्तत्कालमन्यो द्विजो किरातकुलीतिः हृद्देवो कनामानौ मायाविदौ श्रेष्ठतमौ मत्वा पुरोदधे पुरोहितत्वेनावृणीत। तम
समातिमितरे बंध्वादयः आभिचेरुः अभिचरितवंतः। अथ तावपि तत्पुरोहितौ घृत्वेति। बृहद्देवताविदः प्राणान्जीवितुं सिसुबंध्यसवः प्राणा
इत्यतैर्घृष्टकः आचिक्षिपतुः आत्मवयंतां स्नेपेस सोमं निसिद्धित्वं पुत्वांकित्वानि। अथानंतरं हेतिरवदे अस्य सुबंधोर्भ्रातरस्त्रयो बंधुः श्रुतबं
धुर्विप्रबंधुरिति॥ ॥मा प्रगामेति षट्कं गायत्रं स्वस्त्ययनं जप्ता॥ मा प्रगामेति षळर्चं सूक्तं ६ गौपायनानीति बंधुः सुबंधुः श्रुतबंधुर्विप्रबं
ध्वादयो ऋषयः तुशब्दात् विश्वेदेवा देवता। गायत्री छंदः। मा प्रगामेत्येतन्नइति जपं इति सूत्रकारः। इदं सूक्तं स्वस्त्ययनमावेनाना पाप्मि हे

हेतुं वैश्वदेवं जपित्वेत्यर्थः। यत्त इति द्वादशर्चमानुष्टुभं मन आवर्तनं जेपुः॥ ॥यत्ते यममिति द्वादशर्चं सूक्तं। पूर्ववद्गौपायनात् बंध्वादयो ऋषयः। म ३०८
न सो जीवितस्य देहान्निर्गतस्य पुनर्देहप्रवेशनहेतुस्ततो मनो देवता। अनुष्टुप्छंदः। ततः मन आवर्तनं जेपुरिति मनःशब्दः सूक्तं जपितवंत इत्यर्थः॥
प्रतारीति दशर्चे चतस्रो निर्ऋत्यपनोदार्थं जेपुश्चतुर्थ्यां सोमं चास्तुवन्मृत्योरपगमायोत्तराभ्यां देवीमसुनीतिं सप्तम्यां लिंगोक्तदेवताः। शिष्टाभिः
पंक्तिमहापंक्ति पंक्त्युत्तराभिर्द्यावापृथिव्यौ समिंद्रेतींद्रं चाधर्वेन॥ ॥प्रतार्यायुरिति दशर्चं सूक्तं १०॥ पूर्ववद्गौपायनान्बंध्वादयो ऋषयः। ततः
प्रतार्यायुरित्याद्याश्चतस्रो निर्ऋत्यपनोदार्थं देहात्प्राणान्च्यावयतीति निर्ऋतिरस्तान्निष्ट्यर्थं जेपुः जपितवंतः सा निर्ऋतिर्देवता। ततः मो षु णः सोमे
त्ति चतुर्थ्यर्चा सोमः स्तुतिः तस्य चकारात् सोमो देवतेति। मृत्योर्निवृत्त्यर्थमुत्तराभ्यामित्यसुनीते मनो अस्मास्विति द्वाभ्यां पंचमी षष्ठी
भ्यामसुनीतिनाम्नीं देवीमस्तुवन्। सासुनीती देवी देवता मृत्योरपगमायेत्यर्थः। ततः पुनर्नो असुमिति सप्तम्यृचा लिंगोक्तदेवताः पृथ्वी। सोमः पू
षा पथ्यां स्वस्त्याख्या। अस्तुवन्। ततः शं रोदसी इत्यष्टम्यादिभिस्तिसृभिः साग्निः द्यावापृथिव्यावस्तुवन्। एतासां द्यावापृथिव्यौ देवते इति। ततः
समुद्रेरथे त्वं ब्यो घर्मं इंद्र देवत्या विकल्पेन द्यावापृथिव्यौ वा। प्रतार्यायुरित्याद्याः अस सप्तर्चा मनादेशात्त्रिष्टुभः। ततः शं रोदसी इत्यष्टम्यर्चं पंक्तिः। ततः अ
वद्वकइति नवम्यर्क महापंक्तिः पंचकष्टकाः जगतीमिदं। ततः समिंद्रेरयेति दशम्यर्क पंक्तिरित्युत्तरा त्रिष्टुप्छंदः। अथोपदेशादशाहरो। अंत्यास्वयोष्टकयः
प्रतार्यायुरिति सूक्तं स्वाध्यायधर्मः॥ ॥आजनमिति द्वादशर्चमानुष्टुभं ततस्तिभिरसमातिमस्तुवन् पंचम्येंद्रं षष्ठ्या गस्त्यस्वसा मातेषां राजान
मस्तौत्तत्पराभिः सुबंधोर्जीवमाकृष्य स मंत्या याल्धसंज्ञमस्पृशन् पंचाद्यागायत्र्योष्टम्याद्येपंक्ती। ।आजनमिति द्वादशर्चं सूक्तं ४८ पूर्ववद्गौ

१२४ पायनान्बंध्वादीयोऋषयः। ततः आजनमितित्वस्तभिः सप्तभिः इक्ष्वाकुपुत्रमसमातिमस्तुवन्॥ आसामृचामसमातिर्नामदेवतेति। ततः इंद्रक्षत्रेति पं
चम्यर्चा इंद्रमस्तुवन्। तस्या इंद्रो देवतेति। ततः अगस्त्यस्येति षष्ठीमृक्। अगस्त्यस्य स्वसा। एषां बंध्वादीनां माता राजानमसमातिं स्तु पुत्रमस्तौत्। अन्
स्या अगस्त्यस्य स्वसा देवता। ततः पराभिरयं माताऽयं पितेत्यादिभिः पंचभिरृग्भिः सुबंधोर्मृतस्य जीवं जीवितुं यममुपस्थाकुयन्। एतासां पंचानां जी
वनं देवतेति। आहूयतेत्यर्थः। ततः अयं मे हस्त इत्यंत्यर्चं हस्तस्पर्शात् लब्धसंज्ञं लब्धासुमिति स एव हस्तदेवतेति। सुबंधुमस्पृशन्समप्रावंत। ततः
आजनमित्याद्याः पंचर्चो गायत्र्यः। ततः यथा युगमित्यध्याद्ये द्वे ऋचौ पंक्ती॥ सूक्तस्य शिष्टा ऋचोऽनुष्टुभः। आजनमिति सूक्तं स्वाध्यायधर्मः॥ ॥इद
मित्था सप्ताधिका नाभानेदिष्ठो मानवो वैश्वदेवं तत्तु॥ ॥इदमित्थेति सप्तविंशत्यृचं सूक्तं २७॥ अनिरुक्तासंख्येति। मनुपुत्रो नाभानेदिष्ठो ना
मऋषिः। विश्वेदेवा देवता। तत्तुशब्दात् षट्सूक्तानि वैश्वदेव्यानि॥ अनादेशात्त्रिष्टुप्छंदः॥ ॥इति श्रीमदृग्वेदानुक्रमणिदीपिकायामष्टम
ष्टके प्रथमोऽध्यायः॥ ॥ये यज्ञेनैकादशाद्याः षळंगिरसां स्तुतिर्वांत्या त्रिष्टुप्पंचम्यनुष्टुप्प्रागाथानुष्टुभौ गायत्री चतस्रोंत्याः सावर्णेर्दान
स्तुतिः। ये यज्ञेनेत्येकादशर्चं सूक्तं ११ पूर्ववन्नाभानेदिष्ठो नाम ऋषिः। तत्तुशब्दात् विश्वेदेवा देवता। ततः ये यज्ञेत्याद्याः षडृचो अंगिरसः स्तु
तिः। आसामृचामंगिरसो देवता विकल्पेन। ततः सहस्रदा ग्रामणीरित्यंत्यर्क् त्रिष्टुप्। विरूपास इति पंचम्यृक् अनुष्टुप्। ततः ये अग्नेः परि जज्ञि
र इत्यृक् बृहती। इंद्रेण युजेत्यृक् सतोबृहतीत्येते द्वे ऋचौ मिलित्वैकोनादेशात् बार्हतः प्रगाथ इति। ततः प्र नूनमित्याद्ये द्वे ऋचावनुष्टुभौ। उ
त दासेत्यृक् गायत्री। ततः प्र नूनं जायतामित्यंत्याश्चतस्रः। सावर्णेर्महाराजस्य दानस्तुतिः। तासां सावर्णदानं देवतेति। ये यज्ञ इत्याद्याश्व १२४

त्वर्चोऽनादेशात् त्रिष्टुभः। इदमित्था रौद्रं गूर्तवचा ये यज्ञेन दक्षिणया समक्त इति वैश्वदेवमिति ब्राह्मणस्त्रयोः। ।परावत ऊना गयः प्लातो द्वित्रिष्टु
बंतं तु स्वस्तिनस्त्रिष्टुब्वा सा सहोत्तरया पथ्यास्वस्तिदेवत्या। परावतो य इति सप्तदशर्चं सूक्तं १७ अनिरुक्तासंख्येति। प्लातः पुत्रो गयनाम ऋषिः। एवा प्लतेः दश २
सूनुरवीवृधद् इति मंत्रलिंगात्। तत्तुशब्दात् विश्वेदेवा देवता। द्वित्रिष्टुबंतस्येति जागतं छंदः। ततः स्वस्तिरिद्धि प्रपथ इति अंत्ये द्वे ऋचौ त्रिष्टुभौ। तुशब्दात्
उत्तरसूक्ते द्वित्रिष्टुबंतं। ततः स्वस्ति नः पथ्यासु धन्वस्वित्यृक् विकल्पेन त्रिष्टुप्। ततः स्वस्ति नः पथ्यासु धन्वस्वित्यृक् सहोत्तरया। स्वस्तिरिद्धि प्रपथ
इति द्वे ऋचौ पथ्यास्वस्तिदेवत्ये। उभे अपि पथ्यास्वस्तिदेवते इत्यर्थः। श्रूयते। स्वस्ति नः पथ्यासु धन्वसु। स्वस्तिरिद्धि प्रपथे श्रेष्ठेति पथ्यायाः स्वस्तेस्त्रिष्टु
भाविति ब्राह्मणस्त्रयोः। परावतो ये दिधिषंत आप्यमिति वैश्वदेवमिति ब्राह्मणस्त्रयोः॥ ॥कथायंभेत्रिष्टुप्॥ ॥कथा देवानामिति सप्तदशर्चं
सूक्तं १७ पूर्ववत्सूक्तसंख्येति। पूर्ववद्गयनाम ऋषिः। तत्तुशब्दात् विश्वेदेवा देवता। तुशब्दात् द्वित्रिष्टुबंतस्येति जागतं छंदः। तत एवा कविस्तुवी
रवानित्यंत्ये द्वे ऋचौ त्रिष्टुभौ। ततः यं मेधिय मित्यृक् त्रिष्टुप्। कथा देवानामिति सूक्तं स्वाध्यायधर्मः। अग्निरिंद्रः पंचोना वसुकर्णो वासुक्रस्त्रिष्टुभं
तं तु॥ अग्निरिंद्र इति पंचर्चं सूक्तं ५ अनिरुक्तासंख्येति। वसुक्रपुत्रो वसुकर्णो नाम ऋषिः। तुशब्दात् विश्वेदेवा देवता। त्रिष्टुबंतस्येति जागतं छंदः।
तुशब्दात् उत्तरसूक्ते त्रिष्टुबंतं। अग्निरिंद्र इति सूक्तं स्वाध्यायधर्मः। देवान् हुवे। देवान् हुव इति पंचदशर्चं सूक्तं १५ पूर्ववत्सूक्तसंख्येति। पूर्ववद्वसु
कर्णो नाम ऋषिः। तत्तुशब्दात् विश्वेदेवा देवता। तुशब्दात् त्रिष्टुबंतस्येति जागतं छंदः। देवान्वसिष्ठ इत्यंत्यर्क् त्रिष्टुप्। देवान् हुवे बृहच्छ्रवसः स्व
स्तय इति वैश्वदेवमिति वैश्वदेवशब्देन ब्राह्मणस्त्रयोः। ।इमां धियं द्वादशाद्यास्यो बार्हस्पत्यं तु। इमां धियमिति द्वादशर्चं सूक्तं १२ आंगिरस

पुत्रोयास्यनामऋषिः। बृहस्पतिर्देवता। तुशब्दात् उत्तरसूक्तं बार्हस्पत्यं। अनादेशात्त्रिष्टुप्छंदः। इमांधियमितिसूक्तस्याध्यायधर्मः॥ ॥उदप्रुतः॥ ॥
उदप्रुतइतिद्वादशर्चंसूक्तं१२ पूर्ववत्सूक्तसंख्येति। पूर्ववत्अयास्यऋषिः तुशब्दात्बृहस्पतिर्देवता। अनादेशात्त्रिष्टुप्छंदः। उदप्रुतइतिसूक्तं१२
पर्यायशास्त्रेसूक्तं१२ भद्राः। कामिनोवाध्यश्वआग्नेय्यंजगत्याद्या। भद्राअग्नेरितिद्वादशर्चंसूक्तं१२ पूर्ववत्सूक्तसंख्येति। वध्यश्वपुत्रः सुमित्रोना
मऋषिः अग्निर्देवता। ततः भद्राअग्नेरित्याद्योद्वेऋचौजगत्यौ। शेषास्तुअनादेशात्त्रिष्टुभः॥ भद्राअग्नेरितिसूक्तस्याध्यायधर्मः॥ इमांमएका
दशाग्नेयं॥ इमांमेअग्नेइत्येकादशर्चंसूक्तं११ पूर्ववत्सुमित्रोनामऋषिः आप्रीसूक्तोक्तादेवताः। आप्रशब्दइत्यनेनराशंसदेवतंसूक्तं। तनून
पाद्वर्जमित्यर्थः। वाध्यश्वमितिनाराशंसवतीदिनेरुक्ते। अनादेशात्त्रिष्टुप्छंदः। समिद्धएकादशाधभितितिनिदर्शनं। बृहस्पतेर्बृहस्पतिर्ज्ञानं
तुष्टावनवमीजगती। बृहस्पतेप्रथममित्येकादशर्चंसूक्तं११ पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रोबृहस्पतिर्नामऋषिः बृहस्पतिरांगिरसो
हविष्मानितिमंत्रलिंगदर्शनात्। ज्ञानरूपःपरमात्मादेवता। ज्ञानरूपंब्रह्मस्तुतिः ततः इमेयेनार्वागितिनवम्यृक्जगती। शिष्टादशर्चोअना
देशात्त्रिष्टुभः कारिका। ज्योतिरूपंपरंब्रह्मतद्योगात्सुधाश्रुते। तद्ब्रह्मज्ञानमभिष्टौत्सूक्तेनाथबृहस्पतिरिति। बृहस्पतेप्रथमंवाचोअग्र
मित्यध्यात्मसूक्तंतिरारण्यके॥ ॥इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांअष्टमाष्टकेद्वितीयोध्यायः॥ ॥देवानांनवलोक्योवाबृहस्पतिर्वा
क्षायण्यदितिर्वादेवमानुष्टुभं॥ देवानान्वितिनवर्चंसूक्तं९ लौक्यःलोकनाम्नपुत्रोबृहस्पतिर्ऋषिः अथवांगिरसपुत्रोबृहस्पतिर्विकल्पेना
वादाक्षायणीविदक्षदुहिता। आदितिर्ऋषिकाविकल्पेन। आदित्यमध्येवस्कतादितिर्दाक्षायणीविनेरुक्ते। प्रशंसा। आदितेर्दक्षोअजायत

तिमंत्रदर्शनात्। देवादेवता। अनुष्टुप्छंदः। देवानांनुवयमितिसूक्तस्याध्यायधर्मः। जनिष्ठाएकादशगौरिवीतिः जनिष्ठाउग्रः सहसेतुरायेतिएकादशर्चंसू
क्तं शक्तिपुत्रोगौरिवीतिर्नामऋषिः। गौरीवीतिर्हवैशाक्त्योनेदिष्ठमितिश्रुतिः। अनादेशात्इंद्रोदेवता। अनादेशात्त्रिष्टुप्छंदः। जनिष्ठाउग्रः सहसे
तुरायेतिसूक्तंमरुत्वतीयशस्त्रेब्राह्मणस्तृतीयः। वस्रंनांषट्॥ वस्रंनावेतिषडर्चंसूक्तं६ पूर्ववत्गौरिवीतिर्ऋषिः। अनादेशात्इंद्रोदेवता। अनादेशात्
त्रिष्टुप्छंदः। वस्रांवानर्क्षइतिइतिसूक्तस्याध्यायधर्मः। प्रसुनवसिंधुक्षित्प्रियमेधोनदीस्त्वानर्जागतंतु। प्रसुवआपइतिनवर्चंसूक्तं९ प्रियमे
धपुत्रः सिंधुक्षिन्नामऋषिः। ततः गंगायमुनासरस्वतीत्यादिसर्वानद्योस्तूयंते। तानदीदेवतेत्यर्थः। इमंमेगंगेयमुनेसरस्वतीतिमंत्रलिंगात्। तत्रगं
गागमनाद्यमुनायमुनावतीगच्छतीतथास्के। नैरुक्तेप्रशंसा। जगतीछंदः। तुशब्दात्उत्तरसूक्तंजागतं। प्रसुवआपइतिसूक्तंस्मार्तकर्माभिषेचनी
यमित्यर्थः। आवोष्टौसर्पऐरावतोजरत्कर्णोग्राणोस्तौत्। आवऋंजसइत्यष्टर्चंसूक्तं ८ सर्पजातिः इरावतपुत्रोजरत्कर्णोनामऋषिः ग्रावाणःपाषाण
स्तुतिः तत्ग्रावाणोदेवता। आवऋंजसइतिसूक्तंग्रावस्तोत्रशंसनेसूत्रकारः। तुशब्दात्जागतंछंदः। ॥अप्रप्रुषः स्यूमरश्मिर्भार्गवोमारुतं
तेपंचमीजगती॥ ॥अप्रप्रुषइत्यष्टर्चंसूक्तं ८ पूर्ववत्सूक्तसंख्येति। भृगुपुत्रः स्यूमरश्मिर्नामऋषिः मरुतोदेवता। अप्रप्रुषइतिसूक्त
स्याध्यायधर्मः॥ ॥वश्रासोद्वितीयापंचम्याद्याश्रसिस्तोजगत्यः। विप्रासोनमन्मभिरित्यष्टर्चंसूक्तं ८ पूर्ववत्सूक्तसंख्येति। पूर्ववत्
स्यूमरश्मिऋषिः। तुशब्दात्मरुतोदेवता। अग्निर्नयज्ञविद्वितीयर्क्जगती। अश्वासोनयइतिपंचम्यादितिसृणां। तुकारात्जगत्यः। शे
षाः प्रथमतृतीयाचतुर्थ्यष्टम्यश्चोनादेशात्त्रिष्टुभः। विप्रासोनमन्मभिरितिसूक्तस्याध्यायधर्मः। अपश्यंसप्तसौचीकोग्निर्वैश्वानरोवास्

१२६ भिर्वा वाजंभर आग्नेयं तु॥ अपश्यमस्य महतो इति सप्तर्चं सूक्तं ७ सौचीकगुणोऽग्निर्ऋषिः अथवा वैश्वानरगुणोऽग्निर्ऋषिः अथवा वाजंभर पुत्रः
सप्तिर्नाम ऋषिर्विकल्पेन॥ अग्निर्देवता। तुशब्दात् उत्तरसूक्तमाग्नेयं। अनादेशात् त्रिष्टुप्छंदः॥ अपश्यमस्य महत इति सूक्तेनानेनानुत्तरसूक्तमग्निः
सप्तिरिति सहैव प्रशानरनुवाकानुक्रमणेऽस्त्रकारः॥ ॥अग्निः सप्तिः॥ ॥अग्निः सप्तिमिति सूक्तं सप्तर्चं ७ पूर्ववत् सूक्तसंख्येति। पूर्ववत् सौचीको गु
णोऽग्निर्ऋषिः अथवा वैश्वानरगुणोऽग्निर्ऋषिः अथवा वाजंभर पुत्रः सप्तिर्नाम ऋषिर्विकल्पेन। तुशब्दात् अग्निर्देवता। अनादेशात् त्रिष्टुप्छंदः
य इमा विश्वा विश्वकर्मा भौवनो विश्वकर्माणं तु द्वितीया विराड्रूपा॥ य इमा विश्वेति सप्तर्चं सूक्तं ७ पूर्ववत् सूक्तसंख्येति। भौवनः भुवनपुत्रो वि
श्वकर्मा ऋषिः। विश्वकर्मा देवता। तुशब्दात् उत्तरसूक्तं विश्वकर्मदैवत्यं। अनादेशात् त्रिष्टुप्छंदः। किंस्विदासीदिति द्वितीया ऋग्विराड्रूपा त्रिष्टुप्
छंदः। एकादशिनस्त्रयोऽष्टकस्येति॥ य इमा विश्वेति सूक्तं तथा चक्षुषः पितेति सूक्तमेतयोर्द्वयोः सूक्तयोर्विश्वकर्माणः पशुपुरोऽनुवाक्यायाज्ये
ति सूत्रकारः। ।चक्षुषः। ।चक्षुषः पितेति सप्तर्चं सूक्तं ७ पूर्ववत् सूक्तसंख्येति। पूर्ववत् विश्वकर्मा ऋषिः तुशब्दात् विश्वकर्मणो देवता। अना
देशात् त्रिष्टुप्छंदः। ।यस्ते मन्यो मन्युस्तापसो मान्यवं त्वाद्या जगती॥ यस्ते मन्युरिति सप्तर्चं सूक्तं ७ पूर्ववत् सूक्तसंख्येति। तपसपुत्रो मन्युर्नाम
ऋषिः। मन्युर्देवता। तुशब्दात् उत्तरसूक्तं मन्युदेवत्यं। अनादेशात् त्रिष्टुप्छंदः यस्ते मन्यो इत्याद्यृक् जगती। ।त्वया मन्यो तु जगत्यंतं॥ त्वया म
न्यो इति सप्तर्चं सूक्तं ७ पूर्ववत् मन्युर्नाम ऋषिः। तुशब्दात् मन्युर्देवता। ततः एको बहूनामित्याद्यं त्यक्त्वा ततश्चैर्जगत्यः। शेषास्त्वया मन्यो इत्या
द्यास्तिस्रस्त्वनादेशात् त्रिष्टुभः। त्वया मन्यो सूक्तं यस्ते मन्यो इति सूक्तं द्वे सूक्ते मान्यवे इति शांत्यैः सूत्रकारः। अथ भद्रिति सूक्तं भत्स्यथ यः परिभाषायां ने १२६

ततः प्रभृति त्वा यः पर्जन्येद्व सूक्तोऽस्ति। सत्येनोत्तभिता भूमिरित्यतः प्रभृत्या समाप्तेः संसमिद्युवस इत्यंततः भातिसूक्तं भत्स्यपिवेदितव्यं। सत्येन सप्तच
त्वारिंशत् सावित्री सूर्यात्मदैवतमानुष्टुभं पंचभिः सोमम स्तोत्पराभिस्तु विवाहं सप्तदश्या देवान् परया सोमार्कौ परयात्वं चंद्रमसं परान्नप्ता विवाहमंत्रा
आशीःप्राया पादेहीति देवध्र्वास संस्पर्शानिंदार्थे परा यक्ष्मनाशिनी दंपत्योर्नवो नवस्तिस्रो न्वसारागध्णामीति द्वेद्वे यदश्विना पूषा घोर चक्षुरिति त्रि
ष्टुभस्त्व स्मुरो बृहती पूर्वा परा मिह प्रियमान अनुष्टुब्जगत्यः सत्येनोत्तभितेति सप्तचत्वारिंशदृचं सूक्तं ४७ सूर्या सावित्री नाम्नी ऋषिका। सोमयोः स वि
त्वस्कतवती सैव सावित्री सूर्येत्यात्मा देवता। स्वदर्शनेत्यर्थः। आत्मशब्दात् सूर्या सावित्री ऋषिर्देवतेति। सूक्तमित्यर्थः अनुष्टुप्छंदः। ततः सत्येनोत्त
भितेत्यादिभिः पंचभिरृग्भिः सोमं स्तुतवती। ताः सोमदेवत्याः ततः पराभिः रैभ्यादिभिः षष्ठ्यादिभिरेकादशभिर्ऋग्भिर्देतेऽर्के वधिस्वविवाहम
स्तौत्। स्वविवाहं सूर्याविवाहमित्यर्थः। आसां सूर्या देवतेति। ततः सूर्यायै देवा इत्येतां सप्तदश्यर्चं देवानस्तौत्। तस्य देवा देवतेति। ततः परया पूर्वा
परं चरत इत्यष्टादश्यर्चं सोमार्कावस्तौत्। तस्य सोमसूर्यौ देवतेति। ततः परयैकोनविंशत्यृचा नवो नवो भवति जायमान इत्यनया चंद्रमसमस्तौत्। तस्याश्चंद्रमा देव
तेति। ततः पराः सुकिंशुकं शल्मलिमिति विंशाद्यानचेष्टणो मनुष्यावा यथेण विवाहमंत्रा आशिषश्च भवंति। आसां मंत्रलिंगदेवतेति। ततः परा देहि शामु
ल्यमित्यृक्। अश्रीरा तनूर्भवतीत्यृक् एते द्वे न्वोवध्वा विवाहकालवाससोऽयः स्पर्शस्तस्य गो नियोसावित्रो विवाहकालपरिहितं वासोन पुनर्धर्तव्यमि
त्यात्तुरित्यर्थो निंदितश्च। तयोर्वा यादेवतेति। ततः परा ये वध्वश्चंद्रं वहतु मित्यृक् दंपत्योर्यक्ष्माणः क्षयरोगस्य नाशिनी। यक्ष्मक्षयरोग उक्तेह इत्यष
इत्यर्थः तस्या राजयक्ष्म देवतेति। ततः परा मा विदन्परिपंथिन इत्याद्याशिरोषाक्त्वो दंपत्योराशिषः। त्र्यांसवत्यदेवत्याः यस्य सक्थ्यौ सैव देवता ज्ञेया
।ततः नवो नवस्तिस्रश्च त्रिष्टुभः। ततः अनृक्षरा ऋजव इति द्वे चौ त्रिष्टुभौ। ततः यदश्विनेत्यृक् प्रूषा त्वेत इत्यृक्। एताः तिस्रश्च त्रिष्टुभः। ततः व

श्मेव दित्युक्तं ॥ उरोबृहती । प्रथमतृतीयचतुर्थपादा अष्टाक्षराः द्वितीयः पादो द्वादशाक्षरस्सेति । ततः पूर्वापरमित्युक्तं । इह प्रियमित्युक्तं । आनः प्रजामि
त्युक्तं । एतास्तिस्रो जगत्यः । ततः सूक्तस्य शिष्टास्त्रयस्त्रिंशदृचोऽनुष्टुभः । सत्येनोत्तभितेति सूक्तं स्वाध्यायधर्मः ॥ ॥ इति श्रीमदृग्वेदानुक्रमणि
दीपिकायां डोरखोपनामकछगनदत्तगणेशकृतौ अष्टमाष्टकस्य तृतीयोऽध्यायः ॥ ॥ विहि त्र्यधिकेंद्रो वृषाकपिरिंद्राणींद्रश्च सम्वादं पांक्तं
विहि सोतोरिति त्र्योविंशात्मकं सूक्तं २३ ॥ अनिरुक्ता संख्येति । इंद्रपुत्रो वृषाकपिर्नाम ऋषिः शचीसपत्न्यां जातः इंद्राणी इंद्रस्य पत्नी प्रयोगात् ।
अन्यतरस्यामिति । इंद्रश्च स्वयमिति त्रयः समुदिरे संहत्य उदिरे विवादं कृतवंतः कारिका । उपदेशोऽनुक्ते श्च चक्रभेदेन दर्शितः । अपाद्याद्यादि
ज्ञानार्थमर्थतस्तथ वर्ण्यत इति । ततः विहि सोतोरित्याद्यर्चः । इंद्रस्य वाक्यं । अस्येंद्र ऋषिः ततः परा हीत्यृक् । किमयं त्वामित्यृक् । प्रियातष्टानीत्य
क् । न मत्स्त्रीत्यृक् । एवाः पंचर्चा इंद्राण्याः ॥ आसां चाभिंद्राणी ऋषिका । ततः उवे अंबेत्यृक् । वृषाकपेः । अस्य वृषाकपिर्ऋषिः ततः किं सुबा
हो इत्यृक् । इंद्र ऋषिः ततः अवीरामिवेत्यृक् । द्वे इंद्राण्याः ॥ आसां चाभिंद्राणी ऋषिका । ततः इंद्राणीमासु इत्यृक् नाहमिंद्राणीत्यृक् संहोत्र
इत्यादींद्र ऋषिः ततः वृषाकपायीत्यृक् अस्य वृषाकपिर्ऋषिः । ततः उक्ष्णो हीत्यृक् अस्येंद्र ऋषिः ततः वृषभो नेत्यृक् । न सेशे यस्य रंबते इ
त्यृक् । न सेशे यस्य रोमशमित्यृक् । अयमिंद्र वृषाकपिरित्यृक् । अयमिंद्र वृषाकपिरित्यृक् एताश्चतस्रः इंद्राण्याः आसां चाभिंद्राणी
ऋषिका । ततः अयमेमीत्यृक् धन्व च यदित्यृक् पुनरेहीत्यृक् यदुदंच इत्यृक् एवाश्चतस्र इंद्रस्य । आसां चाभिंद्र ऋषिः ततः पर्शुर्हनामेत्य
ऋ वृषाकपेः अस्य वृषाकपिर्ऋषिः । ते तु वृषाकपिं शंसवीत्यादि तु एकदेशा ऋत्विणाहास्य सूक्तव्यवहार इति । आसां सर्वासां चाभिंद्रो देव
तेत्यर्थः । सर्वस्माद्य इंद्र उत्तरस्स्वमेतद्ब्रूम इति नैरुक्ते यास्कवचनात् । अथ वृषाकपिं शंसतीति । अथ वृषाकपिं शंसेदिति ब्राह्मणसूत्रयोः

वृषाकपिं च पंक्तिशंसनेति सूत्रकारः । सूक्तस्य पांक्तं छंदः । विहि सोतोरिति सूक्तं ब्राह्मणाच्छंसी सूक्ते शस्त्रे सम्यक् स्तुव इति । रक्षोहणं पंचाधिका पायुराग्नेयं च
पुरनुष्टुबंतं ॥ ॥ रक्षोहणमिति पंचविंशत्यृचं सूक्तं २५ अनिरुक्ता संख्येति । भरद्वाजपुत्रः पायुर्नाम ऋषिः पायुर्भारद्वाज इति पूर्वमुक्तं रक्षोहत्यमेगुणः स
एवाग्निर्देवता । राक्षसान् हंतीत्यग्निरेव रक्षोहत इत्यर्थः । ततः परत्वाग्ने पुरं वयमित्याद्यंत्याश्चतस्र ऋचोऽनुष्टुभः । ततः रक्षोहणमित्याद्या एकविंशत्यृचो ऽनना
देशात्त्रिष्टुभः । रक्षोहणमिति सूक्तं स्वाध्यायधर्मः ॥ हविरेकोनां गिरसो मूर्धन्वान् वामदेव्यो वासौर्यवैश्वानरीयं । हविष्पांतमित्येकोनविंशत्यृचं सू
क्तं १९ ॥ अनिरुक्ता संख्येति । आंगिरसपुत्रो मूर्धन्वान् ऋषिः अथवा वामपुत्रो मूर्धन्वान् ऋषिर्विकल्पेन । द्यामुषायण इत्यर्थः । सूर्यवैश्वानरोऽग्निर्देव
ता । सूर्यवैश्वानर इत्यग्नेर्गुणः । अनादेशात्त्रिष्टुप् छंदः । हविष्पांतीयं सूक्ते सोऽयं वैश्वानरं भवतीति नैरुक्ते । हविष्पांतमजरं स्वर्विदीत्याग्निमारुत
स्य प्रतिपदिति शस्त्रे ब्राह्मणसूत्रयोः ॥ ॥ इंद्रस्त्वष्टाच धानारेणुः पंक्तंन्त्यैंद्रासोमी ॥ ॥ इंद्रस्त्वेत्यष्टादशर्चं सूक्तं १८ अनिरुक्ता संख्येति । विश्वामित्र
पुत्रो रेणुर्नाम ऋषिः ऋषभो रेणुरष्टकोऽ इति श्रुतिः । अनादेशादिंद्रो देवता । अनादेशात्त्रिष्टुप् छंदः । आपांतमन्युरिति पंक्त्यः कदृंद्रासोमदेवत्या
इंद्रस्त्वेति सूक्तं माध्यंदिन शस्त्रे सूत्रकारः ॥ ॥ सहस्रशीर्षा षोळश नारायणः पौरुषमानुष्टुभं अंत्या त्रिष्टुभं तु ॥ सहस्रशीर्षेति षोळशर्चं सूक्तं
तर १६ ॥ परात्परे रूपोनुक्तगोत्रमुपदेशोऽपुश्री नारायण ऋषिः । यथोपदेशमित्युक्तं परमात्मस्वरूपश्रीनारायण पुरुषो देवता । अनुष्टुप् छंदः । य
ज्ञेन यज्ञमित्यंत्यर्चा त्रिष्टुप् । उशब्दाद उत्तरसूक्तं त्रिष्टुबंतं उक्तं हि । इतिहासादिसिद्धोऽयं पुरुषः पंचविंशकः इतिहासादिसिद्धोयं पंचविंशः पुमान् स तु । इह
योगिभिस्तथा स्कंत्येनज्ञातिपुरुषोऽत्र वर्णितः । सहस्रशीर्षासूक्तस्य विधाने सर्वकामार्थविनियोग इति । संजाग्ना आङ्गिः पंचोनाऽरुणो वैतहव्य आग्नेयं ॥ संजा
२३ गदाङ्गिरिति पंचदशर्चं सूक्तं १५ अनिरुक्ता संख्येति । वीतहव्यपुत्रोऽरुणो नाम ऋषिः अग्निर्देवता । त्रिष्टुबंतस्येति जागतं छंदः । तुशब्दात् अहाव्य भद्र इत्य

१२८ वन्नहृत्संजातस्तद्वृद्धिरितिसूक्तं प्राग्वदनुवाकानुमंत्रणेसूत्रकारः। पूर्ववत्सूक्तसंख्येति। मनुपुत्रः शार्यातोनामऋषिः। शार्यातंमानवमभिषेचनमाहु
शार्यातोमानवइति। श्रुतिः। विश्वेदेवादेवता। तृशाद्यात्तत्तरसूक्तंवैश्वदेवं। जगतीछंदः। यज्ञस्यवोरथ्यं विश्पतिं विशामिति वैश्वदेवंशस्त्रे ब्राह्मणम्
त्रयोः माहतान्नः पार्थ्यः प्रस्तारपंक्तं पुरस्ताद्बृहत्यंतंत्रयोदशपादेत्वनुष्टुप्सोनत्वन्यक्षरैः पंक्तिरेकादशीन्यंकुसारिणी। महिद्यावापृथिवीइतिपंचदश
र्चंसूक्तं १५ पूर्ववत्सूक्तसंख्येति। पार्थः पृथुपुत्रः पार्थस्तान्वोनाम। तान्वोनामऋषिः। तृशाद्यान्तविश्वेदेवादेवता। प्रस्तारपंक्तिछंदः। आद्योनत आद्योद्वौ
पादौद्वादशाक्षरौ। अंत्यावष्टाक्षरौविति। ततः अधीन्वन्वेत्यस्यकः पुरस्ताद्बृहती। आद्यपादोद्वादशाक्षरः। त्रयोष्टाक्षरास्त्वेति। ततःचावर्त्तयेथामिति
त्रयोदश्यकः। यज्ञेयज्ञेसमर्त्यइत्यकः पद्यकः। एतेद्वेत्वानुष्टुभौ। ततः ऊधीनोअद्ययेदेवसवितरितिनवम्यकः। अक्षरासंख्यायांपंक्तिः। नपाद
नियमः। ततः एनंशांसमित्येकादशम्यकन्यंकुसारिणी बृहतीभेदः। द्वितीयश्चैवु।। द्वितीयपादोद्वादशाक्षरः। प्रथमतृतीयपादौष्टाक्षरः। महिद्यावा
पृथिवीइतिसूक्तंस्वाध्यायधर्मः। । प्रैतेवदन्नासर्पोर्बुदः काद्रवेयोग्राव्णोस्तौत्। पंचम्यंत्येत्रिष्टुभौसप्तमीच। । प्रैतेवदंत्वितिचतुर्दशर्चंसूक्तं १४
आनिरुक्तासंख्येति। सर्पजातिर्कद्रुपुत्रोर्बुदोनामऋषिः। अर्बुदः काद्रवेयः सर्पर्षिर्मंत्रकृदितिब्राह्मणश्रुतिः। ग्रावस्तौति। तद्ग्राव्णोदेवता।
त्रिष्टुबंतस्य्येकजागतंछंदः। ततः सुपर्णाश्चभिति पंचम्यकः। कृते अध्वरइत्यस्यर्क्। एतेद्वेऋचौत्रिष्टुभौ। ततः दशावनिभ्यइतिसप्तम्यकश्च्यका
रात्। त्रिष्टुप्। प्रैतेवदंत्वित्यर्बुदमितियावस्कृतशंसनेसूत्रकारः।। ।। इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांअष्टाष्टकस्यचतुर्थोध्यायः १२८

५७

हयेजायेत्वंर्वशीमैलः पुरूरवाः पूर्वोषितांकामात्पुनरासाद्यावरोध्कमैछत्तामनिछंती प्रत्याचष्टे हयेइत्युर्याक्कदास्रदेवोंतरिक्षप्रांसचेतिनिस्त्रश्चै
कचावचेशिष्टाउर्वश्याः। हयेजायइत्यष्टादशर्चंसूक्तं१८ आनिरुक्तासंख्येति। उर्वशीनामाप्सरसः ऐलमनोः पुत्रस्यैलस्यरुद्राणीशापात्। प्राप्तिव
पामभवत्तदुमासंस्त्रीत्वस्यस्त्रीत्वकालेबुधेजातःपुरूरवानामममहाराजः पूर्वोषितांस्वनगरेप्रतिष्ठानाख्येचत्वारिवर्षाणिकृत्वा सांसप्तमैपगर्भो
ह्यात्मानंत्यक्त्वागच्छत्। इतश्चेतश्चकामादत्तंताभिलाषात्। अन्वेषणंकुर्वन्। कदाचिन्मानसतीरेदृष्ट्वामाभासाचपुनर्पिस्वप्रसादवरोद्गुंचासइत्यु
मैकत्वांतरेणंकृतवान्। साचोर्वशीतेनप्रार्थ्यमानाअनिछंती निस्पृहा प्रत्याचष्टे। प्रत्याख्यानंकृतवतीनत्वंयोकंभयाकरिष्यतइति। अथैकत्वा
यंनत्वंचोपिस्वागार्थमाह। ततः हयेजायइत्यकइषुर्नश्रियइत्यक। यासुजूर्णिरित्यक। कदासूनुरित्यक। सुदेवोअद्येत्यक। अंतरिक्षप्राम
त्यकः। सचायदासुजहती धिद्यात्यादितिकर्चः। इडकपुत्रः पुरूरवसोवाक्यं। आसांनवानांइडकपुत्रः पुरूरवानामऋषिः। आसांनवानामुर्वशी
नाम्नीअप्सरादेवतेति। शिष्टानवर्चोर्वशीवाक्यमितिश्रूयते। किमेताचेत्यक। सावस्रदधतीत्यक। त्रिःस्मनाह्नइत्यक। समस्मिन्जायमानइत्य
कः। जज्ञिषइत्थेत्यक। प्रतित्रवाणीत्यकः। पुरूरवोमामृथाइत्यक। यद्विरूपेत्यक। इतित्वादेवइत्यक। इत्येतासांनवानामुर्वशीनाम्नीऋषिका
आसांनवानांइडकपुत्रः पुरूरवामहाराजोदेवतेति। परस्परमुर्वशीपुरूरवासंवादइत्यर्थः। यस्यवाक्यं सऋषिर्योतेनोच्यतेसादेवतेतिपरिभाषये
त्यर्थः। ऐलः पुरूरवाउर्वशीचेतिहासोनवस्पृष्टार्थः। पुराणेप्रवर्ण्यतइति। अनादेशात्त्रिष्टुप्छंदः। हयेजायइतिसूक्तंस्वाध्यायधर्मः। प्र
तेसह्योनार्बुदः वृतुः सर्वहरिवेंद्रोहरिस्तुतिर्द्विंत्रिष्टुबंतं। प्रतेमहइति। प्रतेमहइतित्रयोदशर्चंसूक्तं१३ आनिरुक्तसंख्येति। आंगिरसपुत्रोव

वरुर्नाम ऋषिः। अथवा इंद्रपुत्रः सर्वहरिर्नाम विकल्पेन। हरिस्तुतिरित्युक्ते। हरिरिंद्राश्वो नाम देवता। त्रिष्टुबंतस्यतिजागतं छंदः। ततः आत्वाहार्षमित्यस्य
देकचैत्रिष्टुभौ। ध्रुवोराहेतन्महासूक्ते चेति ब्राह्मणं। तथा प्रतेमहे विदथेशंसिषं हरी इति द्वापदाभ्यां जगती। भेत्यादिषोळशीशस्त्रे ब्राह्मणस्य चर्योः
या ओषधीरित्यधिका अथर्वणो भिषगोषधिस्तुतिरानुष्टुभं। या ओषधीरिति त्रयोविंशत्यृचं सूक्तं २३ अनिरुक्ता संख्येति। अथर्वणपुत्रो भिषङ्नाम
ऋषिः। ओषधयस्तूयंते। ता ओषधयो देवता। अनुष्टुप्छंदः। या ओषधीरिति सूक्तं स्वाध्यायधर्मः। बृहस्पते द्वादशार्ष्टिषेणो देवापिर्वृष्टिकामो दे
वान् स्तुतवान्। बृहस्पते प्रतिमइति द्वादशर्चं सूक्तं १२ ऋष्टिषेणपुत्रो देवापिर्नाम ऋषिः। देवान् बृहस्पतिमित्रादीनां वृष्टिकामः सन्। सस्यवृद्
ध्ये स्तुतवान्। एतत एव बृहस्पतिमित्रादयो देवता। अनादेशात्त्रिष्टुप्छंदः। बृहस्पते प्रतिमइति सूक्तं स्वाध्याये विनियुक्तं। तन्नो वम्रो वैख
नसः॥ कन्नभित्रमिति द्वादशर्चं सूक्तं १२ पूर्ववत्सूक्तसंख्येति वैखानसपुत्रो वम्रो नाम ऋषिः। अनादेशाद् इंद्रो देवता। अनादेशात् त्रिष्टुप्छंदः॥
कन्नभित्रमिति सूक्तं स्वाध्यायधर्मः। इंद्रइवस्तुर्विंदनो वैश्वदेवं तु त्रिष्टुबंतं। अनादेशात् त्रिष्टुप्छंदः। कन्नभित्रमिति सूक्तं स्वाध्यायधर्मः। इंद्रदृ
ह्येति द्वादशर्चं सूक्तं १२ पूर्ववत्सूक्तसंख्येति जागतं छंदः। चित्रस्तेभानुरित्यर्कं त्रिष्टुप्। वंदनो नाम पुत्रो वस्युर्नाम ऋषिः। वैश्वदेवो देवता।
तुशब्दात्तु चरमसूक्तं वैश्वदेवं। त्रिष्टुबंतस्येति जागतं छंदः। चित्रस्तेभानुरित्यर्कं त्रिष्टुप्। इंद्रदृह्येति सूक्तं स्वाध्यायधर्मः। उद्बुध्यध्वं बुधः
सौम्यऋतिकः। सूक्तं तिर्वांनवम्यं तेल्येजगत्यो पंचमी बृहतीगायत्र्योर्मध्ये। उद्बुध्यध्वमिति द्वादशर्चं सूक्तं १२ पूर्ववत्सूक्तसंख्येति। सो

मपुत्रो बुध ऋषिः। तुशब्दात् विश्वेदेवा देवता। सात्विकस्तुतिः सामिजो देवता विकल्पेन। ततः आवो धियमिति नवम्यृक्। कृष्टन्तरइंद्रं तृक् वेनऋ
चौ द्वे जगत्यौ। ततः सीरायुंजंति द्वितीयचतुर्थ्यौ ऋक्। इष्कृताहावमवतामित्येषष्ठी सक्। एतयोरुभयोर्गायत्र्यो। आभ्यां मध्ये विराड् वा नाम्ना त्रिपंचम्यृक्
बृहतीति षष्ठीत्यर्थः। अत्र कौशल्यमिदं सहायार्थात्। चतुर्थी षष्ठ्यो गायत्र्योर्मध्ये पंचमी बृहती वाच्यमिति। शिष्टा ऋचा अनादेशात् त्रिष्टुप्सम्
उद्बुध्यध्वमिति सूक्तं स्वाध्यायधर्मः। प्रतेमुद्गलो भार्म्यश्वो द्रुघणेन ऋषभेण वाजिं जिगाय द्रोघणं वा व्याप्त्वीयांस्या बृहत्सः। प्रतेरथमिति
द्वादशर्चं सूक्तं १२ पूर्ववत्सूक्तसंख्येति। भृम्यश्वनामपुत्रो मुद्गलनाम ऋषिः। भार्म्यश्वो भृम्यश्वस्य पुत्रो भृम्यश्वो भर्म्यश्व इति। तथा मुद्
गलो मुद्गलवानित्यक्षपयोः प्रशंसा निरुक्ते। अत्रेतिहासः। द्रुघणेन मुद्गलेन ऋषभेण वालिवर्द्धेन आजिं युद्धं रथवाहाभ्यां संग्रामं जिगाय दे
जितवान्। अतो हेतो द्रुघणो देवता। अनादेशात् इंद्रो देवता विकल्पेन। द्रुघणो द्रुममयो घनस्तत्रेतिहासमिति नैरुक्ते। ततः प्रतेरथमित्या
घृक्। अंतर्यं छे द्वितीयर्क्। ताभिरवस्यत्यंत्यर्क् एतास्तिस्रश्चो बृहत्यः। शिष्टान्वर्चो नादेशात् त्रिष्टुभः। प्रतेरथमिति सूक्तं स्वाध्यायधर्मः
आयुः स षेणो द्रोपातिरध्वचतुर्थ्यो ऋ बाईस्पत्या पात्या वा देव्यं त्वानुष्टुप् माहती। आयुः शिशान इति त्रयोदशर्चं सूक्तं १३ अनिरुक्ता संख्येति।
इंद्रपुत्रोऽप्रतिरथो नाम ऋषिः। अनादेशाद् इंद्रो देवता। अनादेशात् त्रिष्टुप्छंदः। ततः बृहस्पते परिदीयेति चतुर्थ्यर्क्। बृहस्पतिर्देव
ता। ततः अमीषांचित्तमित्येकपंक्त्यर्क्। अपाचा देवी आचाख्याता देवीनस्त्वयतेसा देवतेति। आघायदेनपा विद्रोपदीयतइति नैरु

१३० ततः प्रमनिचाष्टाष्टिर्नेद्विसूक्तोस्मि। ।भद्रेनेत्तभिनाम्रभिके। ततः पेताजयतानरइत्यंत्यर्क्। अनुष्टुप्विकल्पेनाग्निरुद्देवत्या। आरुःशिशानइतिसूक्तं
ब्रह्मजपः सर्वत्रेति। ब्रह्मापानरथंजपित्वेतिचसूत्रकारः। ।असाविकादशाष्टकेविश्वामित्रः॥ ॥असावसोमइत्येकादशर्चं सूक्तं ११ विश्वा
मित्रपुत्रोष्टकोनामसऋषिः ऋषभोरेणुरष्टकइतिविश्वामित्रगोत्रत्वात्। अनादेशादिंद्रोदेवता। अनादेशात्त्रिष्टुप्छंदः। असावसोमइत्या
सूक्तं स्वाध्यायधर्मः। कदाकोकोऊर्मित्रोनाम्नास्कभित्रोगुणतःस्कभित्रोवानाम्नाऊर्मित्रोगुणतऔष्णिहंहरीवज्रंपिपीलिकमध्यात्रिष्टुब्
त्वाद्यागायत्रीवा। कदावसोइत्येकादशर्चं सूक्तं ११ पूर्ववत्सूक्तसंख्येति। कुत्सपुत्रोऊर्मित्रोनामऋषिः। गुणवद्गुणयोगेनस्कभित्रो
नामविकल्पेन। अयमेवस्कभित्रइत्युच्यते। रुपामित्रयोगात्। एतद्वाविपरीतं। नाम्नास्कभित्रोगुणतःऊर्मित्रइतिवृद्धोनगुणयुक्तानि
मित्राणिबहुगुणत्वात्। इतिविकल्पस्यचलिंगगुणसंबंधेनविपरीतंचेति। अत्रस्मर्यते। शतंवायदसुर्यंप्रतितास्कभित्रइत्यास्योद्दु
भित्रइत्यास्योदितमंत्रलिंगदर्शनात्। अनादेशादिंद्रोदेवता। उष्णिक्छंदः। ततः हरीयस्येत्यृक्। तथावज्रंयश्चक्रइत्यृक्। एतद्द्वे
चौपिपीलिकमध्ये। उष्णिगिदइति। मध्यमौद्वौपादौषडक्षरौ। आद्यंतावुभावेकादशाक्षरौ। तावित्यर्थः। ततः शतंवायदसुर्ये
त्यर्क्त्रिष्टुप्। कदावसावित्याद्यर्क्। विकल्पेनगायत्रीज्ञेया। कदावसावितिसूक्तंस्वाध्यायधर्मः॥ ॥इतिश्रीमदृग्वेदानुक्रमणि
दीपिकायामष्टाष्टकेपंचमोध्यायः॥ ॥उभोभ्रुवांशःकाश्यपःआश्विनं॥ उभाउन्नूनमित्येकादशर्चंसूक्तं ११ पूर्ववत्सूक्तसंख्या १३०

ति। कश्यपपुत्रोभ्रुवांशोनामऋषिः। अश्विनौदेवता। अनादेशात्त्रिष्टुप्छंदः। उभाउन्नूनमितिसूक्तमतिरिक्तोकिशाखेरसूत्रकारः। आवांदेवोदक्षिणा
प्राजापत्यादक्षिणांतद्वातन्वास्तोचतुर्थीजगती। ।आविरभूदित्येकादशर्चंसूक्तं ११ पूर्ववत्सूक्तसंख्येति। आंगिरसपुत्रोदिव्योनामऋषिः अ
पुत्रगोत्रगोत्रमांगिरसमितिवचनात्। अथवाप्राजापतिपुत्रीदक्षिणानाम्नीऋषिकाविकल्पेन। तत्रदक्षिणायजमानैर्ऋत्विग्भ्योदीयमानातद्
द्वत्यजमानानांस्तोत्यजकत्वात्। सूक्तंदक्षिणादानंदेवतेति। ततःशतधारंवायुमितिचतुर्थ्यृक्जगती। शिष्टादशर्चोअनादेशात्त्रिष्टुभः
आविरभूदितिसूक्तंस्वाध्यायधर्मः। ।किमिच्छंतीपणिभिरसुरैर्निगूढागाअन्वेष्टुंसरमांदेवशुनीमिंद्रेणप्रहितामयुग्भिःपणयोभिदीयंतः
ऊचुःसातान्युग्माभिर्ऋग्भिरानच्छंतीत्याचष्टे। किमिच्छंतीत्येकादशर्चंसूक्तं ११ पूर्ववत्सूक्तसंख्येति। अथर्षिदेवताविज्ञानायेतिहासंकथयति।
असुरैःपणिनामकैरासकुलीनैःबृहस्पतेरिंद्रपुरोहितस्यगावोहृताश्चौर्येणनानिरूढाःबलपुरंप्राप्यस्वगृहस्थानेस्थापिताआसन्। अथबृह
स्पतिप्रेरितेनेंद्रेणनष्टान्वेष्टुमन्वेषणंदत्वासरमानामदेवशुनीप्रहिताबभूव। सासरमारसाख्यांनदीमुत्तीर्यबलपुरंप्राप्यसर्वत्रचान्विष्यगुप्तस्थो
नेदेवशुनीगाददर्शी। तांदेवशुनीमज्ञातीयांदेवतामृगादिभिंद्रस्यसाधनभूतामस्यसूक्तस्यायुग्मिऋग्भिःपणयोभिप्रेत्यतंदेवपन्न्यांसह
मित्रभावंप्रस्तवंतः। वाक्वाहा। ततःकिमिच्छंतीप्रथमर्क्। कीदृङिंद्रइतितृतीयर्क्। इमागावइतिपंचम्यर्क्। अयंनिधिरितिसप्तम्यर्क्। एवावत्
मितिनवम्यर्क्। एताभिःपंचभिरयुग्मिभिःपणिनामसुराणांवाक्यं। एतासामृचांपणिनामसुराऋषयः। एतासांसरमामरशुनीदेवता। त
तःसत्रदेवशुनीवाचयुग्मास्याभिर्युग्माभिर्द्वितीयादिभिरेकादश्यंतेतिसरमादेवशुनीत्याचष्टे। ततःइंद्रस्यदूतीद्वितीयर्क्। नाहंतंवेदेति

स्वाध्यायधर्मः। अग्ने हंस्युरुक्षय आमहीयव आग्नेयं। रक्षोघ्नं गायत्रं तु। अग्ने हंसीति नवर्चं सूक्तं ९ पूर्ववदस्य सूक्तसंख्येति। आमहीयगोत्रोत्पन्न
उरुक्षयो नाम ऋषिः। रक्षोघ्नमित्यत्राग्निर्देवता। रक्षोहत्यग्नेर्गुणः। गायत्री छंदः। तु शब्दादुत्तरसूक्तं गायत्रं। श्रूयते। स यदा स्तनजायेत यदि दि
रंजायेत राक्षोघ्नो गायत्र्योन्वृच्या अग्ने हंसि न्यत्रिणमिति सूक्तमग्नौ मथ्यमाने ब्राह्मणस्त्वक्र्योः। इति वै सप्तमोनैंद्रो लब आत्मानं तुष्टाव ॥
इति वा इति त्रयोदशर्चं सूक्तं १३ आनरुक्तासंख्येति। इंद्रस्याय इत्यैंद्रस्तत्वीकृतत्वात् लब आत्मानं स्वयमेव स्तुतवान्। इंद्रो हि बलत्वमा
ध्यायसोम ऋजीपरसं पिबन्। सप्तभिर्द्दृष्टः सवसस्तोमस्याति प्रियत्वं स्ववैसवं च वर्णयन्। आत्मानमनेन सूक्तेन स्तुतवानिति इतिहासविद आहुः। सूक्त
स्येंद्र ऋषिः। आत्मेंद्रो देवता। तु शब्दात् गायत्री छंदः। ऋग्विधाने श्रूयते। पौरुषं पावमानं च नतमं हइत्तीति च। सकृज्जप्यास्यवामीयं ब्रह्महत्यां व्यपोह
ति। इंद्रो वैकुंठो लवसूक्तमिति नेरुक्ते॥ ॥ इति श्रीमदृग्वेदानुक्रमणिदीपिकायां अष्टमाष्टके षष्ठोध्यायः॥ ॥ तादिन्नवाथर्वणो बृहद्दिवः। तादि
दासेति नवर्चं सूक्तं ९ अथर्वणपुत्रो बृहद्दिवो नाम ऋषिः। अनादेशादिंद्रो देवता। अनादेशात्त्रिष्टुप्छंदः। तादिदास भुवनेषु ज्येष्ठमिति सूक्तं
बृहद्दिव सहस्रशाखे महाव्रतारण्यके। हिरण्यगर्भो दश हिरण्यगर्भः प्राजापत्यः कायं। हिरण्यगर्भ इति दशर्चं सूक्तं १० प्रजापतिपुत्रो हिरण्य
गर्भ ऋषिः। कनाम प्रजापतिर्देवता। को वै नाम प्रजापतिरिति श्रुतिः। अनादेशात्त्रिष्टुप्छंदः। हिरण्यगर्भः समवर्ततार्ग्रे इति षट् प्राजापत्या इति
सूत्रकारः। वसंनाष्टौ चित्रमहा वासिष्ठ आग्नेयं जागतमाद्यं पंचमी चर्चे। वसंनाचित्रमित्यष्टर्चं सूक्तं ८ वसिष्ठपुत्रश्चित्रमहा नाम ऋषिः। अग्नि

१३३ दैवतजगतीछंदः। ततः स्कंभमित्याद्यर्चः। त्वंहतः प्रथमइतिपंचम्यृक्एवेदेन्त्वाद्येनेराछेजगतीविना। अनादेशात्त्रिष्टुभौ। स्कंभचि
निमित्तजागतं शतरनुवाकानुमंत्रणेसूत्रकारः। अयंवेनोवेनोवैन्यः। अयंवेनइत्यष्टर्चंसूक्तं ८ पूर्ववत्सूक्तसंख्याता। भृगुपुत्रोवेनोनामऋषिः
इंद्रायद्वादशवेनोभार्गवइत्युक्तं। वैन्यमितिवेनोनामदेवता। अनादेशात्त्रिष्टुप्छंदः। अयंवेनश्चोदय। त्वभिगर्भोइतिवर्ग्यशंसनेब्राह्मण
सूत्रयोः। तथावैश्वदेवशस्त्रे। इमंनोनवैष्फचमानाहितोग्निवरुणसोमानामाद्याग्नेयीतिस्रश्चाग्नेरात्मस्तवः। शिष्टायथानिपातंसप्तमीजगती। इ
मन्नोअग्नइतिनवर्चंसूक्तं ९ नाहिवइत्यस्यादीनांसूक्तानिः। अग्निवरुणसोमानामृषयः। नाहिवइत्युक्तेसैवाग्निवरुणसोमादेवताः। ततः वीभत्सू
नांसयुजमित्युच्यमानवत्यृक् इंद्रदेवत्या। ततः इमंनइत्याद्यर्चः। आग्निदेवत्या। ततः अदेवाद्देवइत्यादितिसृभिर्ऋग्भिः। अग्नेरात्मस्तवः। एतासा
मृचामग्निर्ऋषिः। आसामृचामग्निर्देवतेत्यावशादात्। तत्रेमंनइत्याद्यर्चः। तथानिर्मायाउत्यइत्याद्याभिःपंचभिर्ऋग्भिरितिषट्संख्यायाः। अग्निव
रुणसोमाइतिपरस्परमृषिर्देवतेत्यर्थः। शिष्टायथानिपातमितिवचनात्। योयत्रसूक्तस्यतेननिपतातिसतत्रतत्सूक्तस्यइत्यर्थः। ततःकविःकाव्यइतिस
सप्तर्चकंजगती॥ शिष्टाअष्टर्चोऽनादेशात्त्रिष्टुभः। इमंनोअग्नउपेतिसूक्तंस्वाध्यायधर्मः। अहमष्टौवागांभृणीतुष्टावात्मानंद्वितीयाजगती। अ
हंरुद्रेभिरित्यष्टर्चंसूक्तं ८ अंभृणानाममहर्षेःपुत्रीवाङ्नामांभृणीतुष्टावात्मानंतुष्टावसूक्तवती। आत्मैवास्यमस्यसूक्तस्यार्षिर्दैवतंचेत्यर्थः। ततः
अहंसोममितिद्वितीयर्क्जगतीशेषाःसप्तर्चोनादेशात्त्रिष्टुभः। अहंरुद्रेभिरितिसूक्तंमार्कंडेयपुराणेदेवीसूक्तंपरंजप्यमुक्तंतथाऋग्विधाने। ॥ १३३

५६

ततःशैलूषिःकुल्मलबर्हिषोवामदेव्योवांहोमुग्वैश्वदेवंमौपरिष्टाद्बार्हतमित्या। त्रिष्टुप्। ततमंइत्यष्टर्चंसूक्तं ८ पूर्ववत्सूक्तसंख्येति। शैलूषपुत्रःकुल्मल
लबर्हिषोनामऋषिः। अथवावामदेवपुत्रोंहोमुग्नामऋषिर्विकल्पेन। विश्वेदेवादेवताउपरिष्टाद्बृहतीछंदोबृहतीभेदः। अंतमस्वेदित्युक्ते। अंत्यपादोद्वा
दशाक्षरः। प्रथमद्वितीयतृतीयपादोअष्टाक्षराः। ततमंइत्यस्यसूक्तस्यऋग्विधानेविनियुक्तं। रात्रीकुशिकःसौभरोरात्रिर्वाभारद्वाजीरात्रिस्तवंगायत्रं। रात्रीव्यख्य
दित्यष्टर्चंसूक्तं ८ पूर्ववत्सूक्तसंख्येति। सोभरिपुत्रःकुशिकोनामऋषिः। अथवाभरद्वाजस्यपुत्रीरात्रिनाम्नीऋषिकाविकल्पेन। रात्रिस्तवंसूक्तमितिरा
त्रीदेवता। गायत्रीछंदः। रात्रिसूक्तमृग्विधाने। ममाग्नेवर्चोविहव्योवैश्वदेवंजगत्यंतं। ममाग्नेवर्चइतिनवर्चंसूक्तं ९ आंगिरसपुत्रोविहव्योनामऋ
षिः। अनुक्तगोत्रमांगिरसमितिवचनात्। वैश्वदेवंदेवता। अनादेशात्त्रिष्टुप्छंदः। येनःसपत्नाइत्यंत्यर्क्जगती। ममाग्नेवर्चइतिसूक्तंभस्मचोस
मिधोभ्यादद्यादितिस्थे॥ नासत्सप्तप्रजापतिःपरमेष्ठीभाववृत्तंतु। नासदासीदितिसप्तर्चंसूक्तं ७ परमेष्ठीप्रजापतिर्ऋषिः। परमेष्ठीगुणविशि
ष्टवशापणंच। वाच्यत्वंविश्वामित्रत्वंचास्यप्रजापतेर्माभूत्। अन्यथाकश्चित्कथंचिन्न्यायेनप्रसज्येत। प्रजापतेर्गोत्राद्यनुपदेशोऽप्यनुक्तइत्यर्थः
भाववृत्तेभावानांपदार्थानांवृत्तिःसृष्ट्यादिकंतद्विषयदेवतातद्भाववृत्तीयमितिसएवदेवता। तुशब्दादुत्तरसूक्तंभाववृत्तीयं। अनादेशात्त्रिष्टुप्छंदः॥
नासदासीदित्युत्तरंचयज्ञइतिसूक्तेवेदांतोपनिषद्ब्रह्मपरेवेदितव्ये। योयज्ञोयज्ञःप्राजापत्योजगत्याद्या। योयज्ञइतिसप्तर्चंसूक्तं ७ पूर्ववत्सूक्त
संख्येति। प्रजापतिपुत्रोयज्ञोनामऋषिः। तुशब्दात्भाववृत्तोदेवता। अनादेशात्त्रिष्टुप्छंदः। योयज्ञइत्याद्यर्क्जगती। अपश्यंत्वासुकीर्तिःकाक्षीव
तोभ्यंतुष्टुप्सोमचरपाद्याश्विन्यो। अपश्यामितिसप्तर्चंसूक्तं ७ पूर्ववत्सूक्तसंख्येति। कक्षीवत्पुत्रःसुकीर्तिर्नामऋषिः। अनादेशादिंद्रोदेवता

अनादेशात्त्रिष्टुप्छंदः । ततः ध्रुवं स्फराममिति चतुर्थ्यमिध्यमर्कं अनुष्टुप् । साच तुर्थ्युत्तरा पंचमी पुत्रमिव पितराविति द्वे ऋचावश्विदेवत्ये । अपप्राच
इंद्रेति सक्कीर्त्तिः च पाक कीर्त्तिं शंसतीति मैत्रावरुणशास्त्रे ब्राह्मणस्त्वृचयोः । ईजानं शकपूतो नार्मेध्यो मैत्रावरुणमाद्या लिंगोक्तदेवता । न्यंकुसारिण्यंत्या
महासतोबृहत्यः पाद्यो पांत्य प्रस्तार पंक्ती शेषा विराड्रूपाः । ईजानमिति सप्तर्चं सूक्तं ७ पूर्ववत्सूक्तसंख्येति नृमेधपुत्रः शकपूतो नाम ऋषिः । मि
त्रावरुणौ देवता । ततः ईजानमित्याद्यर्क लिंगोक्तदेवता । द्यौर्भूम्याश्विदेवनेत्यर्थः । सान्यंकुसारिणी
बृहतीभेदः । द्वितीयश्चेति द्वितीयपादो द्वादशाक्षराः त्रयोऽष्टकाः । प्रथमतृतीयचतुर्थश्चेति
ततः प्रथमराजा वित्यंत्यर्कं महासतोबृहती जगतीभेदः । अष्टिनस्त्र्यस्त्रोन्वहा वृता । ततः ता
[illegible] मित्रावरुणेत्यर्कं । युवोर्हि मातेत्यर्कं एते द्वे ऋचावनुपाद्यो पांत्या द्वितीयाप ध्यो प्रस्तार पंक्तीयं
भेदः । आद्यो नेदत्युक्तो । आद्यो द्वौ पादौ द्वादशाक्षरौ । अंत्यावष्टाक्षरौ । ईजानमिति सूक्तं
स्वाध्यायधर्मः । प्रोषु सुदाः पैजवनः शाकर महापांक्तौ वाद्योत्त्यौ त्रिष्टुबंतं । प्रोष्वस्मा इति सप्तर्चं
सूक्तं ७ पूर्ववत्सूक्तसंख्येति । पिजवनाख्य राजपुत्रः सुदानाम ऋषिः । सुदासः पैजवनस्येत्युक्तं
अनादेशादिंद्रो देवता । ततः प्रोष्वस्मा इत्याद्यस्त्वृचः शाकर्यः । षट्पंचाशदक्षरा इत्यक्षरा इत्यक्ष
रा इत्यर्थः । ततः योन इंद्राभितोजन इति द्वितीयत्त्वो महापंक्तयः षडष्टकाः जगतीभेदः । ततः

अस्मभ्यं सुत्वमित्यंत्यर्कं त्रिष्टुप् । प्रोष्वस्मै पुरोरथमित्यृतिछंदः शंसतीति षोडशशास्त्रे ब्राह्मणस्त्वृचयोः । उभे यन्मांधाता यौवनाश्वो महापांक्तं पंक्तिरं
त्यानामिध्यधीगोधा पश्यत् । उभे यदिंद्रेति सप्तर्चं सूक्तं ७ पूर्ववत्सूक्तसंख्येति । युवनाश्वराजपुत्रो मांधाता नाम ऋषिः । अनादेशादिंद्रो देवता । म
हापंक्तिछंदः षडष्टकाः जगतीभेदः । ततः नकिर्देवा इत्यंत्यर्कं । नामिध्यर्द्धांत्र्ययो धर्ची गोधा नाम्नी ब्रह्मवादिन्य ऋषिका पश्यत् । उभे यदिंद्रेति सू
क्तमध्यवाक् शास्त्रे तथा स्वाध्यायधर्मः । यस्मिन्कुमारो यामायनो याममानुष्टुभं । यस्मिन्वृक्ष इति सप्तर्चं सूक्तं ७ पूर्ववत्सूक्तसंख्येति । यामाय
नः यमगोत्रोत्पन्नः कुमारो नाम ऋषिः । याममिति यमो देवता । अनुष्टुप् छंदः । हिशब्दात्त्रीणि सूक्तान्यानुष्टुभानि । यस्मिन्वृक्ष इति सूक्तं स्वाध्या
यधर्मः । केशी मुनयो वातरशनाज्जूतिर्वातजूतिर्विप्रजूतिर्वृषाणकः । करिक्रत एतशर्ष्यशृंगश्चैकर्चाः केशिनं । केश्य ७ मिति सप्तर्चं
सूक्तं ७ पूर्ववत्सूक्तसंख्येति । मुनयोऽसप्तर्षयो वातरशनापुत्राः एते चैकर्चाः क्रमेणैकैकस्यामृचाद्रष्टारः । तेचैत इत्याह । ततः केश्य ७ मित्या
द्यर्कं जूतिर्नाम ऋषिः । मुनयो वातरशना इति द्वितीयर्कं वातजूतिर्ऋषिः । उन्मदिता इति तृतीयर्कं । विप्रजूतिर्ऋषिः । अंतरिक्षेणेति चतुर्थ्यर्कं वृ
षाणको नाम ऋषिः । वातस्याश्व इति पंचम्यर्कं करिक्रतो नाम ऋषिः । अप्सरसामिति षष्ठ्यर्कं एतशो नाम ऋषिः । वायुरस्मा इति सप्तम्यर्कं ऋष्यशृंगो नाम
ऋषिरित्येवं सप्तर्षयः सप्तर्चो विदितव्याः । ततः केशीनमित्यृक्केशिनो । अग्निर्वायुः सूर्यो देवताः । अग्निर्वायुः सूर्यश्च केशिन इत्यर्थः । त्रयः केशिन इत्यादिः सू
र्यो वायुरन्ये त्युक्तेः स्तोति । त्रयः केशिन ऋतुथा विचक्षते । हिशब्दादनुष्टुप्छंदः । केश्य ७ मिति सूक्तं स्वाध्यायधर्मः । उत देवाः सप्त ऋषय एकर्चो
वैश्वदेवं । उत देवा इति सप्तर्चं सूक्तं ७ पूर्ववत्सूक्तसंख्येति । सप्तर्षय इति भरद्वाजः कश्यपो गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठ इत्येकर्चाः । एते

३३५ नेचगोत्रइत्याह। बार्हस्पत्योभारद्वाजः कश्यपोगौतमोऽत्रिर्विश्वामित्रोजमदग्निर्वसिष्ठइत्येतेकाः। एतेचगोत्रइत्याह। बार्हस्पत्योभारद्वाजः मरीचिःक
श्यपः राहूगणोगौतमः। सोमोऽत्रिः। गाथिनोविश्वामित्रः। भार्गवोजमदग्निः। मित्रावरुणोवसिष्ठइत्येतेसर्वेषेकर्णाः पृथक्पृथक्रूपयोवेदितव्याः। वि
श्वेदेवादेवता। हिरण्यवान्अनुष्टुप्छंदः। उतदेवाइतिसूक्तंस्वाध्यायधर्मः। तत्वत्येपवर्गऔरवोजागतं। तत्वत्यइंद्रेतिषळृचंसूक्तं६ औरवउरुनामऋ
पुत्रः अंगोनामऋषिः। अनादेशादिंद्रोदेवता। जगतीछंदः। तत्वत्यइंद्रेतिसूक्तंस्वाध्यायधर्मः। सूर्यरश्मिर्देवगंधर्वोविश्वावसुरात्मानमस्तौत्। पूर्वार्द्धं
सवितारं॥ सूर्यरश्मिरितिषळृचंसूक्तं६ पूर्ववत्सूक्तसंख्येति। देवानांगंधर्वोगायकत्वेनदेवानांसंमध्येजातिस्वगोत्रोत्पन्नोविश्वावसुऋषिः। अस्य
पूर्वार्द्धेनाद्यत्वेनेतिसवितारमस्तौत्स्तुतवान्। सपूर्वत्वस्यसवितऋषिः सवितादेवतेत्यर्थः। ततःउत्तरत्वेनात्मानंगंधर्वविश्वावसुऋषिःस्तौत्
तुष्टुतवान्। ~~सपूर्वत्वस्यसवितऋषिःसवितादेवतेत्यर्थः ततःउत्तरत्वेनात्मानंगंधर्वविश्वावसुऋषिःस्तौत्~~ सएवगंधर्वविश्वावसुऋषिः। सए
वगंधर्वोविश्वावसुर्देवतेत्यर्थः। अनादेशात्त्रिष्टुप्छंदः। सूर्यरश्मिर्हरिकेशइतिसूक्तंस्वाध्यायधर्मः। ।अग्नेतवाग्निःपावकआग्नेयंविष्टार
पंक्तीतिस्रःसतोबृहत्यउपरिष्टाज्ज्योतिः। अग्नेतवश्रवाइतिषळृचंसूक्तं६ पूर्ववत्सूक्तसंख्येति। पावकाविशेषणोऽग्निर्ऋषिः। अग्निर्देवता। त
तः अग्नेतवश्रवइत्यृक्पावकवर्चाइत्यृक्। एतेद्वेऋचौविष्टारपंक्ती। मध्यमोचेद्द्वादशाक्ष
रो। आद्यंतौपादावष्टाक्षरावितिपंक्तिभेदः। ततःऊर्जोनपादितितिस्रऋचःसतोबृहत्यःपंक्ति
भेदः। अयुजोजागतावितिसतावानंमहिषमित्यंत्यर्कउपरिष्टाज्ज्योतिस्त्रिष्टुभेदःद्वादशाक्ष ३३५

रास्त्रयःपादाः। एकोष्टाक्षरश्चेति। तेअग्नेतवश्रवोवयइतिषट्सूक्तानियानुरूपोवैश्वदेवशास्त्रेमहाव्रतारण्यके। अग्नेअच्छाभिरत्नापसोवैश्वदेव
शास्त्रेमहाव्रतारण्यके। अग्नेअच्छाभिरत्नापसोमातुष्टुभंहि। अग्नेअच्छावदेतिषळृचंसूक्तं६ पूर्ववत्सूक्तसंख्येति। तापसगुणोऽग्निर्ऋषिः विश्वेदेवादे
वता। अनुष्टुप्छंदः। हिरण्याद्यावत्त्रीणिसूक्तान्यानुष्टुभानि। अग्नेअच्छावदेतिसूक्तंस्वाध्यायधर्मः। ।अयमग्नेऽष्टौऋचाः शार्ङ्गोजरितादोणःसारिसृक्व
स्तंबमित्रश्चाग्नेयमाद्येजगत्यौचतस्रस्त्रिष्टुभः। अयमग्नेजरितेत्यष्टर्चंसूक्तं८ शार्ङ्गानामपक्षिजातितोविशेषाख्यातिवोरःचत्वारोद्वृचाःक्रमे
णक्रमेणद्वृचदर्शिनः। ततःअयमग्नेजरितेत्याद्यद्वृचस्यजरितानामऋषिः। ततःउतवाउपरीतिद्वितीयद्वृचस्यद्रोणनामऋषिः। ततःअत्यस्यक्रमेण
यइतितृतीयद्वृचस्यसारिसृक्वनामऋषिः। ततःअपामिदमितिचतुर्थद्वृचस्यस्तंबमित्रोनामऋषिः। एतेचत्वारऋषयः शार्ङ्गजातितःपक्षिवि
शेषाः। अग्निर्देवता। ततःअयमग्नइत्याद्यौद्वेऋचौजगत्यौ। ततःउतवाउपरीतिचतस्रऋचःक्रमेणत्रिष्टुभः। ततःअपामिदमित्यंत्येद्वेऋचौहिरण्या
न। अनुष्टुभौ। अयमग्नेजरितेतिसूक्तंस्वाध्यायधर्मः॥ ॥इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांअष्टमाष्टकस्यसप्तमोऽध्यायः॥ ॥त्वंचिदृ
सांख्योऽत्रिराश्विनं। त्वंचिदत्रिमितिषळृचंसूक्तं६ सांख्यस्यापत्यंतत्कोत्रोत्पन्नोऽत्रिर्ऋषिः। सोमत्वापत्वादः। आश्विनौदेवता। हिरण्याद्यावअनुष्टुप्छंदः
त्वंचिदत्रिमितिसूक्तंमातरनुवाकानुमंत्रणेस्तनकारः। अयंहितास्यपुत्रःसुपर्णोयनोवोर्ध्वकृशनोगायत्रीबृहतीगायत्र्यौसतोबृहतीविष्टारपंक्तिः
अयंहितइतिषळृचंसूक्तं६ पूर्ववत्सूक्तसंख्येति। तार्क्ष्यपुत्रःसुपर्णोनामऋषिः अथवायामायनपुत्रऊर्ध्वकृशनोनामऋषिर्विकल्पेन। अना
देशादिंद्रोदेवता। ततःअयंहितइत्याद्यर्कागायत्री। ततःअयमुस्माकंकाव्यइतिद्वितीयऋक्बृहती। ततःघृषुःश्येनायेतिद्वेऋचौगायत्र्यौ॥ ॥
ततःयंतेश्येनइतिपंचम्यृक्सतोबृहती। अयुजोजागतावितिपंक्तिभेदः। ततःएवातदिंद्रइतिषष्ठीऋक्विष्टारपंक्तिः पंक्तिभेदः मध्यमोवेव्यमोपादोद्वा।

स्तौ। आद्यंनावथासयतिति। अयंहिवइतिसूक्तंस्वाध्यायधर्मः। इमांखिंद्राण्युपनिषत्सपत्नीबाधनमानुष्टुभंतु पंक्त्यंतं। ।इमांखनामीतिषळृचंसू
क्तं ६ पूर्ववत्सूक्तसंख्येति। इंद्राणीऋषिका। उपनिषत्संज्ञकमिदंसूक्तं। सपत्नीबाधनं। सपत्नीबाधनेतेन सूक्तेनेहजपादिनातेनास्यसूक्तस्य
तदेवदेवता। अनुष्टुप्छंदः। तुशब्दात् उत्तरसूक्तमानुष्टुभं। ततः उपनेधांसहमानामित्यंत्यर्क्। पंक्तिः पंचपदाइत्यर्थः। इमांखना मितिसूक्तमग्नि
धानेविनियुक्तं। ।अरण्यान्येरंमदोदेवमुनीररण्यानीतुष्टाव। अरण्यानीतिषळृचंसूक्तं ६ पूर्ववत्सूक्तसंख्येति। ऐरंमदः इरमदपुत्रोदेव
मुनिर्नामऋषिः। ततः अरण्यानिमहारण्यानिमानिनांदेवतानुष्टावसूक्तवान्। महारण्ययोर्महत्वइत्यर्थः। तुशब्दात् अनुष्टुभंछंदः। अर
ण्यानीतिसूक्तंमग्निधाने ऋचेपंचस्रूवेदाः शैरीषस्त्रिष्टुबंतं। ऋचेदधामीतिपंचर्चंसूक्तं ५ शैरीषः शिरीषपुत्रः स्रूवेदोनामऋषिः। अ
नादेशात् इंद्रोदेवता। त्रिष्टुबंतस्येतिजागतंछंदः। ततः त्वंशर्द्धायेत्यंत्यर्क् त्रिष्टुप्। ऋचेदधामीतिसूक्तं रात्रिपर्यायपरास्त्रेसूत्रकारः। ऋषा
ण्वणः पृथुर्वैन्यः ऋषाणांसइतिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति। वेनपुत्रः पृथुर्नामऋषिः। अनादेशात् इंद्रोदेवता। अनादेशात्त्रिष्टुप्छं
दः। ऋषाणासइतिसूक्तंस्वाध्यायधर्मः। सविताप्तिर्हैरण्यस्तूपः सावित्रं। सवितायंत्रैरितिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति। हिरण्यस्तू
पपुत्रोर्चिर्नामऋषिः। सवितादेवता। अनादेशात्त्रिष्टुप्छंदः। सवितायंत्रैरितिसूक्तंस्वाध्यायधर्मः। समिद्धोग्निर्मृळीकोवासिष्ठआग्ने
यंबार्हतमंत्येउपरिष्टाज्ज्योतिषी जगत्युपांत्यावा। समिद्धोग्निरितिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति। वसिष्ठपुत्रोमृळीकोनामऋ
षिः। अग्निर्देवता। बृहतीछंदः। ततः अग्निर्देवोदेवानामित्यंत्येदेऋचावुपरिष्टाज्ज्योतिषी। त्रिर्द्वादशकाः क्रमेणंत्याष्टकश्चेति त्रिष्टुप्से

रः। तत्राग्निर्देवोदेवानामित्युपांत्यर्क् विराड्जगती विकल्पेन। नपादानियमः। समिद्धोग्निरितिसूक्तंस्वाध्यायधर्मः। श्रद्धयाग्निः श्रद्धाकामायनीश्राद्धमा
नुष्टुभंतु। श्रद्धयाग्निरितिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति। श्रद्धानामब्रह्मवादिनीऋषिका सा च कामायिनीकामसंभविनीत्यर्थः। श्राद्धमितिश्र
द्धादेवता। अनुष्टुप्छंदः। तुशब्दात् उत्तरसूक्तमानुष्टुभं। श्रद्धयाग्निरितिसूक्तमग्निधाने। शासः स्वासोभारद्वाजः। शासइत्थेतिपंचर्चंसूक्तं
५ पूर्ववत्सूक्तसंख्येति। भरद्वाजपुत्रः शासोनामऋषिः। अनादेशात् इंद्रोदेवता। तुशब्दात् अनुष्टुप्छंदः। अप्रतिरथेनशासेनेतिब्राह्मण
श्रुतिः। तथाशासइत्थेतिसूक्तंस्वाध्यायधर्मः। ईंखयंतीर्दैवजामयइंद्रमातरोगायत्री। ईंखयंतीरितिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति॥
देवजामयइतिदेवानांस्वसृभूताः इंद्रमातरोनामऋषिका। अनादेशात् इंद्रोदेवता। गायत्रीछंदः। ईंखयंतीरपस्युवइतिचब्राह्मणाछंसीशस्त्रे
महाव्रतारण्यके। सोमोयमीभाववृत्तमानुष्टुभंतु। सोमएकेभ्यइतिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति यमीनाम्नीऋषिका। सावैवस्वतपुत्री
स्याता। भाववृत्तदेवता। अनुष्टुप्छंदः। तुशब्दात् उत्तरसूक्तमानुष्टुभं। सोमएकेभ्यइतिसूक्तंभ्रातरनुवाकानुमंत्रणेसूत्रकारः। अरायिशि
रिंबिठोभारद्वाजोलक्ष्मीघ्नं द्वितीयात्वसीयाब्राह्मणस्पत्येअंत्यावैश्वदेवी। अरायिकाणइतिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति। भरद्वाजपु
त्रः शिरिंबिठोनामऋषिः। अपिवाशिरिंबिठोभारद्वाजइतियस्कवचनात्। तथाशिरिंबिठोमेघः शीर्यंतेबिठेविधंतरिक्षमितिनैरुक्ते। अलक्ष्मी
घ्नं। कारिका। अश्रीर्नोशकंसूक्तंजपहोमादिभिस्त्विदं। तत्रोधोपांत्ययोरश्रीर्नोशएवप्रकीर्त्तितः। तत्राद्यानुवृत्त्युर्थ्यास्त्वनाकलक्ष्मीर्नोशनोदेवता
ततः चत्तोइतिद्वितीयर्क् अदोयद्दारुप्लवतइतितृतीयर्क्। एतद्देऋचौब्रह्मणस्पतिर्देवते। ततः परीमेगामित्यंत्यर्क्विश्वदेवदेवत्या। तुशब्दा

१३८ त्वनुष्टुप्छंदः। अराथि काणे विकटेति सूक्तं स्वाध्यायधर्मः। अग्निं केतुराग्नेय आग्नेयं गायत्रं। अग्निं हिन्वंतु न इति पंचर्चं सूक्तं ५ पूर्ववत्सूक्तसंख्येति।
अग्निपुत्रः केतुर्नाम ऋषिः। अग्निर्देवता। गायत्रीछंदः। अग्निं हिन्वंतु न इति पंचर्चं सूक्तं प्रातरनुवाकानुमंत्रणे सूत्रकारः। इमानुकमिति भुवन आप्त्यः साध
नो भौवनो वैश्वदेवं द्वैपदं त्रैष्टुभं विराड्रूपा इमा नु कमिति सूक्तं पंचर्चं ५ पूर्ववत्सूक्तसंख्येति। आप्त्यपुत्रो भुवनो नाम ऋषिः। अथवा भुव
पुत्रः साधनो नाम ऋषिर्विकल्पेन। विश्वेदेवा देवता। त्रैष्टुभमित्युक्ते। सत्येकादशाक्षराः पादाश्चेति द्विपदा त्रिष्टुप्छंदः। ततः इमा नु कमित्या
द्यर्धर्चं विंशत्यक्षरा द्विपदा इति। इमा नु कं भुवना सीषधामेति द्विपदाः शंसतीति ब्राह्मणश्रुतिः। तथा सूत्रकारः। अध्यापने अर्धर्चमर्कमन
यन्ति तं त्वर्धर्चं द्विपदा इत्यर्थः। अयुं हंत्या द्विदेवेति वचनात्। शेषाश्चत्वारो द्विपदास्ता द्विर्द्विपदास्ते च समानं तीति पक्षे चतुष्पदा त्रिष्टुबिति
र्थः। सूर्यो नश्चक्षुः सौर्यः सौर्यं गायत्रं। सूर्यो न इति पंचर्चं सूक्तं ५ पूर्ववत्सूक्तसंख्येति। सूर्यपुत्रश्चक्षुर्नाम ऋषिः। सूर्यो देवता। गायत्रीछंदः। सूर्यो
नो दिवस्पात्वित्येतेनैव प्रातःपथेनेत्याश्विनसहस्रशस्त्रे ब्राह्मणस्त्रयोः। उदसौ षट् पौलोमी शच्यात्मानं तुष्टावानुष्टुभं॥ उदसौ सूर्य इति ष
ळर्चं सूक्तं ६ पुलोमतनया शचीनामेंद्रस्य माहिषी इति ऋषिका सत्यात्मानमेव स्तुतवती। सैव ऋषिका देवतेति। अनुष्टुप्छंदः। उदसौ सूक्त
मिति स्वाध्यायधर्मः। तीव्रस्य पंच पूरणो वैश्वामित्रः तीव्रस्याभिवयस इति पंचर्चं सूक्तं ५ विश्वामित्रपुत्रः पूरणो नाम ऋषिः। अनादेशादिं
द्रो देवता। अनादेशात्त्रिष्टुप्छंदः। तीव्रस्याभिवयसो अस्य पाहीति माध्यंदिने महाव्रतारण्यके। मुंचामि त्वा प्राजापत्यो यक्ष्मनाशनो ना १३८

राजयक्ष्मघ्नं त्वानुष्टुभं। मुंचामि त्वेति पंचर्चं सूक्तं ५ पूर्ववत्सूक्तसंख्येति। प्रजापतिपुत्रो यक्ष्मनाशनो नाम ऋषिः। राजयक्ष्मा नाम महाव्याधिस्त
न्नाशनं सूक्तं। तथा हि स्मर्यते। अथ व्याधितस्यातुरस्य यक्ष्मगृहीतस्य चा षडाकृतिष्वस्मुंचामि त्वा हविषा जीवनाय कमित्येतेनेति गृह्णीहे। सूक्तस्य रा
जयक्ष्मा महाव्याधिनाशनहेतुभूतं स एव देवता। अनादेशात्त्रिष्टुप्छंदः। आत्वाहार्षमित्येतत्र्यृक् अनुष्टुप्। तत्र कारिका। राजयक्ष्महनं सूक्तं प्राजापत्यं
तदुच्यते ऐंद्राग्नं मन्यते यास्को लिंगोक्तदेवतं इति। ब्रह्मणाग्निः षट् ब्राह्मो रक्षोहा गर्भसंस्रावे प्रायश्चित्तमानुष्टुभं हि। ब्रह्मणाग्निरिति षळर्चं सूक्तं ६ ब्रह्मपुत्रो
रक्षोहा नाम ऋषिः। गर्भसंस्रावे गर्भस्य निहतस्य स्रावे पाते विषयभूते तस्य प्रायश्चित्तं समाधायकं। समाधानविनियोगकथनेन देवतामेव व्याचष्टे।
स प्रजापतिदेवत इत्यर्थः। तथा चोक्तं। मंत्रे बृहन्निरुक्ते प्रदेवताकर्मवांस्तदेतत्। मंत्रतः कर्मणां नैव प्रजापतेः संभवेदिति। अनुष्टुप्छंदः। हिशब्दात्त्रीणि सूक्ता
न्यनुष्टुभानि। ब्रह्मणाग्निरिति सूक्तमृग्विधाने। अक्षीभ्यां विवृहा काश्यपो यक्ष्मघ्नं। अक्षीभ्यां त इति षळर्चं सूक्तं ६ पूर्ववत्सूक्तसंख्येति। क
श्यपपुत्रो विवृहा नाम ऋषिः। यक्ष्मघ्नं राजयक्ष्मक्षयरोग इत्यर्थः। तस्य नाशनमस्य वाच्यमिदं हेतुभूतं सैव देवता। हिशब्दादेव अनुष्टुप्छंदः। अ
क्षीभ्यामिति सूक्तमृग्विधाने। अपेहि पंच प्रचेता दुःस्वप्नघ्नं पंक्त्यंतं त्रिष्टुप्मध्या। अपेहि मनसस्पत इति पंचर्चं सूक्तं ५ आंगिरसपुत्रः प्रचेता नाम ऋषिः
प्रचेता न आंगिरस इति मंत्रलिंगात्। दुःस्वप्ननाशनफलमुच्चारणोक्तमिदं सूक्तं। दुःस्वप्ननाशनमिति लिंगोक्तदेवता। ततः अजैष्मेत्यंत्यर्क् पंक्तिः
चपदा इति। ततः यदाशसा निःशसा तृतीयमध्यमर्क् त्रिष्टुप्। शिष्टास्तु हिशब्दात् अनुष्टुभः। अपेहि मनसस्पत इति सूक्तमृग्विधाने। देवा नैर्ऋ
तः कपोतः कपोतोपहतौ प्रायश्चित्तं वैश्वदेवं। देवाः कपोत इति पंचर्चं सूक्तं ५ पूर्ववत्सूक्तसंख्येति। निर्ऋतिपुत्रः कपोतो नाम ऋषिः। विश्वेदेवा

देवता।अनादेशात्त्रिष्टुप्छंदः।कपोतःपक्षिजातिस्तेनगृहादेरुपहतेअभिमर्शेसतिजपहोमाभ्यांप्रायश्चित्तमिदंसूक्तं।नादिष्टात्।अपुरुषत
मिति।यस्मिन्हस्त्यते।कपोतश्चेदगारमुपहन्यादित्युपक्रम्यदेवाःकपोतइतिसूक्तंजपेद्धुयाद्वाजपेदिति।ऋषभमृषभोवैराजःशाक्वरोवासपत्न
घ्नमनुष्टुभंमहापंक्त्यंतं।ऋषभंमेतिपंचर्चंसूक्तं५पूर्ववत्सूक्तसंख्येति।वैराजःविराट्पुत्रःऋषभोनामऋषिःअथवाशाक्वरपुत्रऋषभोना
मऋषिर्विकल्पेन।विश्वामित्रऋषभंमासमानानांसपत्नानाशनमनेनोच्यते।सपत्नहाइतिसपत्नघ्नमितिलिंगोक्तदेवता।अनुष्टुप्छंदःततः
योगक्षेममित्यंत्यर्क्महापंक्तिःपृष्टकाजगतीभेदः।सपत्नोमासमानानामित्यभिक्रम्यमन्त्रलिंगेदृष्टे।तुभ्येदंचतुष्कंविश्वामित्रजमदग्नीजगतं
तृतीयाल्लिंगोक्तदेवता।तुभ्येदमितिचतुर्ऋचंसूक्तं४विश्वामित्रजमदग्नीद्वावृषीसहापश्येतां।वैद्रोगाथिनभार्गवौ।विकल्पेन।अनादेशादिं
द्रोदेवता।ततःसोमस्यराज्ञइतितृतीयर्क्लिंगोक्तदेवता।सोमवरुणबृहस्पतिरनुमतिर्धाताविधाताग्निरुक्ताजगतीछंदः।तुभ्येदमितिस
केस्वाध्यायधर्मेः।वातस्यानिलोवातायनोवायव्यं।वातस्यनिलिचतुर्ऋचंसूक्तं४पूर्ववत्सूक्तसंख्येति।वातायनपुत्रअनिलोनामऋषिःवायुर्देव
ता।अनादेशात्त्रिष्टुप्छंदः।वातस्यनुमहिमानंसूक्तंस्वाध्यायधर्मेः।मयोभूःशबरःकाक्षीवतोगव्यं।मयोभूरितिचतुर्ऋचंसूक्तं४पूर्ववत्सूक्त
संख्येति।कक्षीवत्पुत्रःशबरोनामऋषिःगावोदेवता।अनादेशात्त्रिष्टुप्छंदः।मयोभूर्वातोअभिवातूस्राइतिविहाय्यांतयायादित्युक्तनैरयं
तेतिचसूक्तशेषमितिगृह्यो।विभ्राट्विभ्राट्सौर्यःसौर्यःनागतमास्तारपंक्त्यंतं।विभ्राड्बृहत्पिबत्वितिचतुर्ऋचंसूक्तं४पूर्ववत्सूक्तसंख्येति।सूर्यपु
त्रोविभ्राड्ऋषिःसूर्योदेवता।जगतीछंदः।विभ्राजंज्योतिषेत्यंत्यर्क्आस्तारपंक्तिः।अंत्योद्वादशाक्षरौ।आद्यावष्टाक्षरावितिपंक्तिभेदः।वि

भ्राड्बृहत्पिबतुसोम्यंमध्वितिस्तोत्रियेतस्मिन्कार्यः।त्वंत्यमिटतोभार्गवोगायत्रं।त्वंत्यमिटतइतिसूक्तंचतुर्ऋचं४पूर्ववत्सूक्तसंख्येति।भृगोःपुत्रइटो
नामऋषिः।अनादेशादिंद्रोदेवता।गायत्रीछंदः।त्वंत्यमिटतइतिसूक्तंस्वाध्यायधर्मेः।आयाहिसंवर्तआंगिरसऔषसंद्विपदं।आयाहिवनसेतिचतुर्ऋचंसूक्तं४पू
र्ववत्सूक्तसंख्येति।आंगिरसपुत्रःसंवर्तोनामऋषिः।संवर्तआंगिरसइतिश्रुतिदर्शनात्।उषादेवता।विंशत्यक्षराद्विपदाविपरीतापंक्तिश्छंदः।पंक्तिभे
दः।अथ्यापदेद्विद्विपदास्तत्समाम्नंतीत्यस्मिन्पक्षेआद्यर्क्तुचतुष्पदाविपरीतापंक्तिःपंक्तिभेदः।युजौचेज्जागतौद्वितीयचतुर्थौद्वादशाक्षरौ।
अयुजौप्रथमतृतीयावष्टाक्षराविति।पितुभृतेनेतिद्वितीयर्क्संस्तारपंक्तिश्चतुष्पदाःपंक्तिःपंक्तिभेदः।आद्यांत्यौचेत्।प्रथमचतुर्थौद्वादशाक्षरौ।द्वि
तीयतृतीयावष्टाक्षराविति।पिंगलमतेतृतीयंद्विपाज्जागतगायत्राभ्यामितिपक्षेगायत्रीभेदोद्विपदाइत्यर्थः।आयाहिवनसासहेतिद्विपदाःशंसतीतिब्राह्म
णस्त्रयोः।आत्वाध्रुवोराज्ञस्तुतिरानुष्टुभंतु।आत्वाहार्षमितिषडर्चंसूक्तं६आंगिरसपुत्रोध्रुवोनामऋषिः।अनुक्तगोत्रमांगिरसमितिवचना
त्।राज्ञस्तुतिःराजादेवता।तुशब्दात्उत्तरसूक्तेराज्ञस्तुतिस्तं।राज्ञोभिषिक्तायैतत्सूक्तेअभिमंत्रणइति।अनुष्टुप्छंदः।तुशब्दात्उत्तरसूक्तमनुष्टुभं-
आत्वाहार्षमितिसूक्तमग्निविधाने।अभीवर्तेनपंचाभीवर्तः।अभीवर्तेनेतिपंचर्चंसूक्तं५आंगिरसपुत्रअभीवर्तोनामऋषिः।तुशब्दात्राज्ञस्तुतिःराज्ञो
देवता।तुशब्दादनुष्टुप्छंदः।अभीवर्तेनेतिसूक्तंराज्ञाभिषिक्तेऋग्विधाने।संग्रामेसमुपोढेतुराजानंसन्नाहयेदात्वाहार्षमंतरेधीतिपश्चाद्ध्यस्याव
63 स्थापयेत्पावीभार्गवायणीतिदेशेराज्ञस्तुतावित्यर्थः।प्रवस्तुर्ध्वग्रावासर्पोर्बुदिर्ग्राव्णस्तौजायतं।प्रवोग्रावाणइतिचतुर्ऋचंसूक्तं४स
र्पजातिरर्बुदोनामपुत्रऊर्ध्वग्रावानामऋषिःग्राव्णस्तोतिस्तुतवान्।ग्रावाणोदेवता।गायत्रीछंदः।आवर्तंजसिप्रवोग्रावाणइतिसूक्तयोरिति

पवमानउगुणः सोमोदेवता। वत्सप्रेः शाकगायत्रीछंदः। परिप्रकारः परिप्रासस्द्वातिपंचर्चंसूक्तं ५ पूर्ववत्सूक्तसंख्येति। पूर्ववतउचथ्यऋषिः पवमा
नगुणः सोमोदेवता। वत्सप्रेः गायत्रीछंदः। ।उभेचतुष्कमवत्साहरः ।।उभेरशुभ्रासस्द्वातिचतुर्ऋचंसूक्तं ४ कश्यपपुत्रोवत्सारऋषिः पवमानगुणः सोमोदे
वता। वत्सप्रेः शाकगायत्रीछंदः ।अस्य भ उत्तमसहातिनवर्चसूक्तं ईशानामपङ्क्ति त्वंनोअग्नेमसमं सप्तमीजगती

१३९ ग्यावस्कव। शंसनेसूत्रकारः प्रस्कन्वः स्कुराभेवआग्नेयमानुष्टुभंद्वितीयागायत्र्याद्यार्षंवा॥ प्रस्कन्वइतिचतुर्ऋचंसूक्तं ४ पूर्ववत्सूक्तसंख्येति। कण्वपुत्रःप्रस्-
कन्वोनामऋषिः प्रस्कन्वऋचामिति मंत्रलिंगात्। अग्निर्देवता। अनुष्टुप्छंदः। ततः प्रस्कन्वइत्याद्यर्के ऋचुदेवत्या। प्रदेवंदेव्येति द्वितीयर्क्। गायत्री। शि-
ष्यस्क। प्रस्कन्वोनुष्टुभम् प्रस्कन्वइतिसूक्तांतर्गतप्रदेवंदेव्येतित्यृचोग्निप्रणयनेब्राह्मणस्तत्रयोः पतंगत्वंपतंगः प्राजापत्योमायाभेदंजगत्याद्। पतं
गमक्तमितित्र्यृचंसूक्तं ३ प्रजापतिपुत्रः पतंगोनामऋषिः मायानांभेदो मायालक्षणां धकारस्तच्चाराको भेदइत्यर्थः नवस्वरूपः श्रीसूर्योदेवता। ततः
पतंगमित्याद्यर्के जगती। शिष्टास्त्रचाअनादेशात्त्रिष्टुभः पतंगमक्तमक्तमितिहृचः प्रवर्ग्यशंसनेब्राह्मणस्तत्रयोः त्यमूषुरिष्टनेमिस्तार्क्ष्यस्तार्क्ष्यं।
त्यमूषुवाजिनमितित्र्यृचंसूक्तं ३ पूर्ववत्सूक्तसंख्येति। तार्क्ष्यपुत्रोरिष्टनेमिऋषिः तास्यइस्कचेसाति आदित्योदेवता। अनादेशात्त्रिष्टुप्छंदः त्य
मूषुवाजिनंदेवजूतमिति तार्क्ष्योनुतइतिसूक्तप्रशंसावनयास्वर्येइवज्योतिषापस्ततानेति प्रत्यसंस्वर्यमभिवदतीति। ब्राह्मणस्त्वत्रयोः अतिष्ठतेक
वीः शिबिरौशीनरः काशिराजः प्रतर्दनोरोहिदश्वोवसुमनाआद्यानुष्टुप् ५ उत्तिष्ठतेतित्र्यृचंसूक्तं ३ पूर्ववत्सूक्तसंख्येति। प्रत्यृचः प्रत्यृषिरित्युच्यते। उत्तिष्ठते
त्याद्यर्के उशीनरःपुत्रः शिबिर्नामऋषिः ततः आवंहविशिनिद्वितीयर्के काशीनांराजा प्रतर्दनो नामऋषिः आतंमन्यइति तृतीयर्के रोहिदश्वपुत्रो
वसुमनानामऋषिः एतेत्रयोराजर्षयोज्ञेयाः इत्येकर्चो एकैकस्यक्रमेणद्रष्टव्याः अनादेशात्इंद्रोदेवता। ततः उत्तिष्ठतेत्याद्यर्केअनुष्टुप्शे
षेद्वेऋचावनादेशात्त्रिष्टुभौ। उत्तिष्ठतावपश्यतेतिऋचोमाध्यंदिनेसवनेश्रातंहविःआतंमन्यऊधनीतिद्वेऋचौयाज्यानुवाक्येसूत्रकारः १३९

प्रससाहिषेजयऐंद्रः प्रससाहिषइतित्र्यृचंसूक्तं ३ पूर्ववत्सूक्तसंख्येति। इंद्रपुत्रोजयोनामऋषिः अनादेशात् इंद्रोदेवता। अनादेशात्त्रिष्टुप्छंदः।
प्रससाहिषइत्यर्क। मृगोनभीमइत्यर्क। एतेद्वेऋचौयाज्येतिसूत्रकारः प्रथश्चैकर्चोः प्रथोवासिष्ठः सप्रथोभारद्वाजोघर्मःसौर्योवैश्वदेवं। प्रथश्च
यस्येतित्र्यृचंसूक्तं ३ पूर्ववत्सूक्तसंख्येति। प्रत्यृचः प्रत्यृषयउच्यंते। ततः प्रथश्चयस्येत्याद्यर्के वसिष्ठपुत्रः प्रथोनामऋषिः ततः आविंदतइतिद्वि
तीयर्के भरद्वाजपुत्रः सप्रथोनामऋषिः तेविंदंनितितृतीयर्के सूर्यपुत्रोघर्मोनामऋषिः इत्येताऋषयः प्रत्यृचोज्ञेयाः विश्वेदेवादेवता। अनादे
शात्त्रिष्टुप्छंदः। प्रथश्चयस्येतिसूक्तंप्रवर्ग्यशंसनेब्राह्मणस्तत्रयोः बृहस्पतिस्तपुर्मूर्धाबार्हस्पत्योबार्हस्पत्यं। बृहस्पतिर्नयतितित्र्यृचंसूक्तं ३
पूर्ववत्सूक्तसंख्येति। बृहस्पतिपुत्रः तपुर्मूर्धानामऋषिः बृहस्पतिर्देवता। अनादेशात्त्रिष्टुप्छंदः। बृहस्पतिर्नयतितिसूक्तंस्वाध्यायधर्मः॥
अपश्यन्प्रजावान्प्राजापत्योन्वृचंयजमानपत्नीहोत्राशिषः अपश्यंत्वेतित्र्यृचंसूक्तं ३ पूर्ववत्सूक्तसंख्येति। प्रजापतिपुत्रः प्रजावान्ऋषिः
अत्रान्वृचमृचामनुक्रमेणप्रत्यृचंसंततमित्यर्थः। तत्रापश्यंत्वेत्याद्यंअनमानंयजमानमीक्षतइत्याशिषः ततः अपश्यंत्वामनसादीध्याना
मितिद्वितीयर्के अनवानंपत्नीमीक्षतइत्याशिषः ततः अहंगर्भमितितृतीयर्के अनवानंहोतुरात्मानंमीक्षतइत्याशिषः होतुर्विधानक्रमेण
सएवदेवता। यजमानस्यपत्न्याहोतुश्चाशिषइत्यर्थः तयास्तूयते। अपश्यंत्वेतस्याद्ययायजमानमीक्षतेद्वितीययापत्नींतृतीययात्मानमी
ति। अनादेशात्त्रिष्टुप्छंदः अपश्यंत्वेतिसूक्तंप्रवर्ग्यशंसनेब्राह्मणस्तत्रयोः विष्णुस्त्वष्टागर्भकर्ता विष्णुर्वाप्राजापत्योगर्भार्थाशीर्लिंगोक्तदे
वतमानुष्टुभं। विष्णुर्योनिमितित्र्यृचंसूक्तं ३ पूर्ववत्सूक्तसंख्येति। गर्भाणांकर्ताभूतस्त्वष्टानामऋषिः नास्यगोत्रमनुपदेशात्कात्यकपंक्ति

१४५ दित्यर्थः॥ अथवा प्रजापतिपुत्रो विष्णुर्नामऋषिर्विकल्पेन। गर्भार्थाशीः पूर्वकं रक्षणार्थं प्रार्थ्यते। तत्रालिंगोक्तदेवतमित्यत्र विष्णुः। तथा प्रजापतिः सिनीवा
ली सरस्वती। अश्विनौ इत्येता देवताः। इदं बहुदेवत्यं सूक्तं। अनुष्टुप् छंदः। विष्णुर्योनिं जमेषएकाचैव प्रजापतेरित्विग्गृह्यपरिशिष्टे। महि सत्यधृतिर्वारु
णिरादित्यं स्वस्त्ययनं गायत्रं वै। महित्रीणामिति त्र्यृचं सूक्तं २ पूर्ववत्सूक्तसंख्येति। वरुणपुत्रः सत्यधृतिर्नामऋषिः। आदित्या मित्रश्च। आदि
त्यो देवता। यस्मै पुत्रासो अदितेरिति मंत्रलिंगात्। स्वस्त्ययनं। अविनाशगमनसाधनभूतं सूच्यते। महित्रीणामित्यनुमंत्रेनमितिसरष्टस्यनकृत
श्चिद्रूपं भवती विविज्ञायत इति स्थितः। गायत्रीछंदः। वैशब्दात् पंचसूक्तानि गायत्राणि। तावोवातायन उलोवायव्यं। वात आवातु भेषजं त्र्यृचं
सूक्तं २ पूर्ववत्सूक्तसंख्येति। वातायनो नाम वातपुत्र उलो नाम ऋषिः। वायुर्देवता। वैशब्दात् गायत्रीछंदः। वात आवातु इति सूक्तं स्वाध्याय
धर्मः। आग्नेयं चाग्ने यो वत्स आग्नेयं तु। आग्नये वाचमिति पंचर्चं सूक्तं ९ अग्निपुत्रो वत्सो नाम ऋषिः। अग्निर्देवता। तुशब्दात् उत्तरसूक्तमा
ग्नेयं। वैशब्दात् गायत्रीछंदः। आग्नये वाचमीरयेति जातवेदस्यं ब्राह्मणस्तुतयोः। अनूनं त्वं च आग्नेयं श्येनो जातवेदस्यं। अनूनं त्वं सूक्तं २
अग्निपुत्रः श्येनो नाम ऋषिः। जातवेदा अग्निर्देवता। जातवेदस इत्यग्नेर्गुणः। वैशब्दात् गायत्रीछंदः। आग्नये वाचमिति पूर्वसूक्तं तपोत्तरं प
नूनं सूक्तमिति द्वे सूक्ते। आतरनुवाकानुक्रमणे सूत्रकारः। आयं गौः सार्पराज्ञ्यात्मदैवतं सौर्यं वा। आयं गौरिति त्र्यृचं सूक्तं ३ पूर्ववत्सूक्त
संख्येति। सार्पराज्ञी नाम्नी ऋषिका। स एवात्मदेवतेत्यर्थः। सा स्वयं मुवामिति पूर्वमुक्तं २ पूर्ववत्सूक्तसंख्येति। तस्या गोत्वोत्पत्तिर्ना
त्वा सूर्यदेवता विकल्पेन। सूर्य आत्मेति श्रुतेः। वैशब्दात् गायत्रीछंदः। आयं गौः पृश्निरक्रमीद् दीक्षितमियं पृश्निर्वर्ण आविशति वित १४५

८२

ये यं वै सर्पराज्ञीयां हि सर्पतेराज्ञीयं वा इति प्रशंसा ब्राह्मणस्तुतयोः। ऋतं च माधुछंदसो घमर्षणो भाववृत्तं चमानुष्टुभं तु। ऋतं च सत्यमिति त्र्यृचं सूक्तं ३ पूर्व
वत्सूक्तसंख्येति। माधुछंदसपुत्रो घमर्षणो नाम ऋषिः। भाववृत्तं देवता। भाववृत्तोक्तार्थाः। अनुष्टुप् छंदः। तुशब्दात् उत्तरसूक्तमानुष्टुभं। ऋतं च स
त्यमिति सूक्तमघविधाने। तथा स्मृति प्रशंसा घमर्षणः स्वाध्याय धर्मश्च॥ संसं चतुष्कं संवननः संज्ञानमाद्याग्नेयी त्वतीया त्वष्टुप् त्रिष्टुप्। संसमिद्
चतुर्ऋचं सूक्तं ४ आंगिरसपुत्रः संवननो नाम ऋषिः। अनुक्तगोत्रमांगिरसं विद्यादिति वचनात्। संज्ञानमिति सम्यक्ज्ञानमित्यर्थः। सैव देवता।
ततः संसमित्याद्यर्चः। अग्निर्देवत्या। अग्ने विश्वान्यर्य आ इति मंत्रलिंगात्। तुशब्दात् अनुष्टुप् छंदः। ततः समानो मंत्र इति त्वतीयर्चः। त्रिष्टुप्। ततः संसमि
दिति सूक्तं स्वाध्यायधर्मः। तथा संगच्छध्वमिति त्र्यृचो गुरुबंधुः परस्परेण स्कातिः। तथा संयोजने त्विष्टिः। श्राद्धे सपिंडीकरणे विनियोग इति गृह्ये। तत्र
तृतीया त्वष्टुप् तृतीयात्त्रिष्टुप् इति द्विरुक्तिः शास्त्रसमाप्तिः सूचनार्था। ग्रंथांतरे द्विर्वचन पाठ इत्यंततः सर्वत्र बोद्धव्याः। शाकलसंहितातिरिक्ता ग्रंथांस
न्त्राद्विरुक्तपाठ इत्यर्थः। तत्र वेदांगानि चनम आचार्येभ्यो नम आचार्येभ्यो नमः। शौनकाय नमः शौनकायेति द्विर्वचनं सिद्धं। तथा सर्वानि चेत्यर्थः॥ ॥
॥ ॥ इति दशममंडलं संपूर्णं॥ ॥ सूक्तसंख्या दशममंडले॥ ॥ एकादशाधिकानवतिः शतमन्यत्समंतं बुधैः। दशानामपि च मंत्रैतत्प्रथममंडलं यथोदि।
सूक्तसंख्या यातद्ध्यं नतभिरुक्तां। १०१॥ अनुवाकसंख्या। द्वादशेति। उच्यतेऽत्र। अग्ने बृहन्। त्वष्टा दुहित्रे। प्रदेवत्रा। अभ्राम इंद्र। इदं भिया। महाकायेन। स
तेनोत्तभिता। संजागृवद्भिः। इंद्र इद्धा। तमस्य द्यावापृथिवी। नासदासीत्। शासइत्थेति। द्वादशसंख्या इत्यर्थः। अथ ऋग्वेद इत्यादि तृतीयत्रिष्टुप्तनक।
इदं शास्त्रमधीयानः प्रणवाद्यं तनाभियान्॥ ५ सार्षछंदो देवतादि विज्ञानफलमुच्यते। सर्षेर्नामार्षगोत्रज्ञः सर्वैः संस्थानता भियावा। २। एकैकस्यस्ये

१४२ दिव्यसहस्राद्दतिथिर्भवेत्। छंदसामधिकोक्तं वंछेदेज्ञानानवाप्नुयात्। ३ तस्यास्तस्यादेववाच्यरूढ्वावंप्राप्तपद्यते। योयंविजानातिनरोदेवताभिति
निर्णयमिति॥ ॥ इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांडोरवलोपनामकृष्णभट्टसुतगणेशकृतोअष्टमाष्टकस्याष्टमोध्यायः॥ ॥ अथपारायणे
वादस्तत्र। विधिनिंदाप्रशंसासत्थाख्यानमित्यादि। आसीरासीद्दण्णसंधस्त्रावाह्मणेसंशयश्च इति। यस्मात्केवलैर्वाक्यैनेनु छानावक्षिमत्वाद्वेद
वाक्यानांमृदार्थत्वाच्च। अतः कविभिराचार्यैर्वेदार्थकुशलैर्वेदार्थस्योविकल्पकमार्थंस्कबोधानीमानिविद्यास्थानानिप्रवर्तितानि। शिक्षाकल्पोव्या
करणंनिरुक्तंछंदोज्योतिषमित्यंगानि। धर्मशास्त्रंपुराणंन्यायविस्तारोमीमांसादीनिकानिपुनःप्रयोजनानिविद्यास्थानानामनुप्रवर्तते। अतआह
॥ शिक्षास्वरवर्णोच्चारणोपदेशकंशास्त्रं। ज्योतिषंकालपरिणामज्ञापनार्थंशास्त्रं॥ धर्मशास्त्रमाचारोपदेशकंशास्त्रं। पुराणंस्थित्युत्पत्तिप्रलयादिस्
चकंशास्त्रं॥ न्यायविस्तरःप्रमाणैरर्थपरीक्षणंकरोतिशास्त्रं॥ मीमांसावेदवाक्यार्थविचारणापरशास्त्रंइत्येवमादीनिप्रयोजनानिविद्यास्थानानामतआ
चार्योभगवान्शौनकोवेदार्थवित्। ब्राह्मणेभ्योर्थवादानुत्सृज्यवेदार्थंप्रवेदशास्त्रंकृतवान्। अन्यथावेदवार्थोज्ञातुंनशक्यतइति। तथावेदांगानिज्ञा
नानिरूपितमिति। शाकल्यसंहितायांसूक्तसंख्या। १०१८ सूक्तसहस्रंसप्तदशाधिकं॥ तथाऋक्संख्या। १०५८० दशसहस्राणिपंचशतान्यशीतिः अ
नुवाकसंख्या ८५ पंचाशीतिः। ग्रंथसंख्या ५७५० गणेशडोरवलेनेयंलिखितादीपिकोत्तमा। वाक्धीवृद्धिसिध्यर्थमेवलक्षणमुत्तमं। गणेशडोरवले
त्युपनामाधर्मार्थसाधनंमोक्षकामाः विद्वज्जनमनोहृद्रमणीरचितादीपिकानुक्रमणी॥ श्रीशके १७२३ दुर्मतीनामसंवत्सरेवैशाखशुक्ल
दशम्यांगुरौराटकरोपनामविठ्ठलेनलिखितमिदंस्वार्थपरार्थंच॥ श्रीसप्तकोटीश्वरार्पणमस्तु॥ पारायणंकर्तव्यब्रह्मचारीगुरुःशिष्येभ्यस्त्वद १४२

सूक्तेभ्यः अ[illegible]रामेकांप्रशस्तांप्राचीमुदीचीमपराजितांवा। एकःश्रोतादक्षिणतोनिषीदेद्द्वौवाश्र्युंसस्यथावकाशं। तेचीहिमो २
इत्यभिचोद[illegible]ध्याउपसंगृह्णसर्वे। सओमितिप्रस्वरतिन्यिमानःप्रस्तारस्थानेसमवस्कदान्तः चतुर्मात्रोवार्धपूर्वोनुदात्तःषण्मात्रोवासमकाद्धः
स्वरःसमा अ[illegible]प्यितुरवनित्यंस्वर्गद्वारंब्रह्मवरिष्ठमेतत्। मुखंस्वाध्यायस्यभवेन्नचैतत्संदध्यात्स्वाध्यायगतंपरेण। प्रवोदितोभिक्रमते
यथास्वमभि[illegible]द्धिहतस्तथैव। सर्वोदन्तोविहतस्थितःप्रक्रमसेप्रयुक्तंहितपश्चितंवा। ९॥ भोजनान्मुक्तान्यभिधाने। आद्यानित्रीणिसूक्तानिपं
वचामिद्दहान्[illegible]इतत्यात्यानिसूक्तानिअग्निंनरइनीतिच। भक्ष्नानीतिचाध्यायंभोजनान्वाकपकेददे। सर्वान्कामानवाप्नोतिमुच्यतेसर्वकिल्बि
षैः प्राप्भोजन[illegible]मानवानांमहर्षिणां। पूर्वोक्तेजपतो नित्यमर्थसिद्धिः प्रजायते॥१